

कक्षा
८

# संस्कृतभाषा

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

कक्षा ८

# संस्कृतभाषा

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतभाषाविषयकपाठ्यक्रमस्याधारेण अष्टम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं डा. ध्रुवप्रसादः भट्टराई, गणेशः तिमिल्सिना, पर्वतराजः घिमिरे, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल, प्रा.डा. माधवशरणः

उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, शिवराजः लामिछाने, निश्चलः अधिकारी, भीमप्रसादः खतिवडा, केशवः भट्टराई, रोहिणीराजः तिमिल्सिना, नारायणः घिमिरे, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | परब्रह्मवन्दना | १ |
| द्वितीयः | दयामूर्तिः सौभरिः | १७ |
| तृतीयः | संस्कृतवाङ्मयम् | ४१ |
| चतुर्थः | पुस्तकप्रेषणाय पत्रम् | ५६ |
| पञ्चमः | संस्कृतसेवी दुर्गाप्रसाददवाडी | ६८ |
| षष्ठः | क्रोधस्य शमनम् | ८१ |
| सप्तमः | सेवामहिमा | ९६ |
| अष्टमः | स्वावलम्बनम् | ११३ |
| नवमः | सुन्दरो रारातडागः | १३४ |
| दशमः | वायुरक्षणम् | १४८ |
| एकादशः | नीतिवचनानि | १६५ |
| द्वादशः | अष्टावक्रः | १८३ |
| त्रयोदशः | विज्ञानमभिशापो वरदानं वा | २०० |

# परब्रह्मवन्दना

कारकं जगतो नौमि चालकं पालकं तथा ।
यद् विना सर्वब्रह्माण्डः शून्यतामेति सत्वरम् ॥१॥
सर्वव्यापक ! सर्वज्ञ ! सर्वशक्तिसमन्वित !
अतिसुन्दर ! देवेश ! नमस्ते जगदीश्वर ! ॥२॥
नमस्ते सते ते जगत्कारणाय
नमस्ते चिते सर्वलोकाश्रयाय ।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय
नमो ब्रह्मणे व्यापिने शाश्वताय ॥३॥
ब्रह्मा दक्षः कुबेरो यमवरुणमरुद्वह्निचन्द्रेन्द्ररुद्राः
शैला नद्यः समुद्रा ग्रहगणमनुजा दैत्यगन्धर्वनागाः ।
द्वीपा नक्षत्रतारा रविवसुमुनयो व्योम भूरश्विनौ च
संलीना यस्य सर्वे वपुषि स भगवान् पातु नो विश्वरूपः ॥४॥
भयानां भयं भीषणं भीषणानां
गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैः पदानां नियन्तृ त्वमेकं
परेषां परं रक्षणं रक्षणानाम् ॥५॥

१.
## अन्वयः

यद् विना सर्वब्रह्माण्डः सत्वरं शून्यतामेति (तम्) जगतः कारकं चालकं तथा पालकम् (ईश्वरम् अहम्) नौमि ।

**सरलार्थः**

ईश्वरः संसारस्य (जगतः) सृष्टिकर्ता वर्तते । स एव ईश्वरः संसारस्य सञ्चालकः, पालनकर्ता चास्ति । ईश्वरस्य अभावे अशेषोऽयं ब्रह्माण्डः शीघ्रमेव समाप्तो भवति । अहं तादृशम् ईश्वरं नमामि ।

२.

**अन्वयः**

(हे) सर्वव्यापक, सर्वज्ञ, सर्वशक्तिसमन्वित, अतिसुन्दर, देवेश, जगदीश्वर ! ते नमः (अस्तु) ।

**सरलार्थः**

हे जगदीश्वर ! त्वं सर्वत्र व्याप्तोऽसि । त्वं सर्वेषां विषयाणां ज्ञाता च असि । त्वं सर्वाभिः शक्तिभिः संयुक्तश्च असि । देवानां स्वामी त्वम् अतिशयेन सुन्दरश्च असि । एतादृशाय तुभ्यं नमो नमोऽस्तु ।

३.

**अन्वयः**

(हे प्रभो !) जगत्कारणाय ते सते (च) ते नमः (अस्तु), सर्वलोकाश्रयाय चिते (च) ते नमः (अस्तु), अद्वैततत्त्वाय मुक्तिप्रदाय (च ते) नमः (अस्तु), शाश्वताय व्यापिने ब्रह्मणे (च ते) नमः (अस्तु) ।

**सरलार्थः**

हे ईश्वर ! जगतः सृष्टेः कारणाय (सृष्टिकर्त्रे), सत्स्वरूपाय च तुभ्यं नमोऽस्तु । एवं सर्वेषां लोकानाम् आश्रयभूताय ज्ञानस्वरूपाय च तुभ्यं नमस्काराः सन्तु । पुनश्च अद्वैततत्त्वरूपाय मुक्तिप्रदाय च तुभ्यं नमो नमः । हे प्रभो ! त्वं नित्यं (शाश्वतं) सर्वव्यापकं च ब्रह्म असि । एतादृशाय तुभ्यं भूयो भूयो नमस्काराः सन्तु ।

४

**अन्वयः**

यस्य वपुषि ब्रह्मा दक्षः कुबेरो यमवरुणमरुद्वह्निचन्द्रेन्द्ररुद्राः शैला नद्यः समुद्रा ग्रहगणमनुजा

दैत्यगन्धर्वनागा द्वीपा नक्षत्रतारा रविवसुमुनयो व्योम भूरश्विनौ च सर्वे संलीनाः (सन्ति), स विश्वरूपो भगवान् नः पातु ।

**सरलार्थः**

यस्य शरीरे ब्रह्मा, दक्षः, कुबेरः, यमः, वरुणः, वायुः, अग्निः, चन्द्रः, इन्द्रः, शिवः, पर्वताः, नद्यः, समुद्राः, ग्रहाः, मनुष्याः, दैत्याः, गन्धर्वाः, नागाः, द्वीपाः, नक्षत्राणि, ताराः, सूर्यः, वसवः, मुनयः, आकाशः, पृथिवी, अश्विनीकुमारौ च सर्वे संलीना विद्यन्ते, स विश्वरूपः परमेश्वरः (भगवान्) अस्मान् रक्षतु ।

५.
**अन्वयः**

(हे परब्रह्मन् !) त्वमेकं भयानां भयम् (असि), भीषणानां भीषणम् (च त्वमेव असि), (त्वम्) प्राणिनां गतिः (असि), पावनानाम् (अपि) पावनम् (त्वमेव असि), (त्वम्) परेषां परम् (असि), रक्षणानाम् रक्षणम् (त्वमेव एकम् असि) ।

**सरलार्थः**

हे ब्रह्मस्वरूप भगवन् ! त्वं समेषां भयानां भयदाता असि, अर्थात् त्वं भयेभ्योऽपि भयं ददासि । त्वं भीषणानां कृते भयानकम् (भयङ्करम्/भयजनकम्) असि । त्वं प्राणिनां परमगतिस्वरूपम् असि । त्वं पवित्रवस्तूनामपि पवित्रीकारकम् असि । एवं त्वं सर्वोत्तमस्य पदस्य नियन्तृ (सारथिः) असि । एवमेव त्वं परेषामपि परम् असि । हे परब्रह्म ! रक्षकाणामपि रक्षकं च त्वमेव एकम् असि ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| कारकः | गर्ने वाला | सृष्टिकर्ता जगतः | संसारको, जगत्को |
| नौमि | नमस्कार गर्छु | चालकः | चलाउने वाला, सञ्चालन गर्ने |
| पालकः | पालनपोषण गर्ने वाला | सर्वब्रह्माण्डः | सम्पूर्ण ब्रह्माण्ड |
| शून्यता | शून्यपन, समाप्ति | एति | जान्छ, पुग्छ |

| | |
|---|---|
| सत्वरम् | चाँडो, उत्तिखेरै |
| सर्वज्ञः | सबै कुरा जान्ने, परमेश्वर |
| देवेशः | देवताहरूका स्वामी, परमेश्वर , महादेव |
| सते | सत्य स्वरूप भएकालाई, परमेश्वरलाई |
| मुक्तिप्रदाय | मुक्ति दिने वाला (परमेश्वर) लाई |
| व्यापिने | व्याप्त हुने वा चारैतिर फैलिनेलाई |
| शैलः | पर्वत, पहाड, ठुलो चट्टान |
| द्वीपः | टापु |
| व्योम | आकाश |
| संलीनः | समाहित |
| पातु | रक्षा गरून् |
| विश्वरूपः | विराट् स्वरूप भएका |
| भीषणम् | डरलाग्दो, भयङ्कर |
| महोच्चैः | सर्वोच्च, धेरै उचाइको |
| नियन्तृ | सारथि, शासक |
| रक्षण | रक्षा गर्नु, रक्षा गर्ने काम |

| | |
|---|---|
| शीघ्र सर्वव्यापकः | सबै ठाउँ ढाक्ने, सबै पदार्थमा रहने |
| सर्वशक्तिसमन्वितः | सबै शक्ति आफूमा भएका |
| जगदीश्वरः | परमेश्वर, सम्पूर्ण जगत्का ईश्वर |
| ते | तपाईँलाई, तिमीलाई |
| ब्रह्मणे | ब्रह्मलाई, परमेश्वरलाई |
| शाश्वताय | सधैँभरि एकनास रहिरहनेलाई |
| मनुजः | मानव, मानिस |
| मुनिः | ऋषि |
| भूः | पृथिवी |
| लुकेकोवपुषि | शरीरमा |
| नः | हामीलाई |
| भयम् | डर |
| पावनम् | पवित्र |
| पदम् | उपाधि |
| परम् | अलग, श्रेष्ठ, परब्रह्म |

# अभ्यासः

## श्रवणं भाषणञ्च

१. **श्रुतपूर्वमेकं सुभाषितं नीतिपद्यम् ईशवन्दनपद्यं वा कक्षायां संश्राव्य तस्य तात्पर्यमपि निगदत ।**

२. **शिक्षकमनुसृत्य पाठस्थश्लोकानां यति-गति-लयसंयोजनेन आदर्शवाचनं कुरुत ।**

३. **पाठस्थश्लोकेषु प्रयुक्तानामव्ययपदानां नामानि पृथक् पृथग् वदत ।**

४. **अधस्तनपदानामर्थं पाठाधारेण कथयत**

भीषणम्, पावनम्, नियन्तृ, मरुत्, व्योम, जगतः, पालकम्, सर्वब्रह्माण्डः, शून्यताम्, सत्वरम्, एति ।

५. **पाठस्य द्वितीयस्य श्लोकस्य सरलार्थं वदत ।**

६. **अधोलिखितं श्लोकं सखिमुखात् श्रुत्वा एकपदेन प्रश्नानामुत्तरं वदत**

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।

सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥

(क) अत्र 'स' इति पदेन को ज्ञायते ?

(ख) 'गुणाः' इति विशेष्यपदस्य विशेषणं किम् ?

(ग) स किमर्थं सेव्यो वर्तते ?

(घ) अक्षयपदेन को बुध्यते ?

(ङ) 'चामृताय' इत्यत्र द्वे पदे के ?

७. **पाठस्थं चतुर्थं पद्यं कण्ठस्थं श्रावयत ।**

## पठनम्

### १. अधोलिखितं श्लोकं पठित्वा प्रश्नानुत्तरयत

कृष्णाय वासुदेवाय हरये परमात्मने ।

प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥

(क) श्लोके कस्य स्तुतिर्विहिता वर्तते ?

(ख) गोविन्दः प्रणतस्य भक्तस्य किं नाशयति ?

(ग) श्लोके कृष्णस्य कति नामानि सन्ति ?

(घ) 'वासुदेवाय' इति पदे का विभक्तिः प्रयुक्ता विद्यते ?

(ङ) 'नमो नमः' इत्यत्र सन्धिविच्छेदं कुरुत ।

(च) 'नमः' इत्यस्य योगे का विभक्तिः प्रयोक्तव्या ?

(छ) 'नमः' इत्यव्ययपदस्य स्वशब्दैर्वाक्ये प्रयोगं दर्शयत ।

### २. अधस्तनमनुच्छेदं पठित्वा एकवाक्येन प्रश्नानुत्तरयत

गुरुः छात्रान् पृच्छति, "घटं को निर्माति ?" छात्रा उत्तरयन्ति, "घटं कुम्भकारो निर्माति ।" एवं क्रमेण वयं वक्तुं शक्नुमो यत्- कविः काव्यं रचयति, जननी सन्ततिं जनयति, कृषको धान्यमुत्पादयति, रथी रथं चालयति इति । यदि कोऽपि अस्मान् पृच्छेत्, "जगत् कः रचयति, चालयति, पालयति, नाशयति ?" तदा वयं विचारशीला भवामः । तस्योत्तरं सरलं न भवेत् । एतद् जगत् कार्यमस्ति । कार्यं कारणस्य परिणामो मन्यते । जगतः कारणं किमिति विषये विदुषां मतैक्यं न वर्तते । अत्र अस्माभिर्विचारणा कर्तव्या । मानवाः, अन्ये प्राणिनश्च जगत् निर्मातुं न क्षमाः । जगत् तेषां सृष्टिर्नास्ति प्रत्युत ते एव जगतः सृष्टिरूपा वर्तन्ते । अत एतत् स्पष्टं भवति यत्- जगतः कारणं परब्रह्म एव । परब्रह्म सर्वं स्रष्टुं शक्नोति परं न कोऽपि परब्रह्मणः सृष्ट्यै क्षमोऽस्ति । अत्र वादविवादो नोचित इति दार्शनिकानां सम्मतिर्वर्तते ।

(क) कः काव्यं रचयति ?

(ख) जगत् किमस्ति ?

(ग) के जगत् निर्मातुं क्षमा न सन्ति ?

(घ) जगतः कारणं किम् ?

(ङ) परब्रह्म किं स्रष्टुं शक्नोति ?

(च) कस्मिन् विषये वादविवाद उचितो न भवति ?

**३. श्लोकखण्डानां यथाक्रमं संयोजनेन पूर्णश्लोकं निर्माय पठत**

शुक्लाम्बरधरं देवम्, प्रसन्नवदनं ध्यायेत्, शशिवर्णं चतुर्भुजम्, सर्वविघ्नोपशान्तये ।

**४. अधस्तनं श्लोकं पठित्वा बादरायणस्य स्वरूपं वर्णयत**

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

**५. अधोलिखितानि वाक्यानि शुद्धं पठित्वा तदर्थमन्विषत**

(क) प्रज्ञानं ब्रह्म ।  (ख) प्रज्ञानेत्रो लोकः ।

(ग) विद्ययाऽमृतमश्नुते ।  (घ) ब्रह्म सत्यं जगन्मिथ्या ।

**६. अधस्तनं पद्यं प्रथमं सलयं तदनु मौनं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां
मेरुमृत्कणतां तृणं कुलिशतां वज्रं तृणप्रायताम् ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया
लीलादुर्ललिताद्भुतव्यसनिने देवाय तस्मै नमः ॥

**(अ) एकस्मिन् वाक्ये उत्तरं दत्त**

(क) कस्य इच्छया अम्भोधिः स्थलताम् आयातुं शक्नोति ?

(ख) देवेच्छया कः शैले परिवर्तते ?

(ग) हिमे दहनताम् आनेतुं कः क्षमः ?

(घ) तृणं कया कुलिशतां प्राप्नोति ?

(ङ) कस्मै नमोऽस्तु ?

(च) 'देवाय' इत्यस्य किं विशेषणं सर्वनामभिन्नं श्लोके प्रयुक्तम् ?

(अ) **श्लोकस्थप्रयोगाधारेण पर्यायपदे परस्परं मेलयत**

| | |
|---|---|
| कुलिशता | हिमता |
| शैलः | कणः |
| शीतलता | मेरुमृत् |
| अम्भोधिः | वज्रता |
| वह्निः | दहनः |
| धूलीलवः | जलधिः |

(इ) **कोशसाहाय्येन अधस्तनपदानामर्थं निर्दिशत**

अम्भोधिः, धूलीलवः, मेरुमृत्, स्थलम्, तृणम् ।

७. **पाठस्य पञ्चमं श्लोकं तत्सरलार्थञ्च पठित्वा ब्रह्मणो वैशिष्ट्यद्योतकानि त्रीणि वाक्यानि लिखत ।**

## लेखनम्

१. **पाठस्थश्लोकानभ्यासपुस्तिकायामनुलिखत ।**

२. **रिक्तस्थानं पूरयत**

(क) जगतः पालकं ...... वर्तते । (परब्रह्म/मानवः)

(ख) परब्रह्म .......... वर्तते । (स्थूलम्/सर्वव्यापकम्)

(ग) परब्रह्म जगत् ......... शक्नोति । (स्रष्टुम्/त्यक्तुम्)

(घ) परब्रह्मणोऽभावे जगत् ........ भवति । (शून्यं/सुखमयम्)

(ङ) ........... जगति सृष्टाः सन्ति । (प्राणिनः/परब्रह्मणः)

(च) जगदीश्वराय ....... । (वन्दे/नमः)

३. **पदानि प्रयुज्य वाक्यानि रचयत**

तृणम्, नमः, आयाति, शाश्वतम्, देवेश, विश्वरूपः, नौमि, चालकम्, विना, ब्रह्माण्डः, एति, सत्वरम्, देवेशः, नमस्ते, ब्रह्मणे, कणः, दहनता, शैलः, वह्निः ।

**४. शिक्षकसाहाय्येन अधस्तनयोः श्लोकयोरन्वयं कुरुत**

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तिमवैति नित्यं तद्ब्रह्म निष्कलमहं न च भूतसङ्घः ॥
सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥

**५. शिक्षकाद् यथावश्यकं साहाय्यमवाप्य अधस्तनयोः श्लोकयोः भावार्थं लिखत**

त्वमेकं शरण्यं त्वमेकं वरेण्यं त्वमेकं जगत्पालकं स्वप्रकाशम् ।
त्वमेकं जगत्कर्तृ पातृ प्रहर्तृ त्वमेकं परं निश्चलं निर्विकल्पम् ॥
वयं त्वां स्मरामो वयं त्वां भजामो वयं त्वां जगत्साक्षिरूपं नमामः ।
सदेकं निधानं निरालम्बमीशं भवाम्भोधिपोतं शरण्यं व्रजामः ॥

**६. पाठाधारेण प्रश्नानुत्तरयत**

(क) जगतः कारकं किमस्ति ?
(ख) जगतः पालनं केन विधीयते ?
(ग) केन विना सर्वब्रह्माण्डः शून्यतामेति ?
(घ) जगतश्चालनं केन विधीयते ?
(ङ) वयं कं नमस्कुर्मः ?
(च) सर्वव्यापकं किम् ?
(छ) विश्वरूपस्य भगवतो वपुषि के संलीनाः सन्ति ?
(ज) अद्वैततत्त्वं किम् ?
(झ) ब्रह्मदक्षादयः कुत्र संलीना विद्यन्ते ?
(ञ) ब्रह्म किम् ?

**५. प्रदत्तस्य पद्यस्य स्वशब्दैः सरलार्थं लिखत**

नित्यं स्मरामि गोपालं नित्यं नमामि शारदाम् ।
नित्यं नमोऽस्तु रुद्राय ब्रह्मणे तु प्रतिक्षणम् ॥

## अनुप्रयोगः

१. **अधस्तने श्लोके किं वर्णितमस्ति ? सखिभिः सह परस्परं विमृश्य सूत्राणि निर्मात**

मधुरं मधुरेभ्योऽपि मङ्गलेभ्योऽपि मङ्गलम् ।
पावनं पावनेभ्योऽपि हरेर्नामैव केवलम् ॥

२. **अधस्तनानि स्तुतिवाक्यानि कासां देवदेवीनां स्तुतये रचितानीति कोष्ठके सङ्केतयत**

(क) तस्मै यकाराय नमः शिवाय । ( )

(ख) गतिस्त्वं गतिस्त्वं त्वमेका भवानी । ( )

(ग) श्रीरामदूतं शरणं प्रपद्ये । ( )

(घ) श्रीराम राम शरणं भव राम राम । ( )

(ङ) कृष्णं वन्दे जगद्गुरुम् । ( )

३. **पाठमाधृत्य ब्रह्मणः स्वरूपविषये अनुच्छेदमेकं रचयत ।**

# व्याकरणबोधः

## शब्दरूपावली

१. **विद्वस्-शब्दस्य रूपावलिं पठत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीया | विद्वांसम् | विद्वांसौ | विदुषः |
| तृतीया | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| चतुर्थी | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| पञ्चमी | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| षष्ठी | विदुषः | विदुषोः | विदुषाम् |
| सप्तमी | विदुषि | विदुषोः | विद्वत्सु |
| सम्बोधनम् | हे विद्वन् ! | हे विद्वांसौ ! | हे विद्वांसः ! |

## २. कोष्ठस्थं सङ्केतमनुसृत्य विद्वस्-शब्दस्य समुचितरूपेण रिक्तस्थानं पूरयत

(क) कालीदासः महान् .......... आसीत् । (विद्वस्- प्रथमाविभक्तिः, एकवचनम्)

(ख) ........... पण्डिताश्च कथ्यन्ते । (प्रथमाविभक्तिः, बहुवचनम्)

(ग) ........... ! भवतः पूजनीयस्य गुरोर्नाम किम् ? (सम्बोधनस्य एकवचनम्)

(घ) अस्माभिः ........... सह सङ्गतिः कार्या । (तृतीयाविभक्तिः, बहुवचनम्)

(ङ) महते ........... भाष्कराचार्याय नमः । (चतुर्थीविभक्तिः, एकवचनम्)

(च) मया ........... गुरोः शिक्षा प्राप्ता । (पञ्चमीविभक्तिः, एकवचनम्)

(छ) शास्त्रार्थे प्रवर्तनं ........... नित्यकर्म भवति । (षष्ठीविभक्तिः, बहुवचनम्)

(ज) अविद्यो जनः ........... जनेषु हंसमध्ये वक इव भवति । (सप्तमीविभक्तिः, बहुवचनम्)

(झ) वयं ........... सदैव श्रद्धया व्यवहरामः । (द्वितीयाविभक्तिः, एकवचनम्)

(ञ) सिद्धान्तकौमुदी ........... भट्टोजिदीक्षितेन विचरिता । (तृतीयाविभक्तिः, एकवचनम्)

## ३. पदानि प्रयुज्य वाक्यानि रचयत

विद्वांसम्, विद्वांसः, विद्वद्भ्यः, विदुषि, विद्वान्, हे विद्वांसः, विदुषे ।

## ४. उदहरणमनुसृत्य पाठे प्रयुक्तानामधस्तनपदानां लिङ्गनिर्देशं कुरुत

**यथा-** विश्वरूपः - पुंलिङ्गं पदम्

शीतलताम् - स्त्रीलिङ्गं पदम्

एकम् - नपुंसकलिङ्गं पदम्

नियन्तृ, भगवान्, देवाय, मरुत्, व्योम, वसवः, अश्विनौ, भूः, दहनताम्, पालकम्, देवेश, यस्य, इच्छया, वह्निः, अद्वैततत्त्वम्, ब्रह्म, ब्रह्मणे, ब्रह्मा, रुद्रः, कणता, कारकम्, गतिः, प्राणिनाम् ।

# कोषानुशीलनम्

भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा। धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥
सर्वसहा वसुमती वसुधोर्वी वसुन्धरा। गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥
विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा। भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥
मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका। उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥
ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली। समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ॥
त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः ॥
देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः। प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ॥
आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः। नीवृज्जनपदो देशविषयौ तूपवर्तनम् ॥
त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि। कुमुद्वान्कुमुदप्राये वेतस्वान्बहुवेतसे ॥
शाद्वलः शादहरिते सजम्बाले तु पङ्किलः। जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः ॥
स्त्री शर्करा शर्करिलः शार्करः शर्करावति। देश एवादिमावेववमुन्नेयाः सिकतावति ॥
देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥
सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्यत्र राजवान्। गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ॥
पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान्। वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् ॥
अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥
अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि। व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥
अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे। प्रान्तरं दूरशून्योऽध्वा कान्तारं वर्त्म दुर्गमम् ॥
गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतम्। घण्टापथः संसरणं तत्पुरस्योपनिष्क्रम् ॥
द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी। दिवस्पृथिव्यौ गञ्जा तु रुमा स्याल्लवणाकरः ॥

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते।

**पृथिव्याः नामानि**

भूः २ भूमिः २ अचला २, अनन्ता २, रसा २, विश्वम्भरा २, स्थिरा २, धरा २, धरित्री २, धरणिः २, क्षोणिः २, ज्या २, काश्यपी २, क्षितिः २, सर्वंसहा २, वसुमती २, वसुधा २, उर्वी २, वसुन्धरा २, गोत्रा २, कुः २, पृथिवी २, पृथ्वी २, क्ष्मा २, अवनिः २, मेदिनी २, मही २, विपुला २, गह्वरी २, धात्री २, गौः २, इला २, कुम्भिनी २, क्षमा २, भूतधात्री २, रत्नगर्भा २, जगती २, सागराम्बरा २

**मृत्तिकायाः नामनी** – मृद् २, मृत्तिका २ ।

**प्रशस्ताया मृत्तिकायाः नामानि** – मृत्सा (२), मृत्स्ना (२), मृत्तिका (२)

**सर्वसस्याढ्याया भूमेः नाम** – उर्वरा (२)

**क्षारमृत्तिकायाः नामनी** – ऊषः (१), क्षारमृत्तिका (२)

**ऊषवत्या भूम्याः नामनी** – ऊषवान् (७), ऊषरः (७)

**स्थलस्य नामनी** – स्थलम् (३), स्थली (३)

**जलविहीनस्य देशस्य नामनी** – मरुः (१), धन्वा

**अप्रहतस्य नामनी** – खिलः (७), अप्रहतः (७) ।

**लोकस्य नामानि** – जगती (२), लोकः (१), विष्टपम् (३), भुवनम् (३), जगत् (३)

**भारतवर्षस्य नाम** – भारतम् (३)

**प्राच्यदेशस्य नाम** – प्राच्यः (१)

**उदीच्यः (१) एतदुदीच्यदेशस्य नाम** – उदीच्यः (१)

**म्लेच्छदेशस्य नामनी** – प्रत्यन्तः (१), म्लेच्छदेशः (१)

**मध्यदेशस्य नामनी** – मध्यदेशः (१), मध्यमः (१)

**आर्यावर्तस्य नामनी** – आर्यावर्तः (१), पुण्यभूमिः (२)

**जनपदस्य नामनी** – नीवृत् (१), जनपदः (१)

**देशस्य नामानि** – देशः (१), विषयः (१), उपवर्तनम् (३)

**नड्बलप्रायस्य स्थानस्य नामनी** – नड्वान् (१), नड्बल (१)

**कुमुदप्रायस्य नामनी** – कुमुद्वान् (७), कुमुदप्रायः (७)

**वेतस्वतः स्थानस्य नाम** – वेतस्वान् (७)

**शादहरितस्य स्थलस्य नाम** – शाबलः (७)

**सजम्बालस्य स्थलस्य नाम** – पङ्किलः (७)

**जलप्रायस्य स्थलस्य नामनी** – अनूपम् (७) कच्छः (७)

**शर्कराया नामनी** – शर्करा (२), शर्करिलः (७)

**शर्करायुक्तस्य सामान्यस्थलस्य नामनी** – शार्करः (७), शर्करावान् (७)

**सिकतिलस्य देशस्य नामनी** – सिकता (२), सिकतिलः (७)

**सिकतिलस्य देशस्य नामनी** – सैकतः (७), सिकतावान् (७)

**नद्यम्बुसम्पन्नव्रीहिपालितस्य देशस्य नाम** – नदीमातृकः (७)

**वृष्ट्यम्बुसम्पन्नव्रीहिपालितस्य देशस्य नाम** – देवमातृकः (७)

**सुराजशासितस्य देशस्य नाम** – राजन्वान् (७)

**सामान्यराजशासितस्य देशस्य नाम** – राजवान् (७)

**गोस्थानस्य नामनी** – गोष्ठम् (३), गोस्थानकम् (३)

**गैष्ठीनस्य नाम** – गौष्ठीनम् (३)

**समीपवर्तिस्थलस्य नामनी** – पर्यन्तभूः (२), परिसरः (१)

**सेतोः नामनी** – सेतुः (१), आलिः (२)

**वल्मीकस्य नामानि** – वामलूरः (१), नाकुः (१), वल्मीकम् (५)

**मार्गस्य नामानि** – अयनम् (३), वर्त्म (१), मार्गः (१), अध्वा (१), पन्थाः (१), पदवी (२), सृतिः (२), सरणिः (२), पद्धतिः (२), पद्या (२), वर्तनी (२), एकपदी (२)

**एतानि सत्पथस्य नामानि** – अतिपन्थाः (१), सुपन्थाः (१), सत्पथः

**कापथस्य नामानि** – व्यध्वः (१), दुरध्वः (१), विपथः (१), कदध्वा (१), कापथः (१)

**अपथस्य नामनी** – अपन्थाः (१), अपथः (१)

**चतुष्पथस्य नामनी** – शृङ्गाटकम् (३), चतुष्पथम् (३)

**दूरशून्यस्याध्वनो नाम** – प्रान्तरम् (३)

**दुर्गमस्य वर्त्मनो नाम** – कान्तारम् (५)

**क्रोशयुगस्य नाम** – गव्यूतिः (२)

**कष्कुचतुः शतस्य नाम** - नल्वः (१)

**मूलमार्गस्य नामनी** – घण्टापथः (१) संसरणम् (३) उपनिष्करम् (३)

**भूम्याकाशयोः नामानि–** द्यावापृथिव्यौ (२) रोदस्यौ (२) द्यावाभूमी (२) रोदसी (३) दिवस्पृथिव्यौ (२)

**लवणाकरस्य नामानि** – गञ्जा (२), रुमा (२), लवणाकरः (१)

## अभ्यासः

१. **पृथिव्याः सर्वाणि नामानि श्लोकानुसारेण श्रावयत ।**

२. **नेपालिभाषायामर्थं वदत**

गोत्रा, क्षारमृत्तिका, धन्वा, ऊषः आर्यावर्तः, पङ्किलः, खिलः, वामलूरः, गव्यूतिः, रुमा सैकतः ।

३. **अर्थानुसारेण परस्परं मेलयत**

| | |
|---|---|
| विपथः | सिकतावान् |
| नड्वान | व्यध्वः |
| सैकतः | नड्वलः |
| कुः | जनपदः |
| अप्रहतः | इला |
| निवृत् | खिलः |

४. **पर्यायशब्दान् लिखत**

ऊषः, क्षमा, ऊषरः, खिलः, मरुः, आलिः, अनूपम्, सिकतिलः

५. **अभ्यासपुस्तिकायां शुद्धं लिखत**

सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्यत्र राजवान् ।
गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ॥
पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान् ।
वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् ॥

६. **मार्गस्य सर्वाणि नामानि लिखत ।**

७. **संस्कृतेऽनुवादं कुरुत**

(क) म तामाकोसी नदीको किनारमा बस्न रुचाउँछु ।

(ख) नेपालमा नुनको खानी पत्ता लगाउन आवश्यक छ ।

(ग) खराब बाटामा हिँड्नु र खराब काम गर्नु भनेको एकै हो ।

(घ) म नेपाली माटोको पुजारी हुँ ।

(ङ) कृष्णगण्डकीमा पनि धेरै पुलहरू बने ।

# दयामूर्तिः सौभरिः



महर्षिः सौभरिर्दयामूर्तिरासीत् । स कालिन्द्यास्तटस्थस्य वृन्दावनस्य समीपे रमणकनामकेऽन्तरीपे निवसति स्म । पुरा कालिन्द्या जले निमज्ज्य स सहस्रशो वर्षाणि यावत्तपश्चचार । एकवारं धीवराणां समूहो मत्स्यग्रहणाय कालिन्द्यां प्रापत् । समूहस्थाः सर्वे नद्यां जालं प्राक्षिपन् । कस्यचिद् धीवरस्य जालं सौभरेरुपरि न्यपतत् । स धीवरो जालावकर्षणेऽक्षमोऽभवत् । महतो मत्स्यस्य जालबन्धाशङ्कयाऽन्येऽपि धीवरास्तस्य सहयोगाय तत्र प्रापन् । ते सर्वेऽपि महतौत्कण्ठ्येन सहैव जालावकर्षणायासमकुर्वन् । वारं वारमायासेन ते साफल्यमध्यगच्छन् । महता हर्षेण जालमवकर्षतां तेषां हर्षो जालान्तर्वर्तमानस्य महर्षेः सौभरेर्दर्शनसमकालमेव व्यपगतः । ते सौभरेः समीपे गत्वा क्षमामयाचन्त । सौभरिर्धीवरेषु कृपावान् सञ्जातः । स धीवरानात्मानं विक्रेतुं निरदिशत् । भीत्या बद्धाञ्जलयो धीवराः पौनःपुन्येन क्षमायै अन्वरुणन् परं सौभरेर्हठस्याग्रे ते विवशा अजायन्त । ते जालस्थं सौभरिं गृहीत्वा राज्ञः पार्श्वेऽगच्छन् । भीता धीवरा राजानं सर्वं वृत्तान्तमज्ञापयन् । धीवराणां भीतिं बुद्ध्वा सौभरिः स्वयमेवात्मानं

क्रेतुं राजानमन्वरुणत् । राजाप्यसमञ्जसो जातः । स महर्षेर्मूल्यं कथं निर्धारयेत् ? कुलगुरोः परामर्शानुसारेण स धीवरेभ्योऽनेकशो गा दत्त्वा सौभरिं जालमुक्तमकरोत्, यतो हि गवां शरीरे सर्वेषां देवानां निवासो भवति । राजा सौभरेराशयं ज्ञात्वा धीवरेभ्यो बहु धनं च प्रादात् । पूर्वं भीता धीवराः सौभरेर्दयावत्त्वं विलोक्यात्यन्तं हर्षान्विताः सन्तस्तं भृशं प्रणम्य ततो निरगच्छन् । सौभरिरपि राज्ञे आशीर्वादं प्रदाय पुनस्तपस्यायै कालिन्दीमगच्छत् ।

कदाचिन्महर्षिः सौभरिर्मत्स्यान् भक्षयन्तं गरुडं व्यलोकयत् । बुभुक्षितो गरुडः कालिन्द्यां वर्तमानान् मत्स्यान् यथातथं भक्षयन्नासीत् । गरुडस्यातङ्केन कालिन्द्याः सर्वेऽपि जलजन्तवो भीता आसन् । सौभरिर्गरुडं तथा न कर्तुमन्वरुणत् परं बुभुक्षान्धो गरुडदेवः सौभरेरनुरोधमप्यवगम्य मत्स्यक्षणरत एवाभवत् । महर्षिर्जलजन्तुषु कृपावान् सञ्जातः । स गरुडमुद्दिश्याकथयत्, "गरुड ! इतः परमत्रागत्य त्वं कानपि प्राणिनो भक्षयसि चेत् तत्समकालमेव तव देहावपातो भवति ।" महर्षेः शापवचनं श्रुत्वा भीतो गरुडस्ततः पलायत । तदनन्तरं च महर्षेः सौभरेर्भीत्या कोऽपि हिंस्रकः प्राणी तत्रागत्य जलजन्तून् भक्षयितुं नाशकत् । ततश्च कालिन्द्या जलजन्तवो हिंसाया मुक्तिं प्राप्य निर्भीकतया व्यचरन् ।

कालिन्द्या निकटस्थे कस्मिँश्चित् पर्वते सर्पाणां निवास आसीत् । गरुडस्यातङ्केन तेऽपि पीडिता आसन् । गरुडस्तान् यथातथं व्यापाद्य भक्षयति स्म । कदाचित् सर्पाणां सभाऽजायत । सभाया निर्णयानुसारेण सर्पा गरुडमन्वरुणन्, "भो गरुडदेव ! भवतः कार्येण वयं भीताः स्मः । भवानेवमेव अस्मान् व्यापादयति चेत् शीघ्रमेवास्माकं वंशविनाशो भविष्यति । तदनन्तरं च भवतो भोजनप्राप्तिरसम्भवा जायते । तेनास्माकं व्यापादनं त्यजतु भवान् । वयं प्रतिदिनं भवतो भोजनस्य व्यवस्थां कुर्मः । प्रतिदिनमेकः सर्पो भोजनं गृहीत्वा भवतः पार्श्वे आगच्छति ।" सर्पाणामनुरोधेन गरुडोऽपि प्रसन्नो जातः, यतो हि गरुडस्य श्रमं विनैव प्रतिदिनं भोजनस्य व्यवस्था जायमानाऽऽसीत् । गरुडस्य प्रसन्नतया प्रसन्नाः सर्पास्ततो न्यवर्तन्त । प्रतिज्ञानुसारेण सर्पाः प्रतिदिनं गरुडस्य भोजनव्यवस्थां कुर्वन्त आसन् । तस्मिन्नेव क्रमे कदाचित् गरुडस्य भोजनव्यवस्थायै कालियस्य वार आगतः । कालियो दर्पेण गरुडस्य भोजनं स्वयं भुक्त्वाऽतिष्ठत् । तज्ज्ञात्वा गरुडः कालियं हन्तुमागच्छत् । कालियस्ततः पलाय्य कालिन्दीं प्रापत् । सौभरिः कालियाय कालिन्द्यां शरणमदात् । सौभरेः शापस्य भीत्या गरुडस्तत्र गन्तुं नाशकत् । कालियोऽपि निर्भयः सन् सौभरेराश्रमं निकषा सपरिवारः स्थातुमारभत । यद्यपि कालियो दुष्ट आसीत् तथापि शरणं प्राप्तस्य मरणं न भवेदिति धिया सौभरिस्तस्मिन्नपि दयावान् सञ्जातः । पश्चात् कालिन्द्या जले विषोत्सर्जनाद् भगवान् कृष्णः कालियस्य दमनं व्यदधात् ।

कदाचित् कालिन्द्या जले तपश्चरन् सौभरिः समाधिविरतोऽभवत् । यदा स नेत्रे उन्मील्य इतस्ततोऽपश्यत् तदा स स्वाग्रे कञ्चित् मत्स्ययुग्ममपश्यत् । तत्र कश्चिन्मत्स्यः स्वप्रियया साकं जलक्रीडां कुर्वाण आसीत् । तद् दृष्ट्वा सौभरेर्मनस्यपि विवाहेच्छा समुद्भूता । 'कया साकं विवाहं करवाणि ?' इति ध्यानदृष्टया चिन्तयतस्तस्य मनसि राज्ञो मान्धातुः पञ्चाशत् कन्याः समागच्छन् । स तासामुद्धारस्य विचारेण जलाद् बहिर्निर्गत्य मान्धातुः प्रासादमगच्छत् । राजा सौभरिमातिथ्येन सत्कृत्यागमनकारणमपृच्छत् । सौभरिरकथयत्, "राजन् ! जले तपश्चरतो मम मनसि हठाद् विवाहेच्छा समुद्भूता । तव पञ्चाशत् कन्याः सन्ति । तास्वेकां कन्यां मह्यं देहि । अहं तया साकं विवाहसुखं भोक्तुमिच्छामि ।" सौभरेर्वचनेन विस्मितो राजाऽसमञ्जसः सञ्जातः । स आत्मनः सुकोमलासु पुत्रीषु काञ्चनापि तस्मै तपसा शुष्कदेहाय ऋषये दातुं नेच्छति स्म । स क्षणं विचार्याकथयत्, "महर्षे ! श्वो मम कन्यानां स्वयंवरकार्यक्रमो भविता । तत्र मम पञ्चाशत्सु कन्यासु या भवन्तं वरीता, तयैव सह भवतो विवाहो भविता ।" राज्ञो वचनश्रवणसमकालमेव महर्षिस्तदाशयं ज्ञातवान् । स व्यचारयत्, "राजा मह्यं कन्यां दातुं नेच्छति । अतः स्वयंवरस्य प्रसङ्गोऽनेन समुपस्थापितः । स्वयंवरे का मां वृणुयात् ? मम स्वरूपं दृष्ट्वा ता मम समीपे एव नागमिष्यन्ति । राजा दण्डभङ्गं विनैव सर्पं व्यापादयितुमिच्छति । मयाऽपि कश्चिदुपायस्तु करणीय एव । नोचेन्मम विवाह एव न भवति ।" एवं विचार्य योगबलेन महर्षिः सुरूपो युवा सञ्जातः ।

अन्येद्युः स्वयंवरकार्यक्रमः प्रारब्धोऽभवत् । अनेके राजकुमारास्तत्र सम्प्राप्ताः । महर्षिः सौभरिरपि राजकुमाराणां पङ्क्तौ अधिमञ्चमुपाविशत् । राज्ञः पञ्चाशत् कन्या वरचयनाय मञ्चमागच्छन् । महर्षिं सौभरिं दृष्ट्वा मुग्धास्ताः सर्वा अपि अहम्पूर्विकया सौभरेर्गले एव वरमालां न्यदधुः । तदनन्तरं विवशो राजा तासां सर्वासामपि कन्यानां पाणीन् सविधि सौभरिमग्राहयत् । सौभरिः पञ्चाशतमेव राजकन्याः पत्नीत्वेन गृहीत्वा स्वाश्रमं प्रत्यागच्छत् । स तासां सर्वासां कृते प्रासादं निर्मातुं विश्वकर्माणमादिशत् । देवोऽपि विश्वकर्मा ऋषेराज्ञामुल्लङ्घयितुं कथं शक्नुयात् ? स महर्षिं प्रणम्य पञ्चाशत्सङ्ख्यकानेव प्रासादान् निरमात् । कतिचिद् वर्षाणि ताभिः साकं विवाहसुखमुपभुज्य महर्षिः सांसारिकसुखाद् विरक्तोऽभवत् । स सर्वाभ्योऽपि स्वपत्नीभ्यो ब्रह्मज्ञानं प्रदाय ताः परमपदस्य मार्गं प्रदर्श्य पुनस्तपसे कालिन्दीं प्राविशत् । महर्षेः सौभरेः सङ्गेन तासां पञ्चाशत्सङ्ख्यकानां राजकन्यानामुद्धारो जातः । प्रायेण साधव आत्मनश्च्युत्याऽपि परेषामुपकारं कुर्वन्ति ।

## शब्दार्थाः

| | |
|---|---|
| कालिन्द्याः | यमुना नदीको |
| अन्तरीपे | टापुमा |
| चचार | गरे |
| धीवराणाम् | माझीहरूको |
| अवकर्षणे | बलपूर्वक तान्नु |
| औत्कण्ठ्येन | उत्सुकताले |
| आयासेन | प्रयासले |
| पौनःपुन्येन | फेरि फेरि |
| अन्वरुणत् | अनुरोध गरे |
| असमञ्जसः | के गर्ने भन्ने निर्णय लिन नसकेको व्यक्ति |
| भृशम् | बारम्बार |
| यथातथम् | जसरी मन लाग्यो त्यसरी |
| अवगम्य | अवहेलना गरेर |
| पलायत | भागे |
| व्यापाद्य | मारेर |
| न्यवर्तन्त | फर्किए |
| दर्पेण | घमण्डले |
| निकषा | नजिक |
| धिया | विचारले |
| व्यदधात् | गरे |
| उन्मील्य | उघारेर |
| हठात् | एक्कासि |
| मुग्धाः | मोहित भएका |
| अहम्पूर्विकया | 'पहिला म गर्छु' भन्दै |
| न्यदधुः | राखे/लगाइदिए |
| च्युत्या | पतनद्वारा |

# अभ्यासः

## श्रवणं भाषणञ्च

१. **शिक्षकात् पाठस्य प्रथममनुच्छेदं श्रुत्वा अनुवाचयत ।**

२. **पाठस्य द्वितीयमनुच्छेदं सख्युर्मुखात् श्रुत्वा सख्युर्वाचनस्य गुणदोषौ कथयत ।**

३. **स्वयमुच्चार्य सामूहिकरूपेणोच्चारयितुं सखीन् निर्दिशत**

कालिन्द्याः, जालावकर्षणे, साफल्यम्, जालान्तर्वर्तमानस्य, बद्धाञ्जलयः, अन्वरुणत्, बुभुक्षान्धः, कस्मिँश्चित्, प्रतिज्ञानुसारेण, विषोत्सर्जनात्, जलक्रीडा, मान्धातुः, भोक्तुम्, दण्डभङ्गम्, अधिमञ्चम्, प्रत्यागच्छत् ।

४. **शिक्षकात् श्रुत्वा प्रदत्तानां पदानां शुद्धतयाऽनुवाचनं कुरुत**

मत्स्यग्रहणाय, जालबन्धाशङ्कया, विक्रेतुम्, पौनःपुन्येन, दयावत्त्वम्, जलजन्तून्, भोजनप्राप्तिः, भुक्त्वा, उन्मील्य, समुद्भूता, स्वयंवरकार्यक्रमः, वचनश्रवणसमकालम्, अन्येद्युः, अहम्पूर्विकया, पञ्चाशत्सङ्ख्यकान् ।

५. **पाठं श्रुत्वा स्वभाषया पाठस्थां कथां कक्षायां श्रावयत ।**

६. **पाठस्य तृतीयमनुच्छेदं श्रुत्वा सर्पाणां गरुडस्य च सम्बन्धस्य विषये परस्परं विमृशत ।**

७. **पाठस्य चतुर्थमनुच्छेदं श्रुत्वा अधस्तनानां प्रश्नानामुत्तराणि वदत**

(क) महर्षिः सौभरिः कुत्रोपाविशत् ?

(ख) राजकन्याः कथं सौभरेर्गले वरमालां निधापितवत्यः ?

(ग) क ऋषेराज्ञामुल्लङ्घयितुमसमर्थ आसीत् ?

(घ) विश्वकर्मा कति प्रासादान् निरमात् ?

(ङ) महर्षेः सौभरेः सङ्गेन कासामुद्धारो जातः ?

**८. अधस्तनान् श्लोकान् सलयमुच्चार्य शिक्षकस्य साहाय्येन तदर्थं च कथयत**

जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ।
सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ॥
स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसन्मतः ।
वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ॥
साधयिष्ये तथाऽऽत्मानं सुरस्त्रीणामपीप्सितम् ।
किं पुनर्मनुजेन्द्राणामिति व्यवसितः प्रभुः ॥
मुनिः प्रवेशितः क्षत्रा कन्यान्तःपुरमृद्धिमत् ।
वृतः स राजकन्याभिरेकः पञ्चाशता वरः ॥

**९. पाठस्यान्तिमस्यानुच्छेदस्य नेपाल्यामर्थं श्रावयत ।**

**१०. पाठमाधृत्य अधस्तनानां प्रश्नानामुत्तराणि कथयत**

(क) सौभरिः कुत्र निवसति स्म ?

(ख) धीवरा जालस्थं सौभरिं गृहीत्वा कुत्रागच्छन् ?

(ग) कः कालिन्द्यां वर्तमानान् मत्स्यान् यथातथं भक्षयन्नासीत् ?

(घ) कालियः पलाय्य कुत्र प्रापत् ?

(ङ) राज्ञो मान्धातुः कति कन्या आसन् ?

(च) राजा किमर्थं काममपि कन्यां सौभरये दातुं नेच्छति स्म ?

(छ) सौभरिः सर्वाभ्योऽपि स्वपत्नीभ्यः किं प्रादात् ?

## पठनम्

**१. पाठस्य अनुच्छेदान् क्रमेण सस्वरं वाचयत ।**

**२. पाठस्य मौनपठनं विधाय पाठगतानामबुद्धार्थानां पदानां चिह्नाङ्कनं कृत्वा तदर्थान् शिक्षकं पृच्छत ।**

**३. पाठस्य चतुर्थस्यानुच्छेदस्य वारं वारं द्रुतपठनं कृत्वा पठनगतेर्वर्धनाभ्यासं कुरुत ।**

**४. अधस्तनस्य पाठगतानुच्छेदस्य सन्धिस्थलानां सन्धिं विच्छिद्य पठनं विधत्त**

कदाचित् महर्षिः सौभरिर्मत्स्यान् भक्षयन्तं गरुडं व्यलोकयत् । बुभुक्षितो गरुडः कालिन्द्यां वर्तमानान् मत्स्यान् यथातथं भक्षयन्नासीत् । गरुडदेवस्यातङ्केन कालिन्द्याः सर्वेऽपि जलजन्तवो भीता आसन् । सौभरिर्गरुडं तथा न कर्तुमन्वरुणत् परं बुभुक्षान्धो गरुडदेवः सौभरेरनुरोधमप्यवगम्य मत्स्यभक्षणरत एवाभवत् । महर्षिर्जलजन्तुषु कृपावान् सञ्जातः । स गरुडमुद्दिश्याकथयत्, “गरुड ! इतः परमत्रागत्य त्वं कानपि प्राणिनो भक्षयसि चेत् तत्समकालमेव तव देहावपातो भवति ।” महर्षेः शापवचनं श्रुत्वा भीतो गरुडस्ततः पलायत । तदनन्तरं च महर्षेः सौभरेर्भीत्या कोऽपि हिंस्रकः प्राणी तत्रागत्य जलजन्तून् भक्षयितुं नाशकन् । ततश्च कालिन्द्या जलजन्तवो हिंसाया मुक्तिं प्राप्य निर्भीकतया व्यचरन् ।

**५. पाठस्य प्रथममनुच्छेदं पठित्वा प्रदत्तानां प्रश्नानामुत्तराणि दत्त**

(क) सौभरिः कुत्र निमज्ज्य सहस्रशो वर्षाणि यावत् तपश्चचार ?

(ख) सौभरेरुपरि किं न्यपतत् ?

(ग) किमर्थमन्येऽपि धीवराः प्रथमधीवरस्य सहयोगाय तत्र प्रापन् ?

(घ) महता हर्षेण जालमवकर्षतां धीवराणां हर्षः कदा व्यपगतः ?

(ङ) राजा कथं सौभरिं जालमुक्तमकरोत् ?

**६. पाठस्य प्रथमानुच्छेदमेव पुनः पठित्वा रिक्तस्थानं पूरयत**

(क) सौभरिः ........ कृपावान् सञ्जातः ।

(ख) भीत्या बद्धाञ्जलयो धीवराः ........... क्षमायै अन्वरुणन् ।

(ग) गवां शरीरे ............ निवासो भवति ।

(घ) राजा .......... ज्ञात्वा धीवरेभ्यो बहु धनं च प्रादात् ।

(ङ) सौभरिरपि राज्ञे आशीर्वादं प्रदाय पुनस्तपस्यायै ........... अगच्छत् ।

**७. पाठस्य द्वितीयानुच्छेदस्य मौनपठनं कृत्वा सौभरेर्गरुडशापप्रसङ्गं स्वभाषया वर्णयत ।**

**८. अनुच्छेदं पठित्वा प्रदत्तकार्याणि कुरुत**

पुरुवंशे समुत्पन्नः शिबिः परोपकारी धार्मिकश्च राजाऽऽसीत् । तस्य पार्श्वे आगतः कोऽपि याचको रिक्तहस्तो न प्रत्यावर्तते स्म । तस्य धनं परोपकारायासीत्, शक्तिश्चार्तानां संरक्षणायासीत् । अजातशत्रोस्तस्य प्रजाः सन्तुष्टाः सुखिनश्चासन् । त्यागबुद्धेः कारणेन सुविख्यातः शिबिः प्रायेण भगवदाराधनयैव समयं यापयति स्म । कदाचिदेक आहतः कपोत उड्डीयमान आगत्य शिबेरङ्के निपत्य स्वस्य रक्षार्थं तमन्वरुणत् । 'कुत आगतोऽयं कपोतः' इति चिन्तयतो राज्ञोऽग्रे पुनरेकः श्येन आगच्छत् । श्येनः स्वभोजनं मत्वा राजानं कपोतमयाचत । राजा कपोतं शरणागतं मत्वा श्येनाय कपोतदाने स्वस्य धर्मवैपरीत्यं प्रादर्शयत् । ततः श्येनोऽकथयत्, "राजन् ! बुभुक्षितस्य प्राणिनो भोजनस्यापहरणं कुर्वन् भवान् कीदृशो धार्मिको वर्तते ? किं बुभुक्षितस्य बुभुक्षाशमनं भवतो धर्मो नास्ति ?" शिबिरकथयत्, "श्येन ! भवानतिथित्वेन मत्सकाशमागतो वर्तते । अतो भवतो बुभुक्षाशमनमपि मम कर्तव्यमस्ति । शरणागतस्य रक्षणमपि मम कर्तव्यमस्ति । अतो भवान् मम मांसं गृहीत्वा कपोतं त्यजतु ।" राज्ञो वचनेन सन्तुष्टः श्येनः कपोतमांसतुल्यमेव स्वमांसं दातुं राजानमन्वरुणत् । राजाऽपि तुलामानीय एकत्र कपोतं स्थापयित्वा अपरत्र स्वमांसं स्थापयितुमारभत । राजा स्वशरीरकर्तनं कृत्वा बहु मांसं तुलायामस्थापयत् परं कथमपि तन्मांसं कपोतेन तुल्यं नाभवत् । अन्त्ये राजा स्वस्य समग्रमपि शरीरं तुलायामस्थापयत् । तद् दृष्ट्वा तत्र श्येन इन्द्रदेवरूपेण प्रकटितोऽभवत्, कपोतश्चाग्निदेवरूपेण प्रकटितोऽभवत् । राज्ञः शरीरं च पुनर्निर्व्रणजायत । शिबेस्त्यागबुद्धेः स्थायित्वं परीक्षितुं तौ देवौ श्येनकपोतयोः स्वरूपेण तत्रागतौ आस्ताम् । शिबेस्त्यागबुद्धेः स्थायित्वं विलोक्य नितरां प्रसन्नौ तौ शिबेः प्रशंसां कृत्वा तमाशीर्भिर्नियोज्य च देवलोकमगच्छताम् ।

**(क) परस्परं मेलयत**

| | |
|---|---|
| शिबिः | इन्द्रदेवः |
| कपोतः | आर्तसंरक्षणाय |
| श्येनः | परोपकाराय |
| धनम् | धार्मिको राजा |
| शक्तिः | अग्निदेवः |

**(ख) अधस्तनान् प्रश्नानुत्तरयत**

(अ) शिबिः कस्मिन् वंशे समुत्पन्न आसीत् ?

(आ) शिबेः प्रजाः कीदृश्य आसन् ?

(इ) शिबेरङ्के को निपतितः ?

(ई) श्येनः किमर्थं कपोतमयाचत ?

(उ) कोऽतिथित्वेन राजसकाशमागतो वर्तते ?

(ऊ) राजा कपोतरक्षणार्थं श्येनाय किं दातुमैच्छत् ?

(ए) श्येनः राज्ञः कियन्मांसमयाचत ?

(ऐ) अन्त्ये राजा तुलायां किमस्थापयत् ?

(ओ) किं परीक्षितुं देवौ श्येनकपोतयोः स्वरूपेण तत्रागतौ आस्ताम् ?

**(ग) शिबेस्त्यागबुद्धेर्वैशिष्ट्यं प्रवर्ण्य स्वभाषया पञ्च वाक्यानि लिखत ।**

**९. अधस्तनानि पद्यानि पठित्वा शिक्षकसाहाय्येन तदर्थं च बुद्ध्वा सौभरेर्गृहस्थजीवनं स्वभाषया वर्णयत**

स बह्वृचस्ताभिरपारणीयतपःश्रियानर्घ्यपरिच्छदेषु ।
गृहेषु नानोपवनामलाम्भःसरःसु सौगन्धिककाननेषु ॥
महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ।
स्वलङ्कृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजभृङ्गवन्दिषु ॥
यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ।
विस्मितः स्तम्भमजहात्सार्वभौमश्रियान्वितम् ॥

**१०. पाठं सम्यक् पठित्वा अधोलिखितान् प्रश्नानुत्तरयत**

(क) धीवराणां समूहः केन कारणेन कालिन्द्यां प्रापत् ?

(ख) पूर्वं भीता धीवराः किमर्थं हर्षान्विता अभवन् ?

(ग) सौभरिशापानुसारेण कदा गरुडस्य देहावपातो भवति ?

(घ) सर्पाणां निवासः कुत्र आसीत् ?

(ङ) सर्पाणामनुरोधेन गरुडः किमर्थं प्रसन्नो जातः ?

(च) सौभरिः कालियाय कुत्र शरणमदात् ?

(छ) समाधिविरतः सौभरिः नेत्रोन्मीलने किमपश्यत् ?

(ज) विवाहार्थं जलाद् बहिर्निर्गत्य सौभरिः कुत्रागच्छत् ?

(झ) सौभरेर्विचारे राजा किं कर्तुमिच्छति ?

(ञ) सौभरिः पत्नीनां कृते प्रासादं निर्मातुं कमादिशत् ?

११. **अधोलिखितौ श्लोकौ पठित्वा प्रश्नानुत्तरयत**

कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥
सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।
शुकोऽप्यशनमाप्नोति राम रामेति च ब्रुवन् ॥

(क) कन्या किं वरयते ?

(ख) कः श्रुतमिच्छति ?

(ग) इतरे जनाः किमभिलषन्ति ?

(घ) जनानां चिन्ता कुत्र भवति ?

(ङ) वराकोदरपूरणस्य चिन्तां का नाशयति ?

(च) शुकः किं ब्रुवन्नशनमाप्नोति ?

## लेखनम्

१. **अधस्तनानां पदानामभ्यासपुस्तिकायां पुनर्लेखनं कुरुत**

दयामूर्तिः, कालिन्द्याः, तटस्थस्य, मत्स्यग्रहणाय, न्यपतत्, जालबन्धाशङ्कया, जालावकर्षणायासम्, कृपावान्, क्षमायै, वृत्तान्तम्, अन्वरुणत्, शरीरे, देवानाम्, प्रणम्य,

सञ्जातः, देहावपातः, मुक्तिम्, आतङ्केन, कदाचित्, वंशविनाशः, व्यवस्थाम्, भुक्त्वा, मत्स्ययुग्मम्, भोजनप्राप्तिः, मान्धातुः, आतिथ्येन, कन्याः, असमञ्जसः, आत्मनः, भवन्तम्, स्वयंवरस्य, ज्ञातवान्, सम्प्राप्ताः, सविधि, शक्नुयात्, उपभुज्य ।

## २. अधस्तनानि पदानि शुद्धानि कृत्वा लिखत

महर्षीः, शहस्रशः, धिवराणाम्, जालाबकर्षणे, हर्षेन, भित्या, परामर्षानुसारेण, तपश्यायै, उद्दीश्य, शापबचनम्, कस्मिँश्चीत्, नीर्णयानुसारेण, ध्यानद्रिष्ट्या, बारः, बिषोत्सर्जनाद्, समाधीविरतः, विबाहेच्छा, पञ्चासत्, शूष्कदेहाय, समिपे, समुपस्थापीतः, व्यापादइतुम्, सुरुपः, पङ्तौ, बिश्वकर्मा, श्वपत्नीभ्यः ।

## ३. अधस्तनानां पदानां पाठानुकूलमर्थं लिखत

अन्तरीपे, प्राक्षिपन्, अध्यगच्छन्, व्यपगतः, अजायन्त, गृहीत्वा, असमञ्जसः, कथम्, विलोक्य, अवगम्य, व्यापाद्य, न्यवर्तन्त, पलाय्य, निकषा, धिया, व्यदधात्, साकम्, करवाणि, भविता, अन्येद्युः, अधिमञ्चम्, अहम्पूर्विकया, पत्नीत्वेन, प्रत्यागच्छत्, विरक्तः, प्राविशत् ।

## ४. अधस्तनानां पदानां प्रयोगेण प्रतिपदमेकं मौलिकं वाक्यं रचयत

समीपे, निमज्ज्य, यावत्, कस्यचित्, साफल्यम्, गत्वा, विक्रेतुम्, पार्श्वे, दत्त्वा, प्रादात्, कदाचित्, बुभुक्षितः, हिंस्रकः, प्राप्य, त्यजतु, प्रसन्नः, प्रतिदिनम्, शरणम्, उन्मील्य, कुर्वाणः, हठात्, मह्यम्, श्वः, दातुम्, करणीयः, नोचेत्, दृष्ट्वा, निर्मातुम्, प्रदाय, सङ्गेन ।

## ५. पाठस्य चतुर्थस्यानुच्छेदस्य श्रुतलेखनं कुरुत ।

## ६. पाठस्य द्वितीयानुच्छेदसम्बद्धानधस्तनान् प्रश्नानुत्तरयत

(क) सौभरिः कीदृशं गरुडं व्यलोकयत् ?

(ख) सौभरिः केषु दयावान् सञ्जातः ?

(ग) गरुडः किमर्थं पलायत ?

(घ) कालिन्द्या जलजन्तवः कथं निर्भीका अभवन् ?

## ७. कथायास्तृतीयमनुच्छेदमाधृत्य रिक्तस्थानं पूरयत

(क) ........... आतङ्केन सर्पाः पीडिता आसन् ।

(ख) कदाचित् .......... सभाऽजायत ।

(ग) सर्पाणामनुरोधेन ......... प्रसन्नो जातः ।

(घ) गरुडः ........ हन्तुमागच्छत् ।

(ङ) ........ कालियस्य दमनं व्यदधात् ।

## ८. परस्परं मेलयत

| | |
|---|---|
| सौभरिः | भगवान् |
| मान्धाता | मत्स्यभक्षकः |
| गरुडः | महर्षिः |
| कालियः | राजा |
| कृष्णः | विषोत्सर्जकः |

## ९. पूर्णवाक्येन उत्तरयत

(क) सौभरिर्धीवरान् किं कर्तुं निरदिशत् ?

(ख) कालिन्द्या जलजन्तवः केन भीता आसन् ?

(ग) किमर्थं कालिन्द्यामागत्य हिंस्रका जलजन्तून् भक्षयितुं नाशकन् ?

(घ) सर्पाणां कथनानुसारेण कथं तेषां वंशविनाशो भविष्यति ?

(ङ) को दर्पेण गरुडस्य भोजनं स्वयं भुक्त्वाऽतिष्ठत् ?

(च) दुष्टेऽपि कालिये सौभरिः किमर्थं दयावान् सञ्जातः ?

(छ) किं दृष्ट्वा सौभरेर्मनसि विवाहेच्छा समुद्भूता ?

(ज) किमर्थं राज्ञा स्वयंवरस्य प्रसङ्गः समुपस्थापितः ?

(झ) कथं राज्ञः पञ्चाशदेव कन्याः सौभरेर्गले एव वरमालां निधापितवत्यः ?

(ञ) सौभरिः किं कृत्वा पुनस्तपसे कालिन्दीं प्राविशत् ?

**१०. सौभरेः कथायाः सन्देशः कः ? पञ्चभिर्वाक्यैर्लिखत ।**

**११. 'दण्डभङ्गं विनैव सर्पव्यापादनम्' इत्यस्याः किंवदन्त्याः मौलिकानि पञ्चोदाहरणानि लिखत ।**

**१२. सौभरेश्चरितस्यानुकरणीयपक्षान् सङ्केत्य तच्चरितचित्रणं कृत्वा एकमनुच्छेदं लिखत ।**

**१३. कथायां स्वयंवरप्रथायाः सङ्केतो विद्यते । शिक्षकस्य साहाय्येन स्वयंवरप्रथाया विषये ज्ञात्वा तस्याः प्रथायाः अनुकूलपक्षाणां प्रतिकूलपक्षाणां च पृथक् सूचीं निर्मात ।**

**१४. पाठमाधृत्य सत्यासत्यविवेकं कुरुत**

(क) धीवराणां समूहो जलक्रीडायै कालिन्द्यां प्रापत् ।

(ख) राजा धीवरेभ्योऽनेकशो गा दत्त्वा सौभरिं जालमुक्तमकरोत् ।

(ग) गवां शरीरे पिशाचानां निवासो भवति ।

(घ) कालियो विनयेन गरुडस्य भोजनं स्वयं भुक्त्वाऽतिष्ठत् ।

(ङ) मान्धातुर्मनसि विवाहेच्छा समुद्भूता ।

(च) राजा सौभरये कन्यां दातुं नेच्छति ।

(छ) राज्ञः पञ्चाशदेव कन्याः सौभरेर्गले वरमालां निधापितवत्यः ।

(ज) विश्वकर्मा ऋषेराज्ञामुल्लङ्घयितुं शक्नोति ।

(झ) सौभरेः सङ्गेन राजकन्यानामुद्धारो जातः ।

**१५. पाठात् कोष्ठस्थपदानां पर्यायपदानि सङ्कलय्य लिखत**

निकटे, नाविकाः, त्रस्ताः, नत्वा, खादितुम्, कर्मणा, हृष्टाः, श्रापस्य, उदके, नयने, मीनमिथुनम्, कुर्वन्, नृपस्य, अकस्माद्, परिणयः, तरुणः, अपरेद्युः, हर्म्यम्, पन्थानम् ।

**१६. अधस्तनं पद्यं पठित्वा तस्य सरलार्थं कथयत**

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।

तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥

**१७. अधस्तनं गद्यं पठित्वा निर्दिष्टानि कार्याणि कुरुत**

ब्रह्मणो मानसपुत्रस्य भृगोः पुत्रोऽथर्वाऽथर्ववेदस्य मन्त्राणां द्रष्टाऽऽसीत् । तस्य विवाहः कर्दमपुत्र्या क्षित्या सहाभवत् । ताभ्यां दम्पतिभ्यां दधीचेर्जन्माभवत् । वैदिकवाङ्मयेषु पुराणेषु च दधीचेर्दानशीलताया वर्णनमाधिक्येन प्राप्यते । दधीचेराश्रमो वर्तमानस्य दैलेखमण्डलस्य डुङ्गेश्वरस्थाने आसीदिति प्रसिद्धिरस्ति । दधीचेर्विवाहः स्वरचया सह सञ्जात आसीत् । ताभ्यां पिप्पलादनामक एकः पुत्रो जात आसीत् । कदाचिद् ब्रह्माण्डे आसुर्याः शक्तेः प्रभाव आधिक्येनाजायत । वृत्रासुरस्तदानीं दैत्यानामधिप आसीत् । त्वष्ट्रा यज्ञादुत्पादितः पुत्रो वृत्रोऽत्यन्तं बलवानासीत् । युद्धे तस्याग्रे स्थातुं देवा नाशक्नुवन् । अतस्ते स्वर्गाद् विच्युता अभवन् । ततः स्वर्गे मर्त्ये पाताले चासुराणामेव शासनमजायत । वनेषु विचर्य समयं यापयतां देवानां पार्श्वे वृत्रहननायावश्यकं बलवदस्त्रादिकं किमपि नासीत् । ब्रह्मणः परामर्शमनुसृत्य देवाः कदाचिद् दधीचिं निकषा प्रापन् । तेऽकथयन्, "ऋषे ! अधुना त्रिष्वेव लोकेषु असुराणां शासनं वर्तते । वयं देवा वनेषु विचरन्तः स्मः । असुराधिपस्य वृत्रस्य हननेन विना पुनर्देवानां शासनं स्थापितं भवितुं न शक्नोति । परं वृत्रस्य हननायावश्यकं बलवदस्त्रं अस्माकं पार्श्वे नास्ति । यदि भवानस्मभ्यं भवद्देहस्यास्थीनि ददाति, तर्हि वयं तेषां वज्रं निर्माय तेनैव वज्रेण वृत्रस्य हननं कुर्मः ।" देवानां वचनं श्रुत्वा दधीचिरकथयत्, "भो देवाः ! यदि मम नाशवतः शरीरस्यास्थीनां प्रयोगेण भवतां कार्यं सफलं भवति, यदि च पुनर्ब्रह्माण्डे दैव्याः शक्त्याः स्थापनं भवति तर्हि अहमवश्यमेव स्वास्थीनि ददामि, यतो हि जातस्य देहस्य मृत्युस्तु ध्रुवो भवति । प्रायेण सर्वाण्यपि नाशवन्ति वस्तूनि तथैव विनष्टानि जायन्ते । मम शरीरं समग्रस्यापि ब्रह्माण्डस्य कल्याणाय प्रयुक्तं भविष्यति चेदस्य शरीरस्य प्रदानाय किं कष्टम् ? अहमवश्यमेव ददामि ।" एवमुक्त्वा दधीचिः प्राणायामेन सद्यः प्राणान् मुमोच । देवास्तदस्थीनि सङ्गृह्य विश्वकर्मणे ददुः । विश्वकर्मा च तैरेकं वज्रं निर्माय देवराजाय प्रायच्छत् । तस्यैव वज्रस्य प्रयोगेण देवराजो वृत्रं जघान । महर्षेर्दधीचेर्दानशीलतायाः कारणेन विश्वस्मिन् ब्रह्माण्डे पुनर्दैव्याः शक्त्याः स्थापनमजायत । अतो दधीचेर्नाम अद्यापि महादानित्वेन सादरं गृह्यते । यतो हि परेषां कल्याणाय स्वप्राणानामेव दानं दधीचिमन्तरा कः कर्तुं शक्नोति ?

**(क) परस्परं मेलयत**

| | |
|---|---|
| अथर्वा | दधीचेः पुत्रः |
| दधीचिः | अथर्वणः पत्नी |
| पिप्पलादः | पिप्पलादस्य जननी |
| क्षितिः | दधीचेः पिता |
| स्वरचा | भृगोः पौत्रः |
| कर्दमः | इन्द्रारिः |
| ब्रह्मा | अथर्वणः पिता |
| त्वष्टा | क्षितेः पिता |
| इन्द्रः | भृगोः पिता |
| वृत्रः | वृत्रस्य पिता |
| विश्वकर्मा | देवराजः |
| भृगुः | वज्रनिर्माता |

**(ख) एकपदेनोत्तरयत**

(अ) भृगुः कस्य पुत्र आसीत् ?

(आ) दधीचेः पत्नी का ?

(इ) तदानीं दैत्याधिपः क आसीत् ?

(ई) दधीचिः केन सद्यः प्राणान् मुमोच ?

(उ) कस्य नाम महादानित्वेन सादरं गृह्यते ?

**(ग) पूर्णेनैकेन वाक्येन उत्तरं लिखत**

(अ) दधीचेर्मातापितरौ कौ आस्ताम् ?

(आ) वृत्रः केन कथमुत्पादित आसीत् ?

(इ) दधीचेराश्रमः कुत्र आसीदिति प्रसिद्धिर्वर्तते ?

(ई) कस्य ध्रुवो मृत्युर्भवति ?

(उ) कस्य कारणेन विश्वस्मिन् ब्रह्माण्डे पुनर्दैव्याः शक्त्याः स्थापनमजायत ?

**(घ) दधीचिः कथं महादानी सञ्जातः ? स्वभाषया लिखत ।**

१८. **तपस्यारतः सौभरिर्मत्स्ययुग्मं दृष्ट्वा विवाहं विधाय सांसारिकविषयेष्वरमत । यदा पुनस्तस्य मनसि विषयेभ्यो विरक्तिरुदपद्यत तदा स मनसि खेदं कुर्वन् प्रदत्तं पद्यद्वयमकथयत् । इदं पद्यद्वयं पठित्वा शिक्षकस्य साहाय्येन तदर्थं च बुद्ध्वा सौभरेः खेदविषयं स्वभाषया लिखत ।**

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।
अन्तर्जले वारिचरप्रसङ्गात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥
निःसङ्गता मुक्तिपदं यतीनां सङ्गादशेषाः प्रभवन्ति दोषाः ।
आरूढयोगोऽपि निपात्यतेऽधः सङ्गेन योगी किमुताल्पसिद्धिः ॥

## अनुप्रयोगः

१. **दयावतः कस्यचित् पौराणिकपात्रस्य कथामन्विष्य स्वभाषया लिखित्वा कक्षायां श्रावयत ।**

२. **दयाया महत्त्वं प्रदर्शयन्ननुच्छेदमेकं रचयत ।**

३. **स्वस्य समाजे परोपकारेण प्रसिद्धिं गतस्य कस्यचिन्महानुभावस्य जीवनवृत्तं तत्परोपकारकर्मणो वर्णनेन पुरःसरमुपस्थापयत ।**

४. **'परोपकाराय सतां विभूतयः' इति शीर्षके एकं लघुनिबन्धं रचयत ।**

## व्याकरणानुशीलनम्

१. **प्रदत्तं पाठगतमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत**

अन्येद्युः स्वयंवरकार्यक्रमः प्रारब्धो जातः । अनेके राजकुमारास्तत्र सम्प्राप्ता आसन् । महर्षिः सौभरिरपि तत्र प्राप्त आसीत् । राजकुमाराणां पङ्क्तौ अधिमञ्चमेव स उपाविशत् । राज्ञः पञ्चाशत् कन्या वरचयनाय मञ्चमागच्छन् । महर्षिं सौभरिं दृष्ट्वा मुग्धास्ताः सर्वा अपि अहम्पूर्विकया सौभरेर्गले एव वरमालां निधापितवत्यः । नृप इदं दृष्ट्वा विवशः सन् तासां सर्वासामपि कन्यानां पाणीन् सविधि सौभरिमग्राहयत् । सौभरिः पञ्चाशतमेव राजकन्याः पत्नीत्वेन गृहीत्वा स्वाश्रमं प्रत्यागच्छत् । स तासां सर्वासां कृते प्रासादं निर्मातुं

विश्वकर्माणमादिशत् । यद्यपि विश्वकर्मा देव आसीत् तथापि स ऋषेराज्ञामुल्लङ्घयितुं कथं शक्नुयात् ? स महर्षिं प्रणम्य पञ्चाशत्सङ्ख्यकानेव प्रासादान् निरमात् । शतशो वर्षाणि ताभिः साकं विवाहसुखमुपभुज्य महर्षिः सांसारिकसुखाद् विरक्तोऽभवत् । स सर्वाभ्योऽपि स्वपत्नीभ्यो ब्रह्मज्ञानं प्रदाय ताः परमपदस्य मार्गं प्रदर्श्य पुनस्तपसे कालिन्दीं प्राविशत् । महर्षेः सौभरेः सङ्गेन तासां पञ्चाशत्सङ्ख्यकानां राजकन्यानामुद्धारो जातः ।

(क) प्रायेण विसर्गात् च-छ-ट-ठ-त-थवर्णेषु परेषु विसर्गस्य स्थाने सकारादेशो भवति । ततश्चावश्यकत्वे श्चुत्वसन्धिः ष्टुत्वसन्धिर्वा भवति । यथा- गुरोः + च - गुरोश्च । अनुच्छेदे विसर्गस्य स्थाने सकारादेशः कुत्र कुत्र विहितोऽस्ति ? अन्विष्य सन्धिविच्छेदं कृत्वा दर्शयत ।

(ख) क-ख-प-फवर्णेषु परेषु विसर्गस्य स्थाने जिह्वामूलीयोपध्मानीयविसर्गौ भवतः । परं सामान्यलेखने प्रायेण तत्र सामान्यो विसर्ग एव प्रयुज्यते । यथा- गुरोः पाठनम् । अत्रानुच्छेदे तादृशानि विसर्गयुक्तानि स्थलानि कति सन्ति ? अन्विष्य लिखत ।

(ग) श-ष-सवर्णेषु परेषु विसर्गस्य स्थाने विकल्पेन विसर्ग एवादिश्यते । पक्षे तु विसर्गस्य स्थाने सकारादेशोऽपि भवति । यथा- गुरोः + शय्या - गुरोः शय्या/गुरोश्शय्या । अत्रानुच्छेदे तादृशस्थले विसर्ग एव वर्तते । अनुच्छेदात् तादृक्स्थलान्यन्विष्य तस्य वैकल्पिकं रूपं च दर्शयत ।

(घ) अवर्णभिन्नाद् वर्णात् परो विसर्गस्थानीयो रेफोऽशि परे विसर्गत्वं न प्राप्नोति । यथा- गुरोर्(ः) + अपि - गुरोरपि । अस्मादनुच्छेदात् तादृशानि स्थलानि अन्विष्य दर्शयत ।

(ङ) अकारे परे अकारादेव परस्य विसर्गस्थानीयस्य रोः रेफस्य स्थाने उकारादेशो भवति, ततः क्रमेण गुणपूर्वरूपसन्धी भवतः । यथा- शिवस् + अहम् - शिव रु + अहम् - शिवर् + अहम् - शिव उ अहम् - शिवो + अहम् - शिवोऽहम् । अत्रानुच्छेदेऽपि एतादृशानि सन्धिस्थलानि वर्तन्ते । तान्यन्विष्य तेषां सन्धिप्रक्रियां च प्रदर्शयत ।

(च) अकारादकारभिन्नेऽचि परे अकारात् परस्य विसर्गस्थानीयस्य रोः रेफस्य स्थाने यकारादेशो भवति, ततश्च तस्य यकारस्य लोपो भवति । यथा- मनस् + इदम् - मनरु + इदम् - मनर् + इदम् - मनय् + इदम् - मन इदम् । अनुच्छेदाद् एवंविधानि सन्धिस्थलान्यन्विष्य सन्धिप्रक्रियां दर्शयत ।

(छ) हशि परे अकारात् परस्य विसर्गस्थानीयस्य रोः रेफस्य स्थाने उकारादेशो भवति । ततश्च तत्र गुणसन्धिर्जायते । यथा- शिवस् + नम्यः - शिव रु + नम्यः - शिवर् + नम्यः - शिव उ नम्यः - शिवो नम्यः । अनुच्छेदादन्विष्य एवंविधानि सन्धिस्थलानि सन्धिप्रक्रियाप्रदर्शनपूर्वकं निर्दिशत ।

ज) अकारादेव परस्यापि विसर्गस्थानीयस्य रुभिन्नो रेफस्तु अशि परे रेफ एव तिष्ठति, अन्येषु वर्णेषु परेषु यथायथं सन्धिर्जायते । यथा- पुनर् + अपि - पुनरपि । पुनर् + च - पुनः + च - पुनश्च ।

(झ) अकारभिन्नेऽशि परे अकारात् परस्य विसर्गस्थानीयस्य रोः रेफस्य स्थाने यकारादेशो भवति । ततश्च तस्य लोपो भवति । यथा- बालकास् + आगच्छन्ति - बालकारु + आगच्छन्ति - बालकार् + आगच्छन्ति - बालकाय् + आगच्छन्ति - बालका आगच्छन्ति । बालकास् + धावन्ति - बालकारु + धावन्ति - बालकार् + धावन्ति - बालकाय् + धावन्ति - बालका धावन्ति । अत्रानुच्छेदे वर्तमानानि एतादृक्सन्धिस्थलानि सन्धिप्रक्रियाप्रदर्शनेन दर्शयत ।

२. **विसर्गसन्धेरुपर्युल्लिखितानां नियमानां प्रतिनियमं त्रीण्युदाहरणानि लिखत ।**

३. **अधस्तनानां विसर्गसन्धिना संहितानां पदानां सन्धिविच्छेदं विधाय सन्धिप्रक्रियां दर्शयत**

सौभरिर्दयामूर्तिः, कालिन्द्या जले, सौभरेरुपरि, धीवरास्तस्य, जालान्तर्वर्तमानस्य, विवशा अजायन्त, भीता धीवराः, धीवरेभ्योऽनेकशः, निवासो भवति, सन्तस्तम्, पुनस्तपस्यायै, कालिन्द्याः सर्वे, मत्स्यभक्षणरत एव, भीतो गरुडः, ततश्च, निवास आसीत्, पीडिता आसन्, गरुडोऽपि ।

४. **अधोऽङ्कितानि अच्सन्धिना संहितानां पदानां सन्धिविच्छेदं कृत्वा यथायथं सन्धिसूत्राणि च विलिखत**

रमणकनामकेऽन्तरीपे, प्राक्षिपन्, न्यपतत्, तथैव, जालबन्धाशङ्कयाऽन्ये, महर्षिः, सर्वेऽपि, गत्वोत्तिष्ठ, जालावकर्षणायासम्, अध्यगच्छन्, महतौत्कण्ठ्येन, व्यपगतः, हठस्याग्रे, पार्श्वेऽगच्छन्, राजाप्यसमञ्जसः, प्रादात्, विलोक्यात्यन्तम्, हर्षान्विताः ।

५. **पाठस्य तृतीयानुच्छेदादच्सन्धिना संहितानि स्थलान्यन्विष्य सन्धिविच्छेदं कुरुत ।**

६. **अच्सन्धेः पाठाद्भिन्नानि पञ्चदश उदाहरणान्यन्विष्य प्रदर्शयत ।**

७. **अधस्तनानां हल्सन्धिना संहितानां स्थलानां सन्धिविच्छेदं कुरुत**

यावत्तपः, कस्यचिद्धीवरस्य, धीवरानात्मानम्, भक्षयन्नासीत्, वयं भीताः, तस्मिन्नेव, कञ्चिन्मत्स्ययुग्मम्, नोचेन्मम, स्वयंवरकार्यक्रमः, राजकुमाराणां पङ्क्तौ, अहम्पूर्विकया, मार्गं प्रदर्श्य ।

८. **हल्सन्धेर्दशोदाहरणानि सङ्कलय्य सन्धिप्रक्रियाप्रदर्शनपूर्वकं लिखत ।**

९. **अच्सन्धेहल्सन्धेर्विसर्गसन्धेश्च प्रतिसन्धि पञ्चतोऽधिकान्युदाहरणानि प्रयुज्य स्वविद्यालयस्य वणंनं कृत्वाऽनुच्छेदमेकं रचयत ।**

## कोषानुशीलनम्

**पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् । स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥**
**तच्छाखानगरं वेशो वेश्याजनसमाश्रयः । आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥**
**रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् । प्राकारो वरणः सालः प्राचीनं प्रान्ततो वृतिः ॥**
**भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम् । गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥**
**निशान्तवस्त्यसदनं भवनागारमन्दिरम् । गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥**
**वासः कुटी द्वयोः शाला सभा सञ्जवनं त्विदम् । चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥**
**चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा । आवेशनं शिल्पिशाला प्रपा पानीयशालिका ॥**
**मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम् । गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ॥**
**कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम् । वातायनं गवाक्षोऽथ मण्डपोऽस्त्री जनाश्रयः ॥**
**हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम् । सौधोऽस्त्री राजसदनमुपकार्योपकारिका ॥**
**स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च । विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ॥**
**स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् । शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम् ॥**
**प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके । गृहावग्रहणी देहल्यङ्गणं चत्वराजिरे ॥**
**अधस्ताद्दारुणिशिला नासा दारूपरि स्थितम् । प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तु पक्षकम् ॥**
**वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः । गोपानसी तु वलभी छादने वक्रदारुणि ॥**

**कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् । स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥**

**तोरणोऽस्त्री बहिर्द्वारम्पुरद्वारं तु गोपुरम् । कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ॥**

**कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना । आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहिणी ॥**

**संमार्जनी शोधनी स्यात्सङ्करोऽवकरस्तथा । क्षिप्ते मुखं निःसरणं संनिवेशो निकर्षणम् ॥**

**समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् । ग्रामान्तमुपशल्यं स्यात्सीमसीमे स्त्रियामुभे ॥**

**घोष आभीरपल्ली स्यात्पक्कणः शबरालयः ॥**

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**पत्तनस्य नामानि** – पूः (२), पुरी (६), नगरी (६), पत्तनम् (३), पुटभेदनम् (३), स्थानीयम् (३), निगमः (१)

**नगरसमीपस्योपनगरस्य नाम** शाखानगरम् (३)

**आपणस्य नामनी** – आपणः (१), निषद्या (२)

पण्यवीथिकायाः नामनी - विपणिः (२), पण्यवीथिका (२)

**ग्रामनगरयोर्मध्यभागस्थमार्गस्य नामानि** – रथ्या (२), प्रतोली (२), विशिखा (२)

**वप्रस्य नामनी** – चयः (१), , वप्रः (५)

**प्राकारस्य नामानि** – प्राकारः (१) वरणः (१, ) सालः (१)

**प्रान्ततो वृतेः नाम** – प्राचीनम् (३), प्राचीरम् (३)

**भित्तेर्नामनी** – भित्तिः (२), कुड्यम् (३)

**ऐडूकस्य नाम** – ऐडूकम् (३)

**गृहस्य नामानि** – गृहम् (३), गेहम् (३), उदवसितम् (३), वेश्म (३), सद्म (३), निकेतनम् (३), निशान्तम् (३), पस्त्यम् (३), सदनम् (३), भवनम् (३), आगारम् (३), मन्दिरम् (३), गृहाः (१),

निकाय्यः (१), निलयः (१), आलयः (१), वासः (१), कुटी (४), शाला (२), सभा (२)

**चतुःशालस्य नामनी** – सञ्जवनम् (३), चतुःशालम् (३)

**मुनीनाम् कुटे नामनी** – पर्णशाला (२), उटजम् (५)

**चैत्यस्य नामनी** – चैत्यम् (३), आयतनम् (३)

**वाजिशालायाः नामनी** – वाजिशाला (२), मन्दुरा (२)

**शिल्पिशालायाः नामनी** – आवेशनम् (३), शिल्पिशाला (२)

**पानीयशालायाः नामनी** – प्रपा (२), पानीयशालिका (२)

**छात्रादिनिलयस्य नाम** – मठः (१)

**मदिरागृहस्य नामनी** – गञ्जा (२), मदिरागृहम् (३)

**गर्भागारस्य नामनी** – गर्भागारम् (३), वासगृहम् (३)

**सूतिकागृहस्य नाम** – अरिष्टम् (३), सूतिकागृहम् (३)

**पाषाणदिनिबद्धाया भुवः नाम** - कुट्टिमः (५)

**शिरोगृहस्यैतन्नाम** – चन्द्रशाला (२)

**वातायनस्य नामनी** – वातायनम् (३), गवाक्षः (१)

**मण्डपस्य नामनी** – मण्डपः (५), जनाश्रयः (५)

**धनिनां गृहस्य नाम** – हर्म्यम् (३)

**देवभूभुजां वासस्य नाम** – प्रासादः (१)

**राजसदनस्य नामनी** – सौधः (५), राजसदनम् (३)

**उपकारिकायाः नामनी** – उपकार्या (२), उपकारिका (२)

**चतुर्द्वारयुक्तस्य गृहस्य नाम** – स्वस्तिकः (१)

**अनेकतलयुक्तस्य गृहस्य नाम** – सर्वतोभद्रः (१)

**वर्तुलाकारगृहस्य नाम** – नन्द्यावर्तः (१)

**विशालोन्नतानेकतलयुक्तस्य गृहस्य नाम** – विच्छन्दकः (१)

**भूभूजां स्त्र्यागारस्य नामानि** – अन्तःपुरम् (१), अवरोधनम् (३), शुद्धान्तः (१), अवरोधः (१)

**अट्टालिकायाः नामनी** – अट्ट; (१), क्षौमः (५)

**प्रघणस्य नामानि** – प्रघाणः (१), प्रघणः (१), अलिन्दः (१)

**देहल्याः नामनी** – गृहावग्रहणी (२), देहली (२)

**अङ्गणस्य नामानि** – अङ्गणम् (३), चत्वरम् (३), अजिरम् (३)

**देहल्या अधस्तात् स्थापितस्य काष्ठस्य नाम** - शिला (२)

**द्वारस्योपरिस्थितस्य काष्ठस्य नाम** – नासा (२)

**अन्तर्द्वारस्य नामनी** – प्रच्छन्नम् (३), अन्तर्द्वारम् (३)

**पक्षद्वारस्य नामनी** – पक्षद्वारम् (३), पक्षकम् (३)

**पटलप्रान्तस्य नामनी** – वलीकम् (३), नीध्रम् (३)

**पटलस्य नामनी** – पटलम् (३), छदिः (२)

**वलभ्याः नामनी** – गोपानसी (२), वलभी (२)

**कपोतपालिकायाः नामनी** – कपोतपालिका (२), विटङ्कम् (५)

**द्वारस्य नामानि** – द्वार् (२, ) द्वारम् (३), प्रतीहारः (१)

**वेदिकायाः नामनी** – वितर्दिः (२), वेदिका (२)

**बहिर्द्वारस्य नामनी** – तोरणम् (५), बहिर्द्वारम् (३)

**पुरद्वारस्य नामनी** – पुरद्वारम् (३), गोपुरम् (३)

**हस्तिनखस्य नाम** – हस्तिनखः (१)

**कपाटस्य नामनी** – कपाटम् (७), अररम् (७)

**अर्गलस्य नाम** – अर्गलम् (६)

**पाषाणसोपानस्य नामनी** – आरोहणम् (३), सोपानम् (३)

**काष्ठसोपानस्य नामनी** – निःश्रेणिः (२), अधिरोहिणी (२)

**सम्मार्जन्याः नामनी** – सम्मार्जनी (२), शोधनी (२)

**सङ्करस्य नामनी** – सङ्करः (१), अवकरः (१)

**निःसरणमार्गस्य नामनी** – मुखम् (३), निःसरणम् (३)

**निकर्षणास्य नामनी** – सन्निवेशः (१), निकर्षणम् (३)

**ग्रामस्य नामनी** – संवसथः (१), ग्रामः (१)

**वेश्मभुवो नामनी** – वेश्मभूः (२), वास्तु (५)

**ग्रामान्तस्य नामनी** – ग्रामान्तः (१), उपशल्यम् (३)

**सीमायाः नामनी** – सीमन् (२), (सीमा) (२)

**आभीरवासस्य नामनी** – घोषः (१), आभीरपल्ली (२)

**पक्वणवासस्य नामनी** – पक्वणः (१), शवरालयः (१)

## अभ्यासः

**१. शुद्धमुच्चारयत**

कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् ।
स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥
तोरणोऽस्त्री बहिर्द्वारम्पुरद्वारं तु गोपुरम् ।
कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ॥

२. **गृहस्य सर्वाणि नामानि कण्ठस्थं श्रावयत ।**

३. **अर्थानुसारेण परस्परं मेलयत**

| | |
|---|---|
| कुड्यम् | अजिरम् |
| गेहम् | भित्तिः |
| वाजिशाला | पूः |
| विशिखा | सदनम् |
| निगमः | मन्दुरा |
| चत्वरम् | रथ्या |

४. **नेपालीभाषायामर्थं लिखत**

रथ्या, कुड्यम्, सद्म, गञ्जा चयः प्रघणः मण्डपः, सौधः, छदिः ।

५. **पर्यायान् लिखत**

वलभी, शुद्धान्तः, रथ्या, गर्भागारम्, पूः, उटजम्, निकेतनम्, वप्रः, सालः, गञ्जा ।

६. **नगर्या नामानि लिखत ।**

७. **प्राकारस्य सर्वाणि नामनि लिखत ।**

८. **मन्दिरशब्दस्य सर्वाणि रूपणि लिखत ।**

९. **संस्कृतेऽनुवादं कुरुत**

(क) परखालले घेरिएको घर सुरक्षित हुन्छ ।

(ख) आमा बजार गएर सारी किन्नुहुन्छ ।

(ग) घरको फोहोरसमेत कुचोले बढाडेर फाल्न सक्दैनौ है ।

(घ) रक्सी स्वास्थ्यको लागि हानिकारक छ ।

(ङ) सहर पसेकी सीता सुत्केरीको सेवा गर्दछे ।

# संस्कृतवाङ्मयम्




संस्कृतवाङ्मयम् अत्यन्तं समृद्धं वर्तते । संस्कृतवाङ्मयस्य भाण्डागारे वेदा ज्ञानस्य मूलस्रोतांसि सन्ति । वेदा अपौरुषेयाः खलु । ऋषयः केवलं मन्त्रद्रष्टारो वर्तन्ते । संस्कृतवाङ्मयमपि वैदिकं लौकिकञ्चेति द्विधा विभज्यते । वैदिकवाङ्मये वेदसंहिताः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदश्च परिगण्यन्ते । इतरं विपुलं संस्कृतवाङ्मयं लौकिकवाङ्मयरूपं मन्यते ।

स्मृतयः, काव्यग्रन्थाः, सूत्रग्रन्थाः, भाष्यग्रन्थाः, वेदस्य षडङ्गानि, दर्शनग्रन्थाश्च लौकिक-संस्कृतवाङ्मयपदेन व्यवह्रियन्ते । तत्र वैदिकानां लौकिकानाञ्च ग्रन्थानामध्ययनेन मानवः पूर्णज्ञानवान् भवितुं शक्नोति । मानवजीवनस्य समग्रा अपि पक्षाः संस्कृतवाङ्मये वर्णिताः सन्ति । भौतिकीमाध्यात्मिकीञ्च समुन्नतिं कर्तुं तेषु ग्रन्थेषु उपाया वर्णिताः सन्ति ।

सम्प्रति मानवजीवनस्य कृते संस्कृतवाङ्मयस्य महत्त्वं ततोऽपि विवृद्धं वर्तते । अस्माकं संस्कृत्या सह एतद्भाषायाः सम्बन्धः प्रगाढोऽस्ति । अस्माकं सांस्कृतिकपक्षः संस्कृतवाङ्मयं विना अपूर्ण एव प्रतिभाति । अतः एव उच्यते– संस्कृतिः संस्कृताश्रिता इति । संस्कृतवाङ्मय-निर्दिष्टानामुपायानामवलम्बनेन अस्माकं जीवनं सज्जीवनं भवितुं शक्नोति ।

संस्कृतभाषा बीजमन्त्रयुता, सूत्रपूर्णा चास्ति । वेदशास्त्रं सूत्रशैल्या कर्तव्यं बोधयति । सर्वमूलं वेद एव वर्तते । 'वेदोऽखिलो धर्ममूलम्' इति प्रसिद्धम् एव । जीवनदर्शनस्य नैके पक्षाः सूत्रग्रन्थेषु निबद्धा वर्तन्ते । वेदज्ञानेन सर्वप्रथमं मानवानां चैतन्यं जागर्ति । चेतनायाः कारणात् कलाया विकासो भवति । शिल्पस्य आधारेण सामाजिकसौहृदं वर्धते ।

वेदानां व्यावहारिकरूपेण प्रयोगाय तस्य षडङ्गानां ज्ञानमावश्यकम् । समग्रतः वेदानामध्ययनार्थं छन्दः, व्याकरणम्, कल्पः, ज्यौतिषम्, शिक्षा, निरुक्तञ्चेति षडङ्गानि अध्ययनीयानि । छन्दशास्त्रं वेदानां लयमुपदिशति । कल्पशास्त्रं वेदानामुच्चारणमुपदिशति । ज्यौतिषं ग्रहाणां गतिमाश्रित्य शुभाशुभविचारं प्रकटयति । व्याकरणं वेदानां शब्दसिद्धिं शिक्षयति । शिक्षाशास्त्रं वेदाध्ययनस्यानुशासनमुपदिशति । निरुक्तं च वेदशब्दार्थव्याख्यानं करोति । वेदाङ्गाधारेणैव अन्यानि शास्त्राणि विकसितानि, रक्षितानि, समृद्धानि च भवन्ति ।

दर्शनशास्त्राणि अस्मभ्यं बहुविधं ज्ञानं प्रयच्छन्ति । न्यायदर्शनमस्मान् वस्तुनः सत्यासत्यविवेचनं शिक्षयति । साङ्ख्यदर्शनं प्रकृतेर्विविधं स्वरूपं शिक्षयति । वैशेषिकदर्शनमस्मान् कर्माणि दृष्ट्वा कारणमन्वेष्टुं शिक्षयति । पूर्वमीमांसादर्शनं कर्मानुसारं फलप्राप्तिं बोधयति । उत्तरमीमांसादर्शनं वेदान्तदर्शनं वास्मानात्मनो विषये शिक्षयति । चार्वाग्दर्शनम्, जैनदर्शनम्, बौद्धदर्शनञ्चेत्यादीनि शास्त्राणि जीवनदर्शनस्य बहुविधं तथ्यमुपदिशन्ति । दर्शनानि अस्मान् मनःशरीरयोः आत्मनश्च सम्बन्धं बोधयन्ति, तत्त्वज्ञानार्थं प्रेरयन्ति च ।

संस्कृतवाङ्मयं मानवजातेः कृते बहुमूल्यं धनमस्ति । एतस्याध्ययनेन, एतन्निर्दिष्टानामुपायानां पालनेन च मनुष्यो लौकिकं सुखम्, पारलौकिकमानन्दञ्च प्राप्तुं समर्थो भवति । संस्कृतवाङ्मये द्विविधाया विद्यायाः, चतुर्दशविद्यानाम्, अष्टादशविद्यानाम्, चतुःषष्टिकलानाञ्च उल्लेखः प्राप्यते । तत्र परा अपरा चेति द्वे विद्ये । चतुर्दशविद्यानां विषये प्रोक्तम्–

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥**

पुराणानि, न्यायः, मीमांसा, धर्मशास्त्राणि, चत्वारो वेदाः, षड् वेदाङ्गानि चेति चतुर्दश विद्याः । तत्रैव चतुर्णामुपवेदानां योगेन विद्या अष्टादश अपि उच्यन्ते । गायन-वादन-नर्तनादिनीनां चतुःषष्टिकलानां विषये च शास्त्रेषु उल्लिखितं वर्तते । वस्तुतः संस्कृतवाङ्मये मानवजीवनस्य कृते आवश्यकाः सर्वेऽपि ज्ञानविषया वर्तन्ते । अतः संस्कृतवाङ्मयस्य सुविशालं भाण्डागारं लक्ष्यीकृत्य जना वदन्ति– 'संस्कृते किं न विद्यते ?' इति । एकस्यैव महाभारतग्रन्थस्य विषयेऽपि श्रूयते–

**धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥**

एतेन संस्कृतवाङ्मयस्य सर्वसमृद्धत्वं स्पष्टं भवति । विश्वस्य सर्वप्राचीनं समुन्नतञ्च एतद्वाङ्मयं विश्वस्मिन् विश्वे अधुना बहुषु देशेषु अध्ययनस्य, अनुसन्धानस्य च विषयो वर्तते । एतद्वाङ्मयं प्रति सर्वे समाकृष्टाः सन्ति ।

## शब्दार्थाः

| | |
|---|---|
| समृद्धम् | धनी |
| भाण्डागारम् | भण्डार |
| स्रोतः | खानी |
| अपौरुषेयः | मानिसले नरचेको |
| द्रष्टा | देख्नेवाला |
| इतरम् | अरू |
| विपुलम् | ठुलो |
| अङ्गम् | अङ्ग |
| समुन्नतिः | विकास |
| उपायः | उपाय |
| सम्प्रति | अहिले |
| मानवजीवनम् | मानिसको जीवन |
| महत्त्वम् | महत्त्व |
| सम्बन्धः | सम्बन्ध |
| प्रगाढः | गाढा |
| सज्जीवनम् | राम्रो जीवन |
| बहुविधम् | धेरै थरीका |
| सम्यक् | राम्रो |
| सर्वप्राचीनम् | सबैभन्दा पुरानो |
| अध्ययनम् | पढाइ |
| अनुसन्धानम् | खोज |

# अभ्यासः

## श्रवणं भाषणञ्च

१. **कक्षायां पाठस्य श्रवणानन्तरं स्वमातृभाषायां स्वशैल्या श्रावयत ।**

२. **कौचित् द्वौ छात्रौ पाठस्य प्रथमद्वितीयानुच्छेदौ क्रमेण श्रावयताम् ।**

३. **पाठस्य अधस्तनानि समस्तपदानि शुद्धमुच्चारयत**

संस्कृतवाङ्मयम्, मूलस्रोतांसि, अपौरुषेयाः, मन्त्रद्रष्टारः, वैदिकवाङ्मये, वेदसंहिताः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, काव्यग्रन्थाः, सूत्रग्रन्थाः, भाष्यग्रन्थाः, दर्शनग्रन्थाश्च, लौकिकसंस्कृतवाङ्मयपदेन, पूर्णज्ञानवान्, मानवजीवनस्य ।

४. **पाठस्य तृतीयानुच्छेदस्य क्रियापदानि विचित्य एकैकं वाक्यं श्रावयत ।**

५. **संस्कृतवाङ्मयविषये पञ्च वाक्यानि कथयत ।**

६. **संस्कृतवाङ्मयस्य आवश्यकताया विषये परस्परं विमृशत ।**

७. **मित्रात् पाठस्य चतुर्थमनुच्छेदं श्रुत्वा प्रश्नानुत्तरयत**

(क) वेदज्ञानेन किं जागर्ति ?

(ख) संस्कृतभाषा कीदृशी अस्ति ?

(ग) अखिलानां धर्माणां मूलं किम् ?

(घ) के सूत्रग्रन्थेषु निबद्धा वर्तन्ते ?

(ङ) कलाया विकासः कथं भवति ?

(च) शिल्पस्य आधारेण किं वर्धते ?

(छ) वेदशास्त्रं सूत्रशैल्या किं बोधयति ?

**८. शिक्षकात् क्रियापदानि श्रुत्वा अनुवाचयत**

| | |
|---|---|
| वहति | वहते |
| नयति | नयते |
| ददाति | दत्ते |
| चिनोति | चिनुते |
| धूनोति | धूनुते |
| मुञ्चति | मुञ्चते |

**९. पाठस्य अधो दत्तानां पदानामर्थं श्रावयत**

चत्वारो वेदाः, षड् वेदाङ्गाः, चतुर्दश विद्याः, चतुःषष्टिकलानाम्, संस्कृतवाङ्मये, मानवजीवनस्य, ज्ञानविषयाः, सुविशालम्, भाण्डागारम्, एकस्य, महाभारतग्रन्थस्य, मानवजातेः, बहुमूल्यम्, द्वे विद्ये ।

**१०. पाठस्य पदानि प्रयुज्य निर्मितानि नवीनानि वाक्यानि श्रावयत**

(क) वेदाश्चत्वारः सन्ति ।

(ख) समयो बहुमूल्यो भवति ।

(ग) महाभारतं विश्वस्यैव बृहत्तरं काव्यमस्ति ।

(घ) मानवजीवनस्य प्रमुखमुद्देश्यं परमात्मप्राप्तिर्वर्तते ।

(ङ) नेपालः प्राकृतिकस्य सौन्दर्यस्य भाण्डागारमस्ति ।

## पठनम्

**१. अधस्तनयोः पद्ययोर्लयोच्चारणं कुरुत**

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥

## २. सस्वरं पठित्वा प्रश्नानुत्तरयत

पञ्चविंशतिशतकानि व्यतीतानि, यदा शाक्यकुलावतंसः सिद्धार्थः स्वजन्मना इमां नेपालधरामलञ्चकार । पुरा वर्तमानलुम्बिनीप्रदेशस्य कपिलवस्तुजनपदे सुन्दरी नगरी आसीत् । राजा शुद्धोदनस्तत्र सुखेन राज्यशासनं सञ्चालयामास । शुद्धोदनस्य मायादेवीनाम्नी सती भार्या आसीत् । सा मायादेवी एकं सूनुं जनयामास । तस्य नाम सिद्धार्थो बभूव ।

सिद्धार्थः शैशवकालादेव ज्ञानी, विवेकी, उत्साही च आसीत् । राजकुमारः सन्नपि स वैराग्यबोधेन बुद्धोऽभवत् । बहूनि वर्षाणि यावत् तपः कृत्वा सिद्धार्थः प्राणिनां दुःखस्य कारणं तन्निवारणस्य उपायञ्च अजानात् । सिद्धार्थगौतम एव ज्ञानानन्तरं गौतमबुद्धस्य नाम्ना लोकविश्रुतो बभूव । गौतमबुद्धो लोककल्याणाय चिराय उपादिशत् । बुद्धस्य उपदेशाः साम्प्रतमपि विभिन्नेषु देशेषु पठ्यन्ते पाठ्यन्ते च । असौ नेपालस्य गौरवं वर्तते ।

(क) सिद्धार्थः किमजानात् ?

(ख) मायादेवी कं जनयामास ?

(ग) मायादेव्याः सूनोर्नाम किम् ?

(घ) पुरा कुत्र सुन्दरी नगरी आसीत् ?

(ङ) सिद्धार्थस्य स्वभावः कीदृश आसीत् ?

(च) शुद्धोदनस्य भार्याया नाम किमासीत् ?

(छ) गौतमबुद्धः किमर्थं चिराय उपादिशत् ?

(ज) के साम्प्रतं बहुत्र पठ्यन्ते पाठ्यन्ते च ?

(झ) राजा शुद्धोदनः कथं राज्यशासनं सञ्चालयामास ?

(ञ) सिद्धार्थगौतमः पश्चात् केन नाम्ना लोकविश्रुतो बभूव ?

## ३. अधोलिखितं संवादं पठित्वा पात्राणां रुचिं वर्णयत

**सुभाषः** सुनीते ! कुत्र गच्छसि ?

**सुनीतिः** क्रीडनाय गच्छामि ।

**सुजयः** सम्प्रति क्रीडनस्य समयो नास्ति । अयं तु गृहकार्यस्य समयः ।

**अखिलः** भवतु तावत्, अहं तु दूरदर्शने सानन्दं व्यङ्ग्यचलचित्रं पश्यामि ।

**गोविन्दः** इदानीं नाहं तत् करोमि । पुष्पवाटिकामेत्य जलसेचनं करोमि । पुष्पाणि शुष्काणि सन्ति ।

**कुमुदा** प्रतिवेशिगृहे नैतिकप्रवचनस्य कार्यक्रमो वर्तते । तत्र गत्वा लाभान्विता भवामि ।

**उमा** अद्य कपोता बुभुक्षिताः सन्ति । तेभ्योऽन्नं ददामि । जलपात्रे जलं च स्थापयामि ।

**दीपाली** अहं तु गृहकार्याय मातुः सहयोगं करोमि । माता एकाकी गृहकार्यं कुर्वती अस्ति ।

**सुभाषः** अहमपि नास्मि अलसः । गृहं परितोऽवकरं सङ्कलय्य एकत्र स्थापयामि । वातावरणस्य स्वच्छीकरणमपि अतीव आवश्यकम् ।

**४. पाठस्य प्रथमद्वितीयौ अनुच्छेदौ पठित्वा सारं लिखत ।**

## लेखनम्

**१. पाठाधारेण रिक्तस्थानं पूरयत**

पुराणन्यायमीमांसा ............................ ।

वेदाः ......... विद्यानां ......... च चतुर्दश ॥

..... ह्यर्थे च कामे च मोक्षे .... भरतर्षभ ।

यदिहास्ति ...... यन्नेहास्ति ... तत्क्वचित् ॥

**२. पाठाधारेण प्रश्नानुत्तरयत**

(क) के मन्त्रद्रष्टारः ?

(ख) का संस्कृताश्रिता ?

(ग) के खलु अपौरुषेयाः ?

(घ) ज्ञानस्य मूलस्रोतांसि कानि ?

(ङ) संस्कृतवाङ्मयं कतिधा विभज्यते ?

(च) वैदिकवाङ्मये के ग्रन्थाः परिगण्यन्ते ?

(छ) मानवः कथं पूर्णज्ञानवान् भवितुं शक्नोति ?

(ज) के लौकिकसंस्कृतवाङ्मयपदेन व्यवह्रियन्ते ?

(झ) संस्कृतवाङ्मयं विना कोऽपूर्ण एव प्रतिभाति ?

(ञ) कया सह संस्कृतभाषायाः प्रगाढः सम्बन्धोऽस्ति ?

३. **पाठस्य अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

समृद्धम्, स्रोतः, अपौरुषेयः, द्रष्टा, इतरम्, विपुलम्, अङ्गम्, समुन्नतिः, उपायः, सम्प्रति, मानवजीवनम्, महत्त्वम्, सम्बन्धः, प्रगाढः, सज्जीवनम् ।

४. **समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) संस्कृतजीवनं सज्जीवनं भवति ।

(ख) कल्पशास्त्रं वेदानामुच्चारणमुपदिशति ।

(ग) छन्दशास्त्रं वेदानां शब्दसिद्धिमुपदिशति ।

(घ) निरुक्तं च वेदशब्दार्थव्याख्यानं करोति ।

(ङ) दर्शनानि अस्मान् तत्त्वज्ञानार्थं प्रेरयन्ति ।

(च) ज्यौतिषं वेदाध्ययनस्यानुशासनमुपदिशति ।

(छ) साङ्ख्यदर्शनं जलस्य विविधं स्वरूपं शिक्षयति ।

(ज) दर्शनशास्त्राणि अस्मभ्यं बहुविधं ज्ञानं प्रयच्छन्ति ।

(झ) पूर्वमीमांसादर्शनं कर्मानुसारं फलप्राप्तिं कारयति ।

(ञ) छन्दः, कल्पः, शिक्षा, निरुक्तञ्चेति षड् वेदाङ्गानि ।

५. **पाठस्य प्रथमानुच्छेदस्य स्वशब्दैः सरलगिरा पुनर्लेखनं कुरुत ।**

६. **पाठस्याधारेण संस्कृतवाङ्मयस्य महत्त्वं पञ्चभिर्वाक्यैर्लिखत ।**

७. **पाठस्य तृतीयानुच्छेदस्य श्रुतलेखनं कुरुत ।**

**अनुप्रयोगः**

१. **पाठाधारेण विशेषण-विशेष्यपदानि परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
| --- | --- |
| बहुमूल्यम् | आनन्दम् |
| लौकिकम् | विद्ये |
| पारलौकिकम् | धनम् |
| द्वे | सुखम् |
| चत्वारः | ज्ञानविषयाः |
| षड् | भाण्डागारम् |
| चतुर्दश | देशेषु |
| आवश्यकाः | वेदाः |
| सुविशालम् | वेदाङ्गानि |
| बहुषु | विद्याः |

२. **शिक्षकसाहाय्येन उदाहरणं विलोक्य कृतीनां विधानामानि लिखत**

| **कृतिः** | | **विधा** |
| --- | --- | --- |
| अभिज्ञानशाकुन्तलम् | – | नाटकम् |
| बुद्धचरितम् | – | ........... |
| कादम्बरी | – | ........... |
| पञ्चतन्त्रम् | – | ........... |
| कर्पूरमञ्जरी | – | ........... |
| कर्णभारम् | – | ........... |
| सूर्यसिद्धान्तः | – | ........... |
| अष्टाध्यायी | – | ........... |

३. **पाठात् अन्विष्य विपर्ययपदानि लिखत**

(क) लौकिकम् – वैदिकम्

(ख) लघु – ...........

(ग) अवनतिम् – ...........

(घ) पूर्णम् – ...........

(ङ) सर्वान्तिमम् – ...........

(च) अनावश्यकम् – ...........

४. **प्रदत्तानां पदानां साहाय्येन पञ्चभिर्वाक्यैः चित्रं वर्णयत**



**मञ्जूषा**

हिमालयः, धवलः, वहन्ति, नद्यः, स्वच्छं जलम्, गावः, कुर्वन्ति, खगाः, उड्डयन्ते, आकाशम्, चरन्ति, वहन्ति

# व्याकरणबोधः

१. **लिट्–लकारस्य अधस्तनीं रूपावलीं पठत**

**परस्मैपदम्–**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पपाच | पेचतुः | पेचुः |
| मध्यमपुरुषः | पेचिथ/पपक्थ | पेचथुः | पेच |
| उत्तमपुरुषः | पपाच/पपच | पेचिव | पेचिम |

**आत्मनेपदम्–**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पेचे | पेचाते | पेचिरे |
| मध्यमपुरुषः | पेचिषे | पेचाथे | पेचिध्वे |
| उत्तमपुरुषः | पेचे | पेचिवहे | पेचिमहे |

लिट्लकारः परोक्षभूतकालं बोधयति । यथा– श्रीरामो राजा बभूव ।

अस्मिन् वाक्ये 'बभूव' इति भूधातोः लिट्लकारस्य रूपम् । श्रीरामस्य राज्याभिषेकविषये अहं श्रुतवानस्मि परन्तु दृष्टवान् नास्मि । केवलं रामायणे पठितवानस्मि । अक्ष्णोः परं परोक्षम् । अक्षिभ्यामदृष्टो विषयः परोक्षो भवति । श्रीरामस्य राजपदे स्थितिर्मम कृते परोक्षविषयः । अतस्तस्मिन् परोक्षविषये अभिव्यक्त्यै लिट्लकारस्य प्रयोग एव साधुः ।

२. **उदाहरणानुसारेण रूपावलीं लिखत**

| **लट्लकारः** | **लिट्लकारः** |
|---|---|
| सिञ्चति/सिञ्चते | सिषेच/सिषिचे |
| मुञ्चति/मुञ्चते | .................. |
| भजति/भजते | .................. |
| यजति/यजते | .................. |

विन्दति/विन्दते ..................

वपति/वपते ..................

लिम्पति/लिम्पते ..................

शपति/शपते ..................

द्वेष्टि/द्विष्टे ..................

कृषति/कृषते ..................

३. **उदाहरणानुसारेण वाक्यप्रयोगं कुरुत**

**यथा–** माता गृहं लिम्पति । माता गृहं लिलेप ।

पिता प्राङ्गणं लिम्पते । पिता प्राङ्गणं लिलिपे ।

**वाक्यप्रयोगार्थं क्रियापदानि–**

| | |
|---|---|
| चोरयति/चोरयते | चोरयामास/चोरयाञ्चक्रे |
| शिक्षयति/शिक्षयते | शिक्षयामास/शिक्षयाञ्चक्रे |
| रचयति/रचयते | रचयामास/रचयाञ्चक्रे |
| कथयति/कथयते | कथयामास/कथयाञ्चक्रे |
| पूजयति/पूजयते | पूजयामास/पूजयाञ्चक्रे |

४. **उदाहरणानुसारेण उपसर्गान् पृथक्कुरुत**

**यथा–** सम्बन्धः - सम् + बन्धः

(क) प्रगाढः - ............... (ख) समुन्नतिः - ...............

(ग) संस्कृतिः - ............... (घ) विवृद्धम् - ...............

(ङ) आश्रिता - ............... (च) निबद्धाः - ...............

(छ) प्रकृतिः - ............... (ज) प्रोक्तम् - ...............

(झ) अनुसन्धानम् - ...............

**५. प्रदत्तैरुपसर्गैर्नवीनानि द्वाविंशतिं पदानि निर्मात**

प्र, अप, अनु, अव, वि, अधि, सु, उत्, अभि, प्रति, परि ।

**६. अधस्तनानामुपसर्गयुक्तैः पदैर्वाक्यरचनां कुरुत**

प्रकारः, उज्ज्वलम्, संस्कारः, निर्विकारः, दुष्कर्म, आश्रयः, उपकारः ।

## कोषानुशीलनम्

**महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः । अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥**
**लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ । अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ॥**
**हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रिकः । गन्धमादनमन्ये च हेमकूटादयो नगाः ॥**
**पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् । कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः ॥**
**कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियाम् । उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ॥**
**दरी तु कन्दरो वा स्त्री देवखातबिले गुहा । गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥**
**दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः । खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यन्तपर्वताः ॥**
**उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका । धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ॥**
**निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥**

### पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**पर्वतस्य नामानि** (सर्वे शब्दाः पुंल्लिङ्गे सन्ति)

महीध्रः शिखरिन्, क्ष्माभृत्, अहार्यः, धरः, पर्वतः, अद्रिः, गोत्रः, गिरिः, ग्रावा, अचलः, शैलः, शिलोच्चयः

**लोकालोकस्य नामनी** – लोकालोकः (१), चक्रवालः (१),

**त्रिकूटाचलस्य नामनी** – त्रिकूट : (१), त्रिककुद् (१),

**अस्ताचलस्य नामनी** – अस्तः (१), चरमक्ष्माभृत् (१),

**उदयाचलस्य नामनी** – उदयः (१), पूर्वपर्वतः (१)

**पर्वतविशेषस्य नामानि** – हिमवत् (१), निषधः (१), विन्ध्यः (१), माल्यवत् (१), परियात्रकः (१), गन्धमादनम् (३), हेमकूटः (१)

**पाषाणस्य नामानि** – पाषाणः (१), प्रस्तरः (१), ग्रावा (१), अश्मन् (१), शिला (२), दृषद् (२), उपलः (१)

**शिखरस्य नामानि** – कूटम् (५), शिखरम् (३), शृङ्गम् (३)

**प्रपातस्य नामानि** – प्रपातः (१), अतटः (१), भृगुः (१)

**कटकस्य नाम** – कटकम् (५)

**प्रथस्य नामानि** – स्नुः (१), प्रस्थम् (५), सानु (५)

**उत्सस्य नाम** – उत्सः (१), प्रस्रवणम् (३)

**वारिप्रवाहस्य नाम** – वारिप्रवाहः (१), निर्झरः (१), झरः (१)

**कृत्रिमकन्दरस्य नामनी** – दरी (२), कन्दरः (४)

**गुहायाः नामानि** – देवखातम् (३), बिलम् (३), गुहा (२), गह्वरम् (३)

**गण्डशैलस्य नाम** – गण्डशैलः (१)

**दन्तकस्य नाम** – दन्तकः (१)

**आकरस्य नामनी** – खनिः (२), आकरः (१)

**पदस्य नामनी** – पादः (१), प्रत्यन्तपर्वतः (१)

**उपत्यकाया नाम** – उपत्यका (२)

**अधित्यकायाः नाम** - अधित्यका (२)

**खनिधातोर्नाम** – धातुः (१)

**गैरिकस्य नाम** – गैरिकः (७)

**निकुञ्जस्य नामनी** – निकुञ्जम् (५), कुञ्जम् (५)

## अभ्यासः

१. **पाषाणस्य सर्वाणि नामानि श्रावयत ।**

२. **निर्झरस्य नामानि वदत ।**

३. **परस्परं मेलयत**

| | |
|---|---|
| शैलः | हेमकूटः |
| लोकालोकः | शिला |
| विन्ध्यः | गह्वरः |
| उपलः | चक्रवालः |
| वारिप्रवाहः | अहार्यः |
| देवखातः | झरः |

४. **सङ्क्षेपेण उत्तरयत**

(क) अकरस्य नामनी के स्तः ?

(ख) गुहाया नामानि कानि ?

(ग) प्रपातस्य कति नामानि सन्ति ?

(घ) पर्वतविशेषाणां नामानि कानि ?

५. **नेपालिभाषयामर्थं लिखत**

अचलः, निषधः, त्रिकुटः, प्रस्तरः, गुहा, निकुञ्जम्, पादः ।

६. **पर्यायान् लिखत**

कुञ्जम्, खनिः, बिलम्, उत्सः, झरः, अतटः, उपलः ।

७. **पर्वतस्य सर्वाणि नामानि लिखत ।**

८. **गिरिशब्दस्य सर्वाणि रूपाणि लिखत ।**

९. **संस्कृतेनानुवादं कुरुत**

(क) नेपालमा अग्ला पहाडहरू धेरै छन् ।

(ख) नेपालको सबैभन्दा लामो झर्ना ह्यातुङ हो ।

(ग) महेन्द्र नामको गुफा पोखरामा रहेको छ ।

(घ) तिम्रो मन त पाषाण जस्तै रहेछ ।

(ङ) नेपाल विभिन्न रत्नहरूको खानी हो ।

# पुस्तकप्रेषणाय पत्रम्

रामजानकीपुस्तक-मन्दिरम्, जनकपुरधाम
दिनांकः २०७९/०९/१५

श्रीमन्तः प्रबन्धकमहोदयाः,
सत्यविद्याप्रकाशनगृहम्, काष्ठमण्डपः ।

**विषयः पुस्तकप्रेषणम् ।**

महोदयाः,

एतदवगत्य भवतां परमा प्रसन्नता भविष्यति यद् अस्मदीयेन पुस्तकमन्दिरेण नेदीयसि एव भविष्ये धार्मिकपुस्तकविक्रयकक्षः सञ्चालयिष्यते । अत्रत्यानां स्थानीयवासिनां याच्ञायामनुरोधे चासौ कक्षः सञ्चालयिष्यमाणो वर्तते । भवन्तो जानन्ति एव यद् अत्र विविधानां धार्मिकसमुदायानां निवासोऽस्ति । धार्मिकक्षेत्रस्य कारणादपि अत्र धार्मिकपुस्तकानां चिराय अत्यावश्यकता अनुभूयमाना वर्तते । एतस्या आवश्यकतायाः परिपूर्तये भवन्तोऽधो लिखितानि पुस्तकानि प्रेषयन्तु इति अनुरुणध्मि । पुस्तकानां मूल्यस्य प्रयोजनाय रूप्यकाणां दशसहस्राणां वित्ताङ्कनपत्रं च अनेनैव पत्रेण सह प्रेषितं वर्तते । रूप्यकेषु न्यूनेषु अधिकेषु वा सत्सु पश्चात् मूल्यसंयोजनं भविष्यति एवेति निश्चिनोमि । कृपया अभियाचितानि पुस्तकानि द्रुतसाधनेन शीघ्रं प्रेषयन्तु इति भवन्तः प्रार्थ्यन्ते ।

**पुस्तकविवरणम्**

| क्र. सं. | पुस्तकनामानि | सङ्ख्या |
|---|---|---|
| १. | श्रीमद्भागवतमहापुराणम् | ५ |
| २. | श्रीमद्भगवद्गीता | १० |
| ३. | श्रीमद्रामचरितमानसम् | १० |

| | | |
|---|---|---|
| ४. | श्रीस्वस्थानीव्रतकथा | १० |
| ५. | वेदान्तसारः | ५ |
| ६. | एकादशीमाहात्म्यम् | १० |
| ७. | सङ्क्षिप्तरामायणम् | ८ |
| ८. | सङ्क्षिप्तमहाभारतम् | ८ |

भावत्कः
बजरङ्गलालः यादवः
प्रबन्धकः

## शब्दार्थाः

| | |
|---|---|
| अवगत्य | थाहा पाएर, जानेर |
| नेदीयसि | निकटको, ज्यादै नजिकको |
| विक्रयकक्षः | बेच्ने ठाउँ, बिक्रीस्थल |
| परिपूर्तये | पूरा गर्न, परिपूर्ण बनाउन, परिपूर्तिका निम्ति |
| वित्ताङ्कनपत्रम् | चेक |
| निश्चिनोमि | विश्वास दिलाउँछु, निश्चय गर्छु |
| द्रुतसाधनेन | छिटो आइपुग्ने माध्यमबाट, ढुवानीको द्रुत माध्यमद्वारा |

## अभ्यासः

### श्रवणं भाषणञ्च

**१. एकश्छात्रः पाठस्य वाचनं कुरु, अन्ये सावधानतया शृणुत ।**

**२. पाठात् षष्ठीविभक्तेर्बहुवचनान्तानि पदानि अन्विष्य श्रावयत ।**

**३. पाठस्य सकलानि समस्तपदानि कथयत ।**

## ४. अधस्तनानां पदानां शुद्धोच्चारणं कुरुत

विक्रयकक्षः, अत्रत्यानाम्, धार्मिकक्षेत्रस्य, अत्यावश्यकता, परिपूर्तये, प्रेषयन्तु, अनुरुणध्मि, वित्ताङ्कनपत्रम्, निश्चिनोमि, द्रुतसाधनेन ।

## ५. पदार्थान् निगदत

अत्रत्यानाम्, याचनायाम्, निवासः, अनुभूयमाना, मूल्यसंयोजनम् ।

## ६. पाठे प्रयुक्ताधारेण अधोलिखितानां पदानां कारकविभक्ती वदत

अनुरोधे, प्रयोजनाय, सत्सु, कृपया, साधनेन ।

## ७. पाठाधारेण एकस्मिन् वाक्ये उत्तराणि कथयत

(क) नेदीयसि एव कः सञ्चालयिष्यते ?

(ख) स्थानीयवासिनां याचना कास्ति ?

(ग) धार्मिकसमुदायानां निवासः कुत्र वर्तते ?

(घ) पुस्तकानां क्रयणाय कति रूप्यकाणि प्रेषितानि सन्ति ?

(ङ) पुस्तकाय प्रेषितं मूल्यं किं भवितुं शक्ष्यति ?

(च) प्रसन्नताया विषयः कः ?

# पठनम्

## १. अधोलिखितं गद्यभागं सस्वरं पठित्वा प्रश्नानुत्तरयत

नेपाले नैकविधानि सांस्कृतिकानि पौराणिकानि च क्षेत्राणि सन्ति । तानि अस्माकं हृदयं गौरवबोधनेन उज्ज्वलितं कुर्वन्ति । एतेषु जनकपुरमन्यतमं वर्तते । पुरा विदेहस्य राजर्षेर्जनकस्य राजधानी इयमेव नगरी आसीत् । महर्षेर्याज्ञवल्क्यस्य ज्ञानसाधनाया भूरपि इयमेव अवर्तत । शस्त्रसन्धानस्य अपेक्षया शास्त्रानुशीलनेन जनकपुरं प्रसिद्धमासीत् । रामजानक्योर्विवाहस्य कारणादपि भूमिरेषा पुण्यतमा मन्यते । विवाहपञ्चम्यां तु नगरमेतद् दर्शनीयमेव भवति । सीतारामयोर्विवाहयात्रायां सहभागिनो भवितुं पारेलक्षं भक्तजना नेपालस्य विभिन्नेभ्यः स्थानेभ्यः, भारतदेशाच्चात्र आयान्ति । महोत्सवोऽसौ

रामजानक्योर्यथार्थविवाह इव प्रतिभाति । अस्य नगरस्य सुरक्षणं सौन्दर्यवर्धनं चास्माकं सर्वेषां कर्तव्यं वर्तते ।

(क) अस्माकं हृदयं कानि उज्ज्वलितं कुर्वन्ति ?

(ख) जनकपुरं कस्य राजधानी आसीत् ?

(ग) महर्षिर्याज्ञवल्क्यः कुत्र ज्ञानसाधनामकरोत् ?

(घ) जनकपुरस्य पुण्यतायाः कारणं किम् ?

(ङ) जनकपुरं कदा दर्शनीयं भवति ?

(च) अस्माकं कर्तव्यं किम् ?

## २. अधस्तनं गद्यांशं पठित्वा समुचितं शीर्षकं निर्धारयत

प्युठानमण्डले स्वर्गद्वारीनामधेयं प्रसिद्धं तीर्थस्थलं वर्तते । अत्र स्वर्गद्वारीमहाप्रभुर्जपहोम-यागादीनि अनुष्ठानानि सम्पादयति स्म । तेष्वनुष्ठानेषु दैनिकहवनरुद्राभिषेकादिकार्याणि अद्यापि प्रचलन्ति । गोवंशस्य पालनं सुरक्षणं चास्य तीर्थस्थलस्य अपरा विशेषता वर्तते । जनाः सिद्धभूमिरियमिति विश्वसन्ति । मनोरथस्य पूर्तयेऽत्र बहवस्तीर्थयात्रिण आगच्छन्ति । स्थलमेतदुच्चपर्वतीयभूभागे वर्तते । एतदेव कारणमस्ति यद् जनाः स्थलमिदं स्वर्गद्वारीं प्रवदन्ति । य एकवारमत्र प्राप्नोति स स्थलमिदं न कदापि विस्मरति ।

## ३. अधोलिखितं गद्यांशं पठित्वा सम्बन्धसूचकानि नामानि वदत

मानवः समाजे वसति । समाजश्च परिवारैः सङ्घटितो भवति । परिवारस्य अर्थविषये वयं विचारयितुं शक्नुमः । वस्तुतः सम्बन्धिनां समूह एव परिवारो भवति । ये जना निकटस्थाः सन्ति ते एव अस्माकं सम्बन्धिनो भवन्ति । विवाहादपि सम्बन्धिनो वर्धन्ते । एकस्मिन् गृहे पतिः, पत्नी, पुत्राः, पुत्र्यश्च भवितुं शक्नुवन्ति । एक एव जनः पतिः, पिता, पुत्रः, पौत्रः, मातुलः, भागिनेयः, पितृव्यः, अग्रजः, अनुजः, पितामहश्च भवितुं शक्नोति । एका एव महिला माता, पत्नी, पुत्री, पौत्री, मातुलानी, अग्रजा, अनुजा, पितामही, भ्रातृजाया, श्वश्रूश्च भवितुं शक्नोति । वयं निकटसम्बन्धिभिः सह स्थातुमिच्छामः । दूरसम्बन्धिभिः सहापि मैत्रीं स्थापयामः । शान्तपरिवारस्य कृते सिद्धान्तोऽयम् अनुसरणीयो भवति ।

## ४. पाठस्थं पत्रं पठित्वा क्रियापदानि अभ्यासपुस्तिकायामनुलिख्य तेषां वाक्ये प्रयोगं दर्शयत ।

## लेखनम्

### १. विपरीतार्थके पदे परस्परं मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| अरिः | कातरः |
| देवः | क्रूरः |
| दयालुः | दानवः |
| साहसिकः | निशाकरः |
| उष्णः | मित्रम् |
| दिवाकरः | शीतलः |

### २. पाठाधारेण समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत

(क) धार्मिकपुस्तकानामपि विक्रयणं भवति । (    )

(ख) स्थानीयवासिनः पुस्तकानि नेच्छन्ति । (    )

(ग) जनकपुरं धार्मिकक्षेत्रं वर्तते । (    )

(घ) पुस्तकस्य मूल्यं प्रेषितं न वर्तते । (    )

(ङ) पुस्तकानि सुरक्षया स्थापनीयानि । (    )

### ३. पाठमाधृत्य रिक्तस्थानं पूरयत

(क) पुस्तकं .......... भवेत् । (पठनीयं/क्रयणीयम्)

(ख) सीतारामयोर्विवाहः ........... अभवत् । (जनकपुरे/अयोध्यायाम्)

(ग) ............ पुस्तकप्रकाशकगृहं वर्तते । (सत्यविद्या/रामजानकी)

(घ) जनकस्य राजधानी ........ आसीत् । (जनकपुरम्/काष्ठमण्डपः)

(ङ) पुस्तकक्रयणाय रूप्यकाणि ......... भवन्ति । (आवश्यकानि/अनावश्यकानि)

(ग) ईश्वरे ......... कुरु । (प्रीतिः, द्वितीया)

४. **स्वकीयानि कार्याणि क्रमनिर्धारणेन लिखत**

भ्रमणम्, लेखनम्, क्रीडनम्, पठनम्, गायनम्, भाषणम्, ध्यानम्, तीर्थाटनम्, मित्रमेलनम्, नर्तनम् ।

५. **पदानि प्रयुज्य वाक्यानि रचयत**

अवगत्य, परमा, नेदीयसि, याचना, चिराय, परिपूर्तिः, मूल्यम्, रूप्यकाणि, कृपया, प्रेषयति ।

६. **उदाहरणमनुसृत्य निर्दिष्टसंरचनया पदानां परिचायनं कुरुत**

| **यथा–** | **पदम्** | **पदवर्गः** | **वचनम्** | **लिङ्गम्** |
|---|---|---|---|---|
| प्रसन्नता | नाम | एकवचनम् | स्त्रीलिङ्गम् | |
| भवताम् | ............. | ........... | ............. | ............. |
| कक्षाः | ............. | ............ | .............. | ............. |
| कारणम् | ............. | ........... | ............. | ............. |
| एतस्याः | ............. | ........... | ............. | ............. |
| पत्रम् | ............. | ........... | .............. | ............. |
| पुस्तकानि | ............. | ............ | .............. | ............. |

७. **कार्यालयीयपत्रलेखनाय आवश्यकतत्त्वानां विवरणं यथाक्रमं सारिण्यां प्रदर्शयत ।**

**अनुप्रयोगः**

१. **अधो निर्दिष्टायाः समस्यायाः समाधानाय क उपायः प्रभावकारी भवति ? निर्दिष्टविधायामेकं निदर्शनरूपं लिखत**

विशेषतो नेपालस्य तराईक्षेत्रे वन्यहस्तिनो ग्रामीणान् भृशं पीडयन्ति । ते मनुष्यान् घ्नन्ति, गृहाणि कृष्युत्पादनानि च विनाशयन्ति । रात्रौ अपि एतेषामातङ्को वर्धते एव । तराईवासिनां मध्ये कतिचन जना हस्तिनामाक्रमणेन मृताः । एष दुःखदो विषयो वर्तते ।

(क) दैनिकीलेखनम्

(ख) नगरप्रमुखाय ग्रामप्रमुखाय वा निवेदनप्रेषणम्

(ग) हस्तिनां मारणम्

(घ) ग्रामीणानां सुरक्षादलनिर्माणम्

(ङ) स्वस्थानात् स्थानान्तरणम्

(च) वनकार्यालयाय सूचनम्

२. **अधोलिखितं गद्यांशमाधृत्य पत्रमेकं लिखत**

सुधीर एको व्यापारी वर्तते । स धनकुटामण्डले विद्यालयीयच्छात्राणां परिधानस्य व्यापारं करोति । तस्य वस्त्रालयस्य नाम 'सुधीरपरिधानम्' इति वर्तते । स विराटनगरस्य विजयवस्त्रोत्पादनशालातः वस्त्राणि अभियाच्यमानः पत्रं लिखति । पत्रे विंशतिसहस्राणां रूप्यकाणामग्रिमधनाङ्कनपत्रमपि समाविष्टं वर्तते । विद्यालयेषु नवीन-कक्षारम्भो वैशाखाद् भवति । सुधीर एतदेव विचार्य फाल्गुनस्य द्वितीये सप्ताहे पत्रं लिखति । पत्रे श्वेतवस्त्रस्य एका पेटिका नीलवस्त्रस्य तिस्रः पेटिकाश्च याचिता वर्तन्ते । वस्त्रं यथासमयं प्राप्स्यते इति सुधीरो विश्वसिति ।

## व्याकरणबोधः

### शब्दरूपावली

**सखि–**शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सखा | सखायौ | सखायः |
| द्वितीया | सखायम् | सखायौ | सखीन् |
| तृतीया | सख्या | सखिभ्याम् | सखिभिः |
| चतुर्थी | सख्ये | सखिभ्याम् | सखिभ्यः |
| पञ्चमी | सख्युः | सखिभ्याम् | सखिभ्यः |
| षष्ठी | सख्युः | सख्योः | सखीनाम् |
| सप्तमी | सख्यौ | सख्योः | सखिषु |
| सम्बोधनम् | हे सखे ! | हे सखायौ ! | हे सखायः ! |

**पति**-शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | पतिः | पती | पतयः |
| द्वितीया | पतिम् | पती | पतीन् |
| तृतीया | पत्या | पतिभ्याम् | पतिभिः |
| चतुर्थी | पत्ये | पतिभ्याम् | पतिभ्यः |
| पञ्चमी | पत्युः | पतिभ्याम् | पतिभ्यः |
| षष्ठी | पत्युः | पत्योः | पतीनाम् |
| सप्तमी | पत्यौ | पत्योः | पतिषु |
| सम्बोधनम् | हे पते ! | हे पती ! | हे पतयः ! |

पतिशब्दान्तशब्दानां तु हरि-शब्दवदेव रूपाणि जायन्ते। यथा- भूपति-सभापति-गणपति-पशुपति-नृपति- सीतापत्यादीनां शब्दानां तृतीयैकवचने भूपतिना, सभापतिना, गणपतिना इत्यादीनि हरिवद् रूपाणि भवन्ति। एवं चतुर्थ्यादौ अपि हरिवदेव रूपाणि बोध्यानि, न तु पतिवत्। इकारान्तपुंलिङ्गशब्देषु सखि-पति-शब्दौ एव विशेषौ।

**१. कोष्ठकात् शुद्धं शब्दरूपं विचित्य रिक्तस्थानं पूरयत**

(क) पत्नी ......... सह मन्दिरं गच्छति। (पत्या, पतिना)

(ख) ........ नमः। (गणपत्ये, गणपतये)

(ग) मम प्रियतमस्य ......... नाम विवेकोऽस्ति। (सख्युः, सखेः)

(घ) .......... महान् स्नेहो वर्तते। (सखौ, सख्यौ)

(ङ) दुराचारिणः ........... बिभ्यति। (भूपत्युः, भूपतेः)

**२. कोष्ठस्थसङ्केतमनुसृत्य रिक्तस्थानं पूरयत**

(क) भवत्याः ......... नाम किम्? (पति- षष्ठ्येकवचनम्)

(ख) ........ नमो नमः। (पशुपति- चतुर्थ्येकवचनम्)

(ग) भक्तः ......... वरदानमवाप्नोति। (गणपति- पञ्चम्येकवचनम्)

(घ) मम .......... प्रायेण शनैर्वदति । (सखि- प्रथमैकवचने)

(ङ) एते ........... परस्परं मिलित्वा क्रीडन्ति । (सखि- प्रथमाबहुवचने)

(च) अद्य बहुकालपश्चात् .......... मिलित्वा अहं प्रसन्नोऽस्मि । (सखि- द्वितीयैकवचनम्)

**३. प्रदत्तानां पदानां वाक्ये प्रयोगं दर्शयत**

सखायौ, पत्ये, नरपतेः, सख्या, पत्युः, सख्यौ, सभापतिना, सखीनाम्, पतिम् ।

**४. पशुपति-शब्दस्य सर्वाणि रूपाणि लिखत ।**

**अव्ययपदप्रयोगः**

**५. वाक्यानि पठित्वा रेखाङ्कितानां पदानां स्वशब्दैर्वाक्ये प्रयोगाभ्यासं कुरुत**

(क) यदि सम्यक् पठसि तर्हि साफल्यं लभसे ।

(ख) यदि सुवृष्टिर्भविष्यति तर्हि सुभिक्षञ्च भविष्यति ।

(ग) यदा धर्मस्य ग्लानिर्भवति तदा दुष्टानां विनाशाय भगवतो भूमौ अवतार आवश्यको भवति ।

(घ) यदा शिक्षकाः कक्षायां प्रविशन्ति तदा छात्राः पठनाय सज्जा भवन्ति ।

(ङ) यावद् लोभान्न मुच्यते तावत् कष्टमनुभूयते ।

(च) पिता पुत्रं कथयति- यावद् निद्रा न आयाति तावत् पुस्तकं पठतु ।

(छ) यथा कर्म तथैव फलं भवति ।

(ज) यथा गुरुरुपदिशति तथा करोषि चेदवश्यमेव कल्याणं भवेत् ।

**६. सापेक्षिके अव्ययपदे परस्परं मेलयित्वा वाक्येषु योजयत**

| | |
|---|---|
| यथा | तावत् |
| यावत् | तर्हि |
| यदा | तथा |
| यदि | तदा |

**७. समुचितविषयं बुद्ध्या परिकल्प्य रिक्तस्थानं पूरयित्वा वाक्यानि रचयत**

(क) यदि दुर्जनसङ्गतिं करोषि तर्हि.............................. ।

(ख) .............................. तावत् अत्रैव तिष्ठ ।

(ग) यथा कथनं .............................. भवेत् ।

(घ) ....................... तदा शरीरं स्वस्थं भवति ।

**८. शिक्षकाद् यथावश्यकं साहाय्यमवाप्य पाठे प्रयुक्तानामव्ययपदानां सूचीं निर्माय प्रतिपदं स्वशब्दैर्वाक्ये प्रयोगं दर्शयत ।**

## कोषानुशीलनम्

**सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः । कण्ठीरवो मृगारिपुर्मृगदृष्टिर्मृगाशनः ॥**
**पुण्डरीकः पञ्चनखचित्रकायमृगद्विषः । शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः ॥**
**वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः । दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥**
**कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः । मर्कटो वानरः कीशो वनौका अथ भल्लुके ॥**
**ऋक्षाच्छभल्लभल्लूका गण्डके खड्गखड्गिनौ । लुलायो महिषो वाहद्विषत्कासरसैरिभाः ॥**
**स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः । शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥**
**ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् । त्रयो गौधारगौधेरगौधेया गोधिकात्मजे ॥**
**श्वावित्तु शल्यस्तल्लोम्नि शलली शललं शलम् । वातप्रमीर्वातमृगः कोकस्त्वीहामृगो वृकः ॥**
**मृगे कुरङ्गवातायुहरिणाजिनयोनयः । ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु ॥**
**कदली कन्दली चीनश्चमूरुप्रियकावपि । समूरुश्चेति हरिणा अमी अजिनयोनयः ॥**
**कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः । गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥)**
**गन्धर्वः शरभो रामः सृमरो गवयः शशः । इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः ॥**

### पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**सिंहस्य नामानि** – सिंहः (१), मृगेन्द्रः (२) पञ्चास्यः (१), हर्यक्षः (१), केसरी (१), हरिः (१), कण्ठीरवः (१), मृगरिपुः (१), मृगदृष्टिः (१), मृगाशनः (१), पुण्डरीकः (१), पञ्चनखः (१, ) चित्रकायः (१), मृगद्विट् (१)

**व्याघ्रस्य नामानि** – शार्दूलः (१), द्वीपी (१), व्याघ्रः (१)

**तरक्षोः नामनी** – तरक्षुः (१), मृगादनः (१)

**वराहस्य नामानि** – वराहः (१), सूकरः (१), घृष्टिः (१), कोलः (१), पोत्री (१, ) किरिः (१), किटिः (१), दंष्ट्री (१), घोणी (१), स्तब्धरोमा (१), क्रोडः (१), भूदारः (१)

**वानरस्य नामानि** – कपिः (१), प्लवङ्गः (१), प्लवगः (१) शाखामृगः (१), वलीमुखः (१), मर्कटः (१), वानरः (१), कीशः (१), वनौकाः (१)

**भल्लुकस्य नामानि** – ऋक्षः (१), अच्छः (१), भल्लः (१), भल्लुकः (१)

**गण्डकस्य नामानि** – गण्डकः (१), खड्गः (१), खड्गी (१)

**महिषस्य नामानि** – लुलायः (१), महिषः (१), वाहद्विषत् (१), कासरः (१), सैरिभः (१)

**जम्बुकस्य नामानि** – शिवा (२), भूरिमायः (१), गोमायुः (१), मृगधूर्तकः (१), शृगालः (१), वञ्चकः (१), क्रोष्टा (१), , फेरुः (१) फेरवः (१), जम्बुकः (१)

**विडालस्य नामानि** – ओतुः (१), बिडालः (१), मार्जारः (१), वृषदंशकः (१), आखुभुक् (१)

**गौधारस्य नामानि** – गौधेरः (१), गौधारः (१), गौधेय : (१)

**शल्यस्य नामनी** – श्वावित् (१, शल्यः (१)

**शल्यस्य लोम्नः नामानि** – शलली (२), शललम् (३), शलम् (३)

**वातमृगस्य नामनी** – वातप्रमीः (१), वातमृगः (१)

**वृकस्य नामानि** – कोकः (१), ईहामृगः (१), वृकः (१)

**मृगस्य नामानि** – मृगः (१), कुरङ्गः (१), वातायुः (१), हरिणः (१), अजिनयोनिः (१)

**एण्याश्चर्मादेः नाम** – ऐणेयम् (७)

**एणस्य मांसचर्मादेः नाम** - ऐणम् (७)

**कृष्णसारस्य नामानि** – कदली (२), , कन्दली (२) चीनः (१, ) चमूरुः (१), , प्रियकः (१) समूरुः (१), कृष्णसारः (१), रुरुः (१), म्यङ्कुः (१)

**मृगविशेषस्य नामानि** – रङ्कुः (१), शम्बरः (१), रौहिषः (१), गोकर्णः (१), . चमरः (१), गन्धर्वः (१), शरभः (१), रामः (१), सृमरः (१), गवयः (१), शशः (१)

## अभ्यासः

१. **जम्बुकस्य नामानि श्रावयत ।**

२. **सिंहस्य सर्वाणि नामानि वदत ।**

३. **मूषकानां नामानि कण्ठस्थं श्रावयत ।**

४. **अर्थानुसारेण परस्परं मेलयत**

| | |
|---|---|
| लुलायः | केशरी |
| कोलः | मृगादनः |
| बिडालः | चमरः |
| हरी | मर्कटः |
| रामः | ओतुः |
| तरक्षुः | वराहः |

५. **नेपालीभाषायामनुवादं कुरुत**

हरी, कोलः, कीशः चित्रकायः, ऋक्षः, गण्डकः, शलम् मार्जारः, गौधारः, ऐणम्, रुरुः ।

६. **पर्यायान् लिखत**

वातायुः, द्वीपी, शल्यः, भल्लुकः, खड्गः, सैरिभः, फेरुः, मार्जारः, कोकः, ।

७. **मृगविशेषस्य सर्वाणि नामानि लिखत ।**

८. **कोष्टृशब्दस्य सर्वाणि रूपाणि लिखत ।**

९. **नेपालीभाषायामनुवादं कुरुत**

(क) जन्तुशालायां भल्लुकाः, वानराः, वराहाश्च सन्ति परन्तु हर्यक्षाः न सन्ति ।
(ख) जम्बुकोऽतीव धूर्तो भवति ।
(ग) न श्रूयते हेममयः कुरङ्गः ।
(घ) आखुभुक् मूषकान् व्यापादयति ।
(ङ) जम्बुकात् खड्गी विशालतरो भवति ।

# संस्कृतसेवी दुर्गाप्रसाददवाडी

नेपाले बहुभिः संस्कृतविद्वद्भिश्चिराय संस्कृतसेवा विधीयमाना वर्तते । एतेषु संस्कृतविद्वत्सु दुर्गाप्रसाददवाडी अन्यतमोऽस्ति । अनेन नेपाले भारते च संस्कृतस्य अध्यापनमनुसन्धानञ्च सम्पाद्य शिक्षासेवया सुकृतम् अर्जितम् । असौ गण्डकीप्रदेशस्य कास्कीमण्डलवर्तिनि कास्कीकोटस्थाने पञ्चाशीत्यधिकैकोनविंशतिशततमे (१९८५) वैक्रमाब्दे माघमासस्य चतुर्थे दिवसे जातः । असौ सेतूपाध्यायदवाडी-मधीदेव्योश्चतुर्थः पुत्र आसीत् । दुर्गाप्रसादः कृषिकर्मणि निमग्नाद् विदुषः पितुः सकाशात् प्रारम्भिकीं शिक्षां लब्धवान् ।

दुर्गाप्रसादस्य संस्कृतविद्याभ्यासो व्यसनमेव आसीत् । असौ काशीस्थिताद् राजकीयसंस्कृतमहाविद्यालयाद् व्याकरणविषये १९५३ तमे ख्रिष्टवर्षे आचार्यपरीक्षामुत्तीर्णवान् । एवमेव असौ वाराणसेयसंस्कृतविश्वविद्यालयात् १९५८ तमे ख्रिष्टवर्षे वेदान्तविषये, १९६३ तमे ख्रिष्टाब्दे दर्शनविषये च आचार्यपरीक्षामुदतरत् । असौ आगराविश्वविद्यालयात् १९६१ तमे ख्रिष्टाब्दे हिन्दीविषये, १९७१ तमे ख्रिष्टवर्षे संस्कृतविषये च स्नातकोत्तरोपाधिं प्राप्नोत् । पञ्चसु विषयेषु उत्तीर्णाचार्यपरीक्षो दुर्गाप्रसादो नेपालस्य संस्कृतसेवी विद्वानासीत् । अनेन राजकीयसंस्कृतमहाविद्यालयात् शिक्षाशास्त्रीयोपाधिश्च प्राप्त आसीत् ।

दुर्गाप्रसादो भागवतचतुर्वेदि-मुरलीधरपाण्डेय-लालविहारिमिश्रेभ्यः शास्त्रीयज्ञानम् अध्यगच्छत् । असौ 'वेदप्राच्यदर्शनधर्मकर्मसिद्धान्तः, एकमध्ययनम्' इति विषये २०४२ तमे विक्रमवर्षे त्रिभुवनविश्वविद्यालयाद् विद्यावारिधेरुपाधिम् अलभत । दुर्गाप्रसादस्य शिक्षणं भारतात् प्रारब्धम् । एष तत्र सप्तदशवर्षाणि यावद् अध्यापनमकरोत् । ततो नेपालमागत्य असौ त्रिभुवनविश्वविद्यालये उपप्राध्यापकपदे प्रविष्टवान् । असौ वर्षाणां पञ्चविंशतिं यावत् शिक्षणसेवां कृत्वा नेपालसंस्कृतविश्वविद्यालयस्य प्राध्यापकपदात् २०५२ विक्रमवर्षे सेवानिवृत्तोऽभवत् । दुर्गाप्रसादस्य जीवनं समग्रतो द्विचत्वारिंशद्वर्षाणि यावत् संस्कृतस्य अध्यापनेन व्यतीतम् ।

दुर्गाप्रसादस्त्रिभुवनविश्वविद्यालय-नेपालसंस्कृतविश्वविद्यालययोर्दर्शनविषयशिक्षण-समितेरध्यक्षः सर्वदर्शनपूर्वमीमांसाविभागस्य विभागाध्यक्षश्च भूत्वा कार्यमकरोत् । अस्य

शास्त्रीयवैदुष्येण बहवः संस्कृतच्छात्रा लाभान्विता अभवन् । असौ विविधासु संस्कृतकार्यशालासु गहनानि कार्यपत्राणि प्रस्तुतवान् । एष स्वधर्मस्य पालनाय सततं प्रयत्नमकरोत् ।

दुर्गाप्रसादो भाषा-संस्कृति-परम्परा-राष्ट्रियताः प्रति समर्पितो विद्वानासीत् । असौ आजीवनं नैष्ठिक आसीत् । राष्ट्रे विदेशेषु च आयोजितेषु हिन्दुसम्मेलन-सनातन-धर्ममहासम्मेलन-विश्वसंस्कृतसम्मेलनेषु सर्वकारस्य विश्वविद्यालयस्य च पक्षतः सहभागी भूत्वा असौ राष्ट्रस्य गौरवमुन्नतं कृतवान् । दुर्गाप्रसादो यथा शास्त्राध्ययनाध्यापनयोर्दत्तचित्त आसीत् तथैव सामाजिककार्येष्वपि क्रियाशीलोऽभवत् । नेपालसंस्कृतपरिषदः, कीर्तिपुरवर्तिनो नेपालप्राध्यापकसङ्घस्य, नेपालविद्वत्सभायाः, वाराणसीस्थिताया विद्याधर्मप्रचारिणीसभायाश्च विभिन्नेषु पदेषु स्थित्वा असौ प्राज्ञिक-शैक्षिक-धार्मिक-सामाजिक-सांस्कृतिककार्याणि सुष्ठु समपादयत् ।

पत्रिकाणां सम्पादनकार्येऽपि अस्य विदुषः कौशलमुल्लेख्यं दृश्यते । अमुना सुरभि-मर्यादा-विश्वहिन्दुस्मारिकानाम्न्यः पत्रिकाः सम्पादिताः । एतस्य भाषा-धर्म-संस्कृति-विज्ञानेतिहासविषयकाः शतशो निबन्धरचनाः पत्रपत्रिकासु प्रकाशिताः सन्ति । विद्वच्छिरोमणिना कुलचन्द्रगौतमेन लिखितस्य स्तवराजस्य नेपालीभाषायां व्याख्या एतेनैव विहिता वर्तते । अत्रापि एतस्य विशिष्टं वैदुष्यं बिम्बितं वर्तते ।

दुर्गाप्रसादः शालीनो विनयी दृढव्रती सदाचारी चासीत् । सर्वविधाः शास्त्रीयजिज्ञासाः समाधातुं एष समर्थः सुधीरासीत् । असौ सर्वानभिभावकान् विद्यार्थिनश्च संस्कृतं पठितुं प्रैरयत् । दुर्गाप्रसादः स्वसन्ततिमपि संस्कृतस्य सेवाध्ययनप्रचारेषु न्ययोजयत् । एष नेपाले संस्कृतशिक्षाया विकासाय विस्ताराय चाधिकं यत्नं कृतवान् । संस्कृतस्य संवर्धने असौ अहर्निशं क्रीयाशील आसीत् । संस्कृतसेवी दुर्गाप्रसाद ऊनसप्तत्यधिकद्विसहस्रतमवैक्रमाब्दस्य पौषमासस्य पञ्चविंशे दिवसे दिवङ्गतः । संस्कृतजगति दुर्गाप्रसादस्य नाम सदा श्रद्धया स्मर्यते, स्मरिष्यते च ।

## शब्दार्थाः

| | |
|---|---|
| चिराय | लामो समयका लागि |
| अन्यतमः | धेरै मध्ये एक |
| सुकृतम् | सत्कर्म, पुण्य |
| मण्डलवर्तिनि | जिल्लामा रहेको, जिल्लामा पर्ने |

| | |
|---|---|
| निमग्नः | डुबेको, कुनै काममा ध्यान एकत्रित गरेर लागेको |
| लब्धवान् | प्राप्त गरे |
| उदतरत् | उत्तर दिए |
| अध्यगच्छत् | जाने, प्राप्त गरे |
| प्रविष्टवान् | प्रवेश गरे |
| समग्रतः | समग्रमा, सबैतिरबाट |
| व्यतीतम् | बित्यो, बितेको |
| वैदुष्येण | विद्वत्ताले, विद्वत्ताद्वारा |
| आजीवनम् | जीवनभर |
| नैष्ठिकः | निष्ठा भएको |
| दत्तचित्तः | एकनासले चित्त लगाएको, एकाग्र |
| सुष्ठु | राम्रो किसिमले, राम्ररी |
| समपादयत् | सम्पादन गरे, पूरा गरे |
| कौशलम् | कुशलता, कुनै काम ठिकसँग गर्ने ढङ्ग |
| बिम्बितम् | प्रतिबिम्बित, देखिएको |
| शालीनः | नम्र, विनीत |
| दृढव्रती | आफ्नो सङ्कल्प वा काममा दृढ रहेको |
| समाधातुम् | समाधान गर्न |
| सुधीः | बुद्धिमान्, असल बुद्धि भएको |
| प्रैरयत् | प्रेरणा दिए, प्रेरित गरे |
| न्ययोजयत् | जोडे, लगाए |
| अहर्निशम् | दिनरात |

# अभ्यासः

## श्रवणं भाषणञ्च

१. **शिक्षकात् पाठं शृणुत, तदनु एकैकमनुच्छेदं विभज्य श्रावयत ।**

२. **उच्चारणे काठिन्यमनुभूतान् शब्दान् सङ्कलय्य सखिसमूहे शुद्धोच्चारणाभ्यासं कुरुत ।**

३. **अधोलिखिताः सङ्ख्या अक्षरेषु वदत**

१९५३, १९७३, १९८५, २०४२, २०५२, २०६९ ।

४. **पाठस्य तृतीयेऽनुच्छेदे वर्णितं विषयं निगदत ।**

५. **दुर्गाप्रसादस्य शैक्षिकोपाधीन् वदत ।**

६. **अधोलिखितान् प्रश्नान् श्रुत्वा सङ्क्षेपेण उत्तरं कथयत**

(क) दुर्गाप्रसादः कस्मिन् विषये विद्यावारिध्युपाधिं प्राप्तवान् ?

(ख) दुर्गाप्रसादस्य गुरवः के आसन् ?

(ग) दुर्गाप्रसादः कदा सेवानिवृत्तोऽभवत् ?

(घ) दुर्गाप्रसादः संस्कृतकार्यशालासु कानि प्रास्तौत् ?

(ङ) दुर्गाप्रसादः केषु विषयेषु निबन्धानरचयत् ?

(च) दुर्गाप्रसादः कीदृशः सुधीरासीत् ?

## पठनम्

१. **अधोलिखितं गद्यांशं पठित्वा प्रश्नानुत्तरयत**

नेपाले विभिन्नेषु कार्येषु निपुणा जना विविधैः सम्मानैरुपाधिभिश्च विभूषिताः सन्ति । एतेषु जनेषु सोमनाथशर्मासिग्देलः 'पण्डितराजः' इत्युपाधिना सम्मानित आसीत् । स पठने पाठने शास्त्रीयनिर्णये पाण्डित्यप्रदर्शने च निपुणो विद्वानासीत् । स अनुवादचन्द्रिका-

मध्यचन्द्रिका-साहित्यप्रदीपादर्शराघव- प्रतिसंस्कृतसिद्धान्तकौमुदी-नामधेयानि ग्रन्थरत्नानि अलिखत् । एतानि सोमनाथस्य नेपालीसंस्कृत-भाषयोरतुल्यं ज्ञानं व्यञ्जन्ति । सोमनाथस्य विषये अनुसन्धानमपि विहितमस्ति । तस्य विद्यावैभवं विचार्यैव तस्य प्रतिमा च संस्थापिता वर्तते । संस्कृतस्य गुरवो विद्यार्थिनश्च सोमनाथस्य नाम सश्रद्धं स्मरन्ति । तस्मै पण्डितराजस्य य उपाधिर्दत्तोऽस्ति स उचित एवेति विदुषां मतं वर्तते ।

(क) सोमनाथः केनोपाधिना सम्मानितः ?

(ख) सोमनाथः केषु कार्येषु निपुण आसीत् ?

(ग) सोमनाथस्य त्रीणि ग्रन्थरत्नानि कानि ?

(घ) सोमनाथस्य विषये किं कृतमस्ति ?

(ङ) सोमनाथस्य नाम के स्मरन्ति ?

## २. अधस्तनं गद्यभागं पठित्वा त्रिभिर्वाक्यैः सारांशं कथयत

काष्ठमण्डपोपत्यका कदा मानववासयोग्या भूतेति विषये निश्चयेन वक्तुं न शक्यते । उपत्यकेयं पुरा विशालो जलाशय आसीदिति पुरातत्त्वविदां विचारो वर्तते । चोभारस्थानाद् जलं निष्कास्य इदं भूमिर्वासाय निर्मितेति श्रूयते । अत्र प्राचीनाः सभ्यता-संस्कृति-परम्पराः प्रचलिताः सन्ति । अत्रैव सहस्रशो मन्दिराणि सन्ति । नातिशीतलता नात्युष्णता च अस्या वैशिष्ट्यं वर्तते । रम्यैः पर्वतैः परिवेष्टिता इयमुपत्यका प्रतिदिनं प्रदूष्यमाणा वर्तते । जनसङ्ख्याया यातायातसाधनानां च वृद्ध्या अव्यवस्थितवसत्या च काष्ठमण्डपोपत्यकाया गौरवं क्षीयमाणं दृश्यते । अत्र सर्वैः गभीरतया चिन्तनीयम् ।

## ३. अधोलिखितानि सूत्राणि पाठाधारेण क्रमं निर्धार्य पठत

(क) स वर्षद्वयस्य पश्चात् प्रवेशिकापरीक्षायां सहभागी भविष्यति ।

(ख) स विलम्बेन कार्यं करोति ।

(ग) शैलेश एको विद्यार्थी वर्तते ।

(घ) स अधुना अष्टमकक्षायां पठति ।

(ङ) स नववादने विद्यालयं गच्छति ।

(च) स षड्वादने उत्तिष्ठति ।

(छ) रात्रौ नववादने स्वपिति ।

(ज) सायं पञ्चवादने क्रीडति ।

(झ) विद्यालयस्य अल्पाहारसमये अल्पाहारं करोति, जलं च पिबति ।

(ञ) दशवादने कक्षां प्रविशति ।

(ट) प्रातः सप्तवादने दन्तधावनं मुखप्रक्षालनं च करोति ।

**४. पाठस्य द्वितीयानुच्छेदं सस्वरं पठित्वा कक्षायां श्रावयत ।**

**५. पाठस्य उपान्त्यस्यानुच्छेदस्य मौनपठनं विधाय सन्धियुतानि पदानि रेखाङ्कितानि कुरुत ।**

## लेखनम्

**१. कोष्ठकात् समुचितं पदं विचित्य रिक्तस्थानं पूरयत**

(क) दुर्गाप्रसादेन .......... प्रदर्शितं वर्तते । (सुकृतम्/संस्कृतम्)

(ख) सः २०४२ तमे विक्रमवर्षे .......... लब्धवान् । (आचार्योपाधिं/विद्यावारिध्युपाधिं)

(ग) स नेपाले ........ अभवत् । (प्राध्यापकः/अध्यापकः)

(घ) दुर्गाप्रसाद ....... सम्पादितवान् । (पत्रिकाः/पुस्तिकाः)

(ङ) स संस्कृतस्य पठनाय ........ अदात् । (प्रेरणाम्/सम्मतिम्)

(च) दुर्गाप्रसादः ...... वर्तते । (स्मरणीयः/दर्शनीयः)

**२. सन्धिविच्छेदं कृत्वा लिखत**

शिक्षाशास्त्र्युपाधिः, सेवानिवृत्तोऽजायत, अभ्यासालोचनानुगमनानि, सेवाध्ययनानुसन्धानानि, शुभकामनादानप्रदानम् ।

**३. पदानि प्रयुज्य वाक्यानि रचयत**

अन्यतमः, सुकृतम्, निमग्नः, अध्यगच्छत्, वर्षाणाम्, व्यतीतम्, गहनानि, आजीवनम्, गौरवम्, बिम्बितम्, सुधीः, स्मरति ।

४. **उदाहरणमनुसृत्य समापकक्रियापदानां लकारं कालञ्च लिखत**

(क) दुर्गाप्रसादः कास्कीमण्डले जात आसीत् ।

**यथा–** लकारः - लङ् । कालः - भूतकालः ।

(ख) स पितुः सकाशात् शिक्षां अलभत ।

(ग) छात्रा गुरुभ्यो विद्यामधिगच्छन्ति ।

(घ) विद्यालये अनुशासनस्य पालनं भवति ।

(ङ) परिश्रमी छात्र उत्तीर्णो भविष्यति ।

(च) अहं शनिश्चरवासरे मन्दिरमगच्छम् ।

(छ) सत्यवादिनः सुखं प्राप्नुवन्ति ।

५. **अधोलिखितेषु वाक्येषु अशुद्धिं संशोधयत**

(क) परिश्रमाद् विना सफलता न प्राप्यते ।

(ख) दुर्गाप्रसादः संस्कृतशास्त्राणि पठ्यते ।

(ग) सोमनाथस्य ग्रन्थाः प्रसिद्धानि सन्ति ।

(घ) क्रीडकाः कन्दुकं क्रीडन्ति ।

(ङ) काष्ठमण्डपे प्रदूषणं वर्धमानोऽस्ति ।

(च) संस्कृतविदुषां योगदानं राज्येनापि स्मरणीयो वर्तते ।

६. **संस्कृतभाषायामनुवादं कुरुत**

(क) सज्जनहरू काममा दत्तचित्त हुन्छन् ।

(ख) मानिसले कृतज्ञ हुनुपर्छ ।

(ग) ज्ञानले सत्यको बाटो देखाउँछ ।

(घ) पाणिनिको व्याकरणलाई विश्वले प्रशंसा गरेको छ ।

(ङ) नेपालीहरू सुन्दर भविष्यको कल्पना गर्छन् ।

(च) आमालाई ईश्वरको अर्को रूप मानिएको छ ।

(छ) परोपकारद्वारा आत्मसन्तुष्टि पाइन्छ ।

## अनुप्रयोगः

१. **जन्म–जन्मस्थान–पितृनामादिकमुल्लिख्य स्वकीयं वैयक्तिकविवरणं निर्मात ।**

२. **उदाहरणमनुसृत्य दुर्गाप्रसादेन विहितानां षण्णां कार्याणां सूचीं निर्माय शिक्षकं दर्शयत**

यथा- (क) परिश्रमेण शास्त्राध्ययनम् (ख) भारते नेपाले च चिराय अध्यापनम्

(ग) .............. (घ) ...............

(ङ) ................ (च) ................

३. **यूयं कीदृशानां जनानां जीवनवृत्तं पठितुमिच्छथ ? इष्टस्य वर्गस्य पक्षे पञ्च कारणानि लिखत**

(क) ऐतिहासिकवीरः (ख) साहित्यकारः (ग) वैज्ञानिकः

(घ) भाषा-संस्कृतिविद् (ङ) क्रीडकः (च) पर्वतारोही

(छ) राजनीतिज्ञः (ज) सफलव्यापारी उद्योगपतिश्च (झ) समाजसेवी

(ञ) मानवाधिकारवादी (ट) समाजसुधारकः (ठ) शिक्षाविद्

(ड) महिलाधिकारकर्मिणी (ढ) चलचित्रकलाकारः (ण) चित्रकारः

# व्याकरणबोधः

## सर्वनामशब्दप्रयोगः

१. **रेखाङ्कितानि कर्तृपदानि समुचितसर्वनामपदैः प्रतिष्ठाप्य प्रदत्तस्यानुच्छेदस्य पुनर्लेखनं कुरुत ।**

छात्रा नववादने विद्यालयं प्राप्नुवन्ति । ततः छात्राः पङ्क्तिबद्धा भूत्वा प्रार्थनं कुर्वन्ति । प्रार्थनसमये पुरुषाः, महिलाश्च पृथक् पृथक् पङ्क्तौ पङ्क्तिबद्धा भवन्ति । प्रार्थनं समाप्य

छात्राः कक्षाप्रकोष्ठं प्रविशन्ति । केशवः, सुन्दरः, सभ्यता, शिष्टता च अष्टमकक्षायां पठन्ति । कक्षायां केशवः सुन्दरेण सह तिष्ठति । केशवसुन्दरौ सखायौ स्तः । सभ्यतायाश्च शिष्टतायां महती स्नेहः प्रदर्शयति । सभ्यताशिष्टते च सख्यौ स्तः । मनोहरः, सुमनः, आदित्यः, रविश्च चत्वारि मित्राणि सन्ति । मित्राणि सहैव खादन्ति, सहैव क्रीडन्ति । मित्राणां मैत्री दर्शनीया वर्तते ।

### पदसङ्गतिः

**२. कोष्ठकात् समुचितं क्रियापदं विचित्य वाक्यानि पूरयत**

(क) कविता प्रातः सूर्यदर्शनं .................. । (करोति, कुरुतः, कुर्वन्ति)

(ख) छात्रौ धानेन .................. । (पठिष्यति, पठिष्यतः, पठिष्यन्ति)

(ग) वानराः पक्वानि फलानि .................. । (अखादत्, अखादताम्, अखादन्)

(घ) उद्योगजं भोजनं मह्यं न .................. । (रोचते, रोचेते, रोचन्ते)

(ङ) अत्र बहूनि पुस्तकानि .................. । (अस्ति, स्तः, सन्ति)

(च) अमू महिले सुन्दर्यौ .................. । (वर्तेते, वर्तेथे, वर्तावहे)

(छ) यूयं कुत्र गतवन्तः .................. ? (आसन्, आस्त, आस्म)

(ज) आवां प्रतिदिनं सहैव .................. । (क्रीडामि, क्रीडावः, क्रीडामः)

(झ) त्वं सावधानेन प्रवचनं .................. । (शृणु, शृणुतम्, शृणुत)

(ञ) अहं श्वः परिधानं क्रेतुमापणं .................. । (गन्ता, गन्तासि, गन्तास्मि)

**३. वाक्यानि संशोधयत**

(क) वृक्षात् त्रीणि पत्राणि युगपद् अपतत् ।

(ख) तव मातापितरौ कुत्र गतवन्तौ सन्ति ?

(ग) गुरवः छात्रान् प्रश्नं पृच्छतः ।

(घ) विद्यार्थिनो विद्यायै सरस्वतीं प्रर्थयते ।

(ङ) बालको रात्रौ दुग्धं पीत्वा शेरते ।

# कोषानुशीलनम्

## सिंहादिवर्गः

**अधोगन्ता तु खनको वृकः पुंध्वज उन्दुरः । उन्दुरुर्मूषकोऽप्याखुर्गिरिका बालमूषिका ॥**

**सरटः कृकलासः स्यान्मुसली गृहगोधिका । लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः ॥**

**नीलङ्गुस्तु कृमिः कर्णजलौकाः शतपद्युभे । वृश्चिकः शूककीटः स्यादलिद्रुणौ तु वृश्चिके ॥**

**पारावतः कलरवः कपोतोऽथ शशादनः । पत्री श्येन उलूकस्तु वायसारातिपेचकौ ॥**

**दिवान्धः कौशिको घूको दिवाभीतो निशाटनः । व्याघ्राटः स्याद्भरद्वाजः खञ्जरीटस्तु खञ्जनः ॥**

**लोहपृष्ठस्तु कङ्कः स्यादथ चाषः किकीदिविः । कलिङ्गभृङ्गधूम्याटा अथ स्याच्छतपत्रकः ॥**

**दार्वाघाटोऽथ सारङ्गस्तोककश्चातकः समाः । कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥**

**चटकः कलविङ्कः स्यात्तस्य स्त्री चटका तयोः । पुमपत्ये चाटकैरस्त्यपत्ये चटकैव सा ॥**

**कर्करेटुः करेटुः स्यात्कृकणक्रकरौ समौ । वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥**

**काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः । ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥**

**स एव च चिरञ्जीवी चैकदृष्टिश्च मौकुलिः । द्रोणकाकस्तु काकोलो दात्यूहः कालकण्ठकः ॥**

**आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ । क्रुङ्क्रौञ्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः**

**कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ।**

### पदानुशीलनी

लिङ्गव्यवस्था - अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**मूषकस्य नामानि** – अधोगन्ता (१), खनकः (१), वृकः (१), पुंध्वजः (१), उन्दुरः (१), उन्दुरुः (१), मूषकः (१) आखुः (१)

**बालमूषिकायाः नामनी** – गिरिका (२), बालमूषिका (२)

**कृकलासस्य नामनी** – सरटः (१), कृकलासः (१)

**तन्तुवायस्य नामानि** – लुता (२), तन्तुवायः (१), ऊर्णनाभः (१), मर्कटकः (१)।

**कृमेर्नामनी** – नीलङ्गुः (१), कृमिः (१)

**कर्णजलौकसो नामनी** – कर्णजलौकाः (२), शतपदी (२)

**शूककीटस्य नामनी** – वृश्चिकः (१), शूककीटः (१)

**वृश्चिकस्य नामानि** – अलिः (१), द्रुणः (१), वृश्चिकः (१)

**कपोतस्य नामानि** – पारावतः (१), कलरवः (१), कपोतः (१)

**श्येनस्य नामानि** – शशादनः (१), पत्री (१), श्येनः (१)

**दिवान्धस्य नामानि** – उलूकः (१), वायसारातिः (१), पेंचकः (१), दिवान्धः (१), कौशिकः (१), धूकः (१), दिवाभीतः (१), निशाटनः (१)

**भरद्वाजपक्षिणो नामनी** – व्याघ्राटः (१), भरद्वाजः (१)

**खञ्जनस्य नामनी** – खञ्जरीटः (१), खञ्जनः (१)

**लोहपृष्ठपक्षिणो नामनी** – लोहपृष्ठः (१), कङ्कः (१)

**किकीदिवेर्नामनी**– चाषः (१), किकीदिविः (१)

**कलिङ्गस्य नामानि** – कलिङ्गः (१), भृङ्गः (१), धूम्याटः (१)

**शतपत्रकापक्षिणो नामनी** – शतपत्रकः (१), दार्वाघाटः (१)

**चातकस्य नामानि** – सारङ्गः (१, ) तोतकः (१), चातकः (१)।

**कुक्कुटस्य नामानि** – कृकवाकुः (१), ताम्रचूडः (१), कुक्कुट : (१), चरणायुधः (१)

**चटकस्य नामनी** – चटकः (१), कलविङ्कः (१)

**चटकस्य स्त्रियो नाम** – चटकाः (२)

**चटकस्य पुत्रस्य नाम** – चाटकैरः (१)

**चटकस्य पुत्र्या नाम** – चटका (२)

**करेटोर्नामनी** – कर्करेटुः (१), करेटुः (१)

**क्रकरस्य नामनी** – कृकणः (१), क्रकरः (१)

**कोकिलस्य नामानि** – वनप्रियः (१), परभृतः (१), कोकिलः (१), पिकः (१)

**काकस्य नामानि** – काकः (१), करटः (१), अरिष्टः (१), बलिपुष्टः (१), सकृत्प्रजः (१), ध्वाङ्क्षः (१), आत्मघोषः (१), परभृत् (१, ) बलिभुक् (१), वायसः (१), चिरञ्जीवी (१), एकदृष्टिः (१), मौकुलिः (१)

**द्रोणकाकस्य नामनी** – द्रोणकाकः (१), काकोलः (१)

**कालकण्ठस्य नामनी** - दात्यूहः (१) कालकण्ठः (१)

**चिल्लस्य नामनी** – आतापी (१), चिल्लः (१)

**गृध्रस्य नामनी** – दाक्षाय्यः (१), गृध्रः (१)

**शुकस्य नामनी** – कीरः (१), शुकः (१)

**कौञ्चस्य नामनी** – क्रुङ् (१), , क्रौञ्चः (१) :

**बकस्य नामनी** – बकः (१), कह्वः (१)

**सारसस्य नामनी** – पुष्कराह्वः (१), सारसः (१)

**चक्रवाकस्य नामानि** – कोकः (१), चक्रः (१), चक्रवाकः (१), रथाङ्गाह्वयनामकः (१)

## अभ्यासः

१. **मूषकस्य नामानि श्रावयत ।**

२. **चक्रवाकस्य नामानि वदत**

३. **परस्परं मेलयत**

| | |
|---|---|
| कर्करेटुः | कह्वः |
| आतापी | पिकः |
| कीरः | उलूकः |
| बकः | करेटुः |
| घूकः | चिल्लः |
| कोकिलः | शुकः |

४. **सङ्क्षेपेण उत्तरयत**

(क) चातकस्य कति नामानि सन्ति कानि च तानि ?

(ख) तन्तुवायस्य नामानि कानि ?

(ग) कपोतस्य कति नामानि सन्ति ?

(घ) मूषकस्य कति नामानि सन्ति ?

(ङ) 'निशाटनः' इति कस्य नाम ?

५. **नेपालीभाषायामर्थं लिखत**

उन्दुरुः, अलिः, लूता, कर्णजलौकाः, कृमिः कलरवः, शतपत्रकः, तोतकः, चरणायुधः, चाटकैरः, कृकणः ।

६. **पर्यायान् लिखत**

चटकः, कृकवाकुः, भृङ्गः, चाषः, करटः, काकोलः, कालकण्ठः, दिवाभीतः, श्येनः, गृध्रः, कोकः।

७. **काकस्य सर्वाणि नामानि लिखत ।**

८. **आखुशब्दस्य सर्वाणि रूपाणि लिखत ।**

९. **संस्कृतेऽनुवादं कुरुत**

(क) संसारभरि पाइने चरा भँगेरा हो ।

(ख) कागलाई यमराजको दूतको रूपमा लिइन्छ ।

(ग) नेपालमा चील, बकुल्ला, चखेवा लगायत १२६ प्रजातिका चराहरू पाइन्छन्।

(घ) सुगालाई पिँजडामा थुन्ने होइन खुला आकाशमा उड्न दिनुपर्छ ।

(ङ) पहिले कुखुराले बासेको आधारमा समय निर्धारण गरिन्थ्यो ।

षष्ठ: पाठ:

# क्रोधस्य शमनम्



द्रोणाचार्य: कौरवाणां पाण्डवानाञ्च गुरुरासीत् । स तान् धनुर्विद्यां शिक्षयति स्म । द्रोणाचार्यस्य शिक्षणात् कौरवा: पाण्डवाश्च प्रसिद्धा धनुर्धारिणोऽभवन् ।

एकदा गुरुर्द्रोणाचार्य: शिष्यान् उपदेष्टुमैच्छत् । स तान् सम्मेल्य आह, “क्रोधोऽस्माकं महान् रिपुर्वर्तते । अमुं विजित्य एव नर: सुखी भवति । युष्माभिरपि क्रोधं जेतुं प्रयतनीयम् ।”

गुरोर्वचनमाकर्ण्य शिष्या अपृच्छन्, “क्रोधस्य विजयाय उपाय: क: ? तदपि कथ्यताम् ।” गुरु: परामृशत्, “अन्येन क्रोधे प्रकटितेऽपि यो मौनमाचरति स क्रोधं जयति । अयमेव क्रोधशमनस्य बलवान् उपायो वर्तते ।”

गुरुर्द्रोणाचार्य: प्रतिदिनं शिष्येभ्यो गृहकार्यं ददाति स्म । शिष्या अपि गुरुं तत् श्रावयन्ति स्म । एवंक्रमेण धनुर्विद्याया: शिक्षणमभ्यासश्च अचलताम् ।

प्रतिदिनमिव सर्वे शिष्या गुरोः प्रतीक्षायामासन् । द्रोणाचार्यः समागतः । स गृहकार्यं श्रावयितुं शिष्यानादिशत् । युधिष्ठिरं विहाय सर्वे शिष्यास्तद् अश्रावयन् । द्रोणाचार्यो गृहकार्यं श्रावयितुं युधिष्ठिरमपि निरदिशत् । युधिष्ठिरः किमपि नावदत् । गुरुः क्रुद्धो भूत्वा गृहकार्यं श्रावयितुं भूयोऽपि युधिष्ठिरमादिशत् । युधिष्ठिरो मौनमेवाचरत् । स युधिष्ठिरमवदत्, "श्रावय गृहकार्यम् । गृहकार्यं न कृतं किम् ? न कृतं चेत् कारणं कथय । किमर्थं मौनं तिष्ठसि ?"

युधिष्ठिरः किमपि नोदतरत् । स पूर्ववद् मौनमाचरत् । द्रोणाचार्यो युधिष्ठिरं प्रति अधिकमकुप्यत् । स तं कठोरमभर्त्सयच्च । स बहुकालपर्यन्तं युधिष्ठिरं सततमनिन्दत् । युधिष्ठिरः शान्तो भूत्वा सर्वमशृणोत्, परं कामपि प्रतिक्रियां न प्राकटयत् । दिवसो गतप्रायोऽभवत् । द्रोणाचार्यस्य क्रोधो वर्धमान आसीत् । स युधिष्ठिरं शिक्षणाद् निष्कासयितुं तत्परोऽभवत् ।

क्रोधाकुलः स युधिष्ठिरमवदत्, "इतः त्वं मम शिष्यो नासि, तुभ्यं दण्डं ददामि । शिक्षणाद् निष्कासयामि । तवादृशस्य शिष्यस्य नास्ति किमपि प्रयोजनम् । वनं गृहं वा गच्छ ।"

युधिष्ठिरोऽन्तेऽवोचत्, "क्षम्यताम् गुरुदेव ! अहं क्रोधशमनस्य अभ्यासं कुर्वाण आसम् । भवता एव भाषितं यदन्येन क्रोधे प्रकटितेऽपि यो मौनमाचरति स क्रोधं जयति । अयमेव क्रोधशमनस्य उपाय इति । अहं तदेव अकरवम् । गुरोरादेशस्य व्यवहारे परिपालनं मम कर्तव्यमेव भवति ।"

युधिष्ठिरस्य वचनेन द्रोणाचार्यस्य क्रोधः शान्तौ परिणतः । स सन्तुष्टोऽभवत् । स अबुध्यत-ज्ञानं न केवलं प्रदानाय अपि तु व्यवहारे अभ्यासाय च भवति ।

द्रोणाचार्यो युधिष्ठिरं योग्यशिष्यमघोषयत् । युधिष्ठिरोऽपि प्रसन्नोऽभवत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| धनुर्विद्या | धनुर्वाणसम्बन्धी विद्या | शिक्षयति स्म | सिकाउँथे, पढाउँथे |
| धनुर्धारिणः | धनु धारण गर्ने व्यक्तिहरू | उपदेष्टुम् | उपदेश दिन |
| सम्मेल्य | भेला गराएर | विजित्य | जितेर |
| जेतुम् | जित्न | आकर्ण्य | सुनेर |
| प्रयतनीयम् | प्रयत्न गर्नुपर्छ, प्रयास गर्न योग्य | शमनम् | शान्ति, शान्त पार्ने काम, दबाउनु |

| | | | |
|---|---|---|---|
| कथ्यताम् | भनियोस् | आदिशत् | आदेश दिए |
| एवंक्रमेण | यसै प्रकारले, यसरी नै | निरदिशत् | निर्देशन दिए |
| विहाय | छोडेर | अकुप्यत् | रिसाए |
| नोदतरत् (न उदतरत्) | उत्तर दिएनन् | क्रोधाकुलः | रिसले आकुल भएको |
| अभर्त्सयत् | भर्त्सना गरे, हप्काए | क्षम्यताम् | क्षमा गर्नुहोस् |
| कुर्वाणः | गर्दै, गरिरहेको | अबुध्यत | बुझे |

## अभ्यासः

### श्रवणं भाषणञ्च

**१. उच्चारणे काठिन्यमनुभूतानां पाठस्थशब्दानामादर्शोच्चारणविधिं शिक्षकमुखादाकर्ण्य तदनुवाचयत ।**

**२. अधोलिखितपदानां शुद्धोच्चारणं कुरुत**

द्रोणाचार्यः, कौरवाणाम्, धनुर्विद्या, धनुर्धारिणः, उपदेष्टुम्, सम्मेल्य, प्रयतनीयम्, श्रुत्वा, परामृशत्, प्रतिदिनमिव, प्रतीक्षायाम्, अभर्त्सयत्, बहुकालपर्यन्तम्, गतप्रायः, अकरवम् ।

**३. अधस्तनवाक्येषु नामपदानि वदत**

(क) शिष्या अपृच्छन् ।

(ख) गुरुः प्रतिदिनं पाठयति ।

(ग) अभ्यासोऽचलत् ।

(घ) स गृहकार्यम् अकरोत् ।

(ङ) गुरोरादेशं पालय ।

## ४. पाठाधारेण एकस्मिन् वाक्ये उत्तराणि वदत

(क) द्रोणाचार्यः केषां गुरुरासीत् ?

(ख) क्रोधशमनस्य उपायः कः ?

(ग) शिष्या गुरुं किमश्रावयन् ?

(घ) को गृहकार्यं नाश्रावयत् ?

(ङ) द्रोणाचार्यः कमनिन्दत् ?

(च) युधिष्ठिरः किं कुर्वन्नासीत् ?

(छ) शिष्याणां कर्तव्यं किम् ?

(ज) ज्ञानं किमर्थं भवति ?

## ५. पदार्थान् वदत

प्रयतनीयम्, शमनम्, प्रतिक्रिया, सततम्, गतप्रायः, परिपालनम्, परिणतः, अघोषयत् ।

## पठनम्

## १. अधोलिखितं गद्यांशं सस्वरं पठत

नेपाले बहवो धर्माः प्रचलिताः सन्ति । जना रुच्यनुसारेण परम्परया च धर्ममाचरन्ति । सर्वेषां धर्माणां सारः प्राणिनां कल्याणं वर्तते । शान्ति-सद्भाव-परोपकारा धर्मस्य अङ्गानि सन्ति । धर्मेणैव मित्राणि लभ्यन्ते । यो धर्मं रक्षति तस्य रक्षा धर्मेण भवति । अत एवोक्तम्- धर्मो रक्षति रक्षितः । धर्मस्य रक्षणं सर्वेषां कर्तव्यं भवति ।

## २. अधस्तनगद्यभागं पठित्वा प्रश्नानुत्तरयत

गुरुपूर्णिमा गुरुभक्तिप्रदर्शनस्य अवसरो वर्तते । अस्यां तिथौ गुरवः पूज्यन्ते सम्मान्यन्ते च । दिवसेऽस्मिन् गुरोर्महत्त्वस्य प्रतिपादनं विधीयते । शास्त्रेषु गुरोर्गौरवं वर्णितमस्ति । गुरुर्ब्रह्मा, विष्णुर्महेश्वरश्च मन्यते । गुरुरज्ञानं नाशयति । गुरोः कृपया शिष्याणां कार्याणि पूर्णतां यान्ति । तेषां विद्या बलञ्च वर्धते । सर्वेषां जीवने गुरोरावश्यकता भवति । एतदेव

विचार्य राज्यस्य प्रशासका अपि गुरुमन्विषन्ति । ते गुरोर्वचनस्यानुसारेण कार्याणि च विदधति । गुरुर्भविष्यं द्रष्टुं शक्नोति । स नीरक्षीरविवेकाय समर्थो भवति । गुरुस्तृतीयं नेत्रमिति भणितिः सत्यतां बिभर्ति ।

(क) गुरुपूर्णिमा कीदृशोऽवसरः ?

(ख) गुरुपूर्णिमायां किं प्रतिपाद्यते ?

(ग) गुरोः स्वरूपं कीदृशमस्ति ?

(घ) शिष्याणां कार्याणि कथं पूर्णतां यान्ति ?

(ङ) राज्यस्य प्रशासकाः किं विचारयन्ति ?

(च) गुरुः किं कर्तुं शक्नोति ?

(छ) गुरोर्विषये कीदृशी भणितिरस्ति ?

(ज) अस्य गद्यभागस्य सारांशः कः ?

३. **अधोलिखितां कथांशं पठित्वा शीर्षकं निर्धारयत**

एकः कृषक आसीत् । तस्य त्रयः पुत्रा आसन् । ते अलसा आसन् । कृषको मरणासन्नोऽभवत् । स पुत्रानवदत्, "अस्माकं क्षेत्रे कोषोऽस्ति । मम मृत्योः पश्चात् कोषमन्वेषयत ।" पुत्राः क्षेत्रमखनन् । तत्र कोषो न प्राप्तः । तेषां माता अवदत्, "भो पुत्राः, क्षेत्रेषु धान्यं वपत ।" पुत्रा धान्यमवपन् । ततो विपुलं धान्यमभवत् । कृषकस्य पुत्राः कोषस्यार्थमजानन् । तेषां जीवनं सुखमयमभवत् ।

४. **पाठस्य द्वितीयमनुच्छेदं पठित्वा सखीन् श्रावयत ।**

५ **पाठस्य मौनपठनं विधाय विशेषणपदानि चिह्नीकुरुत ।**

## लेखनम्

१. **कोष्ठकस्थैः समुचितपदैः पाठाधारेण रिक्तस्थानं पूरयत**

(क) द्रोणाचार्यः ............... शिक्षयति स्म । (आयुर्वेदम्/धनुर्विद्याम्)

(ख) युष्माभिरपि क्रोधं जेतुं ............... । (प्रयतनीयम्/चलनीयम्)

(ग) द्रोणाचार्यो गृहकार्यं ............... अदात् । (परिवारेभ्यः/शिष्येभ्यः)

(घ) ............... गृहकार्यं नाश्रावयत् । (द्रोणाचार्यः/युधिष्ठिरः)

(ङ) युधिष्ठिरः ............... आसीत् । (शान्तः/क्रुद्धः)

(च) गुरोरादेशः ............... भवति । (श्रवणीयः/परिपालनीयः)

२. **परस्परं मेलयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| गुरुः | महान् रिपुः |
| क्रोधः | गृहकार्यं नाश्रावयत् |
| युधिष्ठिरः | द्रोणाचार्यः |
| शिष्याः | व्यावहारिकाभ्यासः |
| क्रोधशमनस्य उपायः | अपृच्छन् |

३. **मञ्जूषायां प्रदत्तेषु पदेषु किं समस्तं किञ्चासमस्तमिति अधो निर्दिष्टायां संरचनायां लिखत**

गुरुः, धनुर्विद्या, प्रसिद्धाः, धनुर्धारिणः, शमनम्, गृहकार्यम्, कठोरः, आदेशः, परिपालनम्, विद्याभ्यासः, आज्ञापालनम्

| **समस्तशब्दाः** | **असमस्तशब्दाः** |
|---|---|
| ............. | ................ |
| ............. | ................ |
| ............. | ................ |
| ............. | ................ |

## ४. पदं प्रयुज्य वाक्यं रचयत

द्रोणाचार्यः, धनुर्विद्या, पाण्डवाः, क्रोधः, शमनम्, नरः, स्वरेण, शान्तः, सततम्, कर्तव्यम् ।

## ५. स्थूलाक्षरकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत

**यथा-** मत्स्या **जले** वसन्ति

मत्स्याः कुत्र वसन्ति ?

(क) पक्षी **नीडे** तिष्ठति ।

(ख) अत्र **नदी** वहति ।

(ग) फलं **मधुरं** भवति ।

(घ) अद्य **गुरुपूर्णिमा** वर्तते ।

(ङ) **तैलं** तरलं भवति ।

(च) शिवरात्रिः फाल्गुनमासे आयोज्यते ?

## ६. सत्यकथने (✓) इति, असत्यकथने च (✗) इति चिह्नं दत्त

(क) कौरवा अपि धनुर्धारिण आसन् । ( )

(ख) क्रोधं जित्वा नरो दुःखं प्राप्नोति । ( )

(ग) शिष्या गृहकार्यं नाश्रावयन् । ( )

(घ) युधिष्ठिरः क्रोधशमनस्यभ्यासमकरोत् । ( )

(ङ) ज्ञानं व्यवहारे नानेतव्यम् । ( )

(च) क्रोधः शमनस्य विषयो वर्तते । ( )

## ७. वाक्ययुगलात् शुद्धं वाक्यं लिखत

**(क)** ................................

(अ) द्रोणाचार्यः शिष्यानादिशत् । (आ) द्रोणाचार्यः शिष्या आदिष्टवान् ।

**(ख)** ................................

(अ) गुरुर्गृहकार्ये श्रावयति स्म ।　　(आ) गुरुर्गृहकार्यं श्रृणोति स्म ।

**(ग)** ................................

(अ) धनुर्विद्याया अभ्यासः कठिनो भवति ।　　(आ) धनुर्विद्याया अभ्यासः काठिन्यं भवति ।

**(घ)** ................................

(अ) युधिष्ठिरो गुरूपदेशमपालयत् ।　　(आ) युधिष्ठिरर्गुरोपदेशमपालयत् ।

**(ङ)** ................................

(अ) गुरुणा सत्यं भाषितम् ।　　आ) गुरुः सत्यं भाषितम् ।

## अनुप्रयोगः

१. **अधोलिखितानां वाक्यानां संयोजनेन सङ्क्षिप्तां कथां लिखत**

(क) स सिद्धपुरुष आसीत् ।

(ख) नेपाले खप्तडक्षेत्रं वर्तते ।

(ग) खप्तडस्वामी खप्तडक्षेत्रे तपस्तप्तवान् ।

(घ) स पूर्वं चिकित्सक आसीत् ।

(ङ) जनाः स्वामिनं सम्मानयन्ति ।

(च) खप्तडस्वामी वैराग्यं प्रापत् ।

(छ) स विविधान् ग्रन्थान् व्यरचयत् ।

(ज) खप्तडक्षेत्रे अद्यापि खप्तडाश्रमो वर्तते ।

(झ) स्वामिना लिखितानि पुस्तकानि मूल्यवन्ति सन्ति ।

२. **पाठस्य कथायाः सारांशं लिखत ।**

# व्याकरणबोधः

## शब्दरूपावली

**सर्वनामशब्दाः**

**अदस्**-शब्दस्य **पुंलिङ्गे** रूपाणि-

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | असौ | अमू | अमी |
| द्वितीया | अमुम् | अमू | अमून् |
| तृतीया | अमुना | अमूभ्याम् | अमीभिः |
| चतुर्थी | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| पञ्चमी | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| षष्ठी | अमुष्य | अमुयोः | अमीषाम् |
| सप्तमी | अमुष्मिन् | अमुयोः | अमीषु |

**अदस्**-शब्दस्य **स्त्रीलिङ्गे** रूपाणि-

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | असौ | अमू | अमूः |
| द्वितीया | अमुम् | अमू | अमूः |
| तृतीया | अमुया | अमूभ्याम् | अमूभिः |
| चतुर्थी | अमुष्यै | अमूभ्याम् | अमूभ्यः |
| पञ्चमी | अमुष्याः | अमूभ्याम् | अमूभ्यः |
| षष्ठी | अमुष्याः | अमुयोः | अमूषाम् |
| सप्तमी | अमुष्याम् | अमुयोः | अमूषु |

अदस्-शब्दस्य **नपुंसकलिङ्गे** रूपाणि-

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अदः | अमू | अमूनि |
| द्वितीया | अदः | अमू | अमूनि |
| तृतीया | अमुना | अमूभ्याम् | अमीभिः |
| चतुर्थी | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| पञ्चमी | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| षष्ठी | अमुष्य | अमुयोः | अमीषाम् |
| सप्तमी | अमुष्मिन् | अमुयोः | अमीषु |

**१. अदस्-शब्दस्य पुंलिङ्गस्य समुचितरूपेण रिक्तस्थानपूर्तिं कुरुत**

(क) ....... दुर्गाप्रसादो महान् विद्वानासीत् ।

(ख) ...... समये प्रदूषणं वर्धमानमस्ति ।

(ग) ....... बालकयोः परिधानं पश्य ।

(घ) ....... जना नगरं गच्छन्ति ।

**२. अदस्-शब्दस्य स्त्रीलिङ्गस्य समुचितरूपेण रिक्तस्थानं पूरयत**

(क) ........ महिलां मार्गं दर्शय ।

(ख) ......... छात्रया गृहकार्यं कृतम् ।

(ग) ......... शिक्षिकाणां निर्देशनं पालय ।

(घ) ......... बाले मिष्टान्नं याचेते ।

**३. अदस्- शब्दस्य नपुंसकलिङ्गस्य समुचितरूपेण रिक्तस्थानं पूरयत**

(क) .......... वनं घनमस्ति ।

(ख) ...... शिवस्य मन्दिराणि सन्ति ।

(ग) ...... पुस्तके शोभने स्तः ।

(घ) ......... उपवनं पश्य ।

४. **शिक्षकस्य शब्दरूपावल्याश्च साहाय्येन सर्व-शब्दस्य महत्-शब्दस्य च त्रिषु लिङ्गेषु सर्वाणि रूपाणि लिखत ।**

५. **शब्दरूपावल्याः सहयोगेन कोष्ठस्थैः समुचितपदैः रिक्तस्थानं पूरयत**

(क) .................. श्रोतारः सावधाना भवन्तु । (सर्वे, सर्वाः, सर्वाणि)

(ख) .................. कुत्र गच्छन्ती वर्तते ? (भवान्, भवती, भवत्)

(ग) .................. नार्यो भगवत्कथां शृण्वन्त्यः सन्ति । (अमी, अमूः, अमूनि)

(घ) महिले ! .................. नाम किम् ? (भवतः, भवत्याः)

(ङ) शिक्षकः .................. छात्रेभ्यः पुरस्कारं यच्छति । (सर्वेभ्यः, सर्वाभ्यः)

(च) यूयं .................. प्रश्नानामुत्तराणि लिखत । (सर्वेषाम्, सर्वासाम्)

(छ) हे मातः ! .................. अद्य भोजने किं पक्वम् ? (भवता, भवत्या)

६. **अधस्तनानां पदानां लिङ्गनिर्धारणं कुरुत**

**यथा–**

अदः - नपुंसकलिङ्गम् । भवत्यै - स्त्रीलिङ्गम् । सर्वे - पुंलिङ्गम् । सर्वस्मिन् - पुंलिङ्गम्/नपुंसकलिङ्गम्

भवतीनाम्, सर्वान्, अमुष्यै, सर्वम्, सर्वस्याम्, सर्वस्मिन्, भवतः, सर्वेषाम्, सर्वस्याः, अमुना, भवत्यौ ।

७. **समानविभक्त्यन्तपदे परस्परं मेलयत**

| | |
|---|---|
| सर्वैः | भवत्याः |
| सर्वस्मै | भवत्याम् |
| भवतः | अमूः |
| भवति | सर्वाभिः |
| अमुष्मात् | सर्वस्यै |
| अमून् | अमुष्याः |

**८. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत**

असौ, अमूनि, अमुम्, अमुष्मै, अमीषाम्, सर्वम्, सर्वे, सर्वा, सर्वाम्, सर्वासाम्, सर्वस्मिन्, सर्वाणि, भवतः, भवत्याः, भवती, भवत्या, भवते, भवत्यै, भवद्भिः ।

**९. उदाहरणानुसारेण पाठे प्रयुक्तानामधस्तनपदानां विभक्तिवचने निदर्शयत**

द्रोणाचार्यः, युधिष्ठिरम्, शिष्याः, धनुर्विद्यायाः, गृहकार्यम्, क्रोधस्य, अयम्, तुभ्यम्, शिक्षणात् ।

यथा- द्रोणाचार्यः - प्रथमाविभक्तिः, एकवचनम् ।

## कोषानुशीलनम्

### सिंहादिवर्गः

**कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ ।**
**हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥**
**राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।**
**मलिनैर्मल्लिकाक्षास्ते धार्तराष्ट्राः सितेतरैः ॥**
**शरारिराटिराडिश्च बलाका बिसकण्ठिका ।**
**हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा ॥**
**जतुकाजिनपत्रा स्यात्परोष्णी तैलपायिका ।**
**वर्वणा मक्षिका नीला सरघा मधुमक्षिका ॥**
**पतङ्गिका पुत्तिका स्याद्दंशस्तु वनमक्षिका ।**
**दंशी तज्जातिरल्पा स्याद्गन्धोली वरटा द्वयोः ॥**
**भृङ्गारी झीरुका चीरी झिल्लिका च समा इमाः ।**
**समौ पतङ्गशलभौ खद्योतो ज्योतिरिङ्गणः ॥**
**मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।**
**द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥**
**मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।**

**शिखावलः शिखी केकी मेघनादानुलास्यपि ॥**

**केका वाणी मयूरस्य समौ चन्द्रकमेचकौ ।**

**शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके ॥**

**खगे विहङ्गविहगविहङ्गमविहायसः ।**

**शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥**

**पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ।**

**नगौकोवाजिविकिरविविष्किरपतत्रयः ॥**

**नीडोद्भवाः गरुत्मन्तः पित्सन्तो नभसङ्गमाः ॥**

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५) स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**कलहंसस्य नामनी** – कादम्बः (१), कलहंसः (१)

**कुररस्य नामनी** – उत्क्रोशः (१), कुररः (१)

**हंसस्य नामानि** – हंसः (१), श्वेतगरुत् (१), चक्राङ्गः (१), मानसौकाः (१)

**राजहंसस्य नाम** – राजहंसः (१)

**मल्लिकहंसस्य नाम** – मल्लिकः (१)

धार्त**राष्ट्रहंसस्य नाम** – धार्तराष्ट्रः (१)

**शरारेर्नामानि** – **शरारिः** (१.), आटिः (१), आडिः (१)

**बलाकाया नामनी** – बलाका (२), बिसकण्ठिका (२)

**हंसस्य योषितः नाम** – वरटा (२)

**सारसस्य योषितः नाम** – लक्ष्मणा (२)

**जतुकायाः नामनी** – जतुका (२), अजिनपत्रा (२)

**तैलपायिकायाः नामनी** – परोष्णी (२), तैलपायिका (२)

**मक्षिकायाः नामानि** – वर्वणा (२), मक्षिका (२), नीला (२)

**मधुमक्षिकायाः नामनी** – सरघा (२), मधुमक्षिका (२)

**पतङ्गिकायाः नामनी** – पतङ्गिका (२), पुत्तिका (२)

**वनमक्षिकायाः नामनी** – दंशः (१), वनमक्षिका (२)

**दंश्याः नाम** – दंशी (२)

**गन्धोल्याः नामनी** – गन्धोली (२), वरटा (२)

**भीरुकायाः नामानि** – भृङ्गारी (२), भीरुका (२), चीरी (२), झिल्लिका (२)

**पतङ्गस्य नामनी** – पतङ्गः (१) शलभः (१)

**खद्योतस्य नामनी** – खद्योतः (१), ज्योतिरिङ्गणः (१) :

**भ्रमरस्य नामानि** – मधुव्रतः (१), मधुकरः (१), मधुलिड् (१), मधुपः (१), अली (१), द्विरेफः (१), पुष्पलिड् (१), षड्पदः (१), भ्रमरः (१), अलिः (१)

**मयूरस्य नामानि** – मयूरः (१), बर्हिणः (१), बर्ही (१), नीलकण्ठः (१), भुजङ्गभुक् (१), शिखावलः (१), शिखी (१), केकी (१), मेघनादानुलासी (१)

**मयूरस्य वाण्याः नाम** – केका (२)

**मयूरस्य चन्द्राकारचक्रस्य नामनी** – चन्द्रकः (१), मेचकः (१),

**मयूरस्य चूडायाः नामनी** – शिखा (२), चूडा (२)

**मयूरपिच्छस्य नामानि** – शिखण्डः (१), पिच्छम् (३), बर्हम् (३)

**खगस्य नामानि** – खगः (१), विहङ्गः (१), विहगः (१), विहङ्गमः (१), विहायाः (१), शकुन्तिः (१), पक्षी (१), शकुनिः (१), शकुन्तः (१), शकुनः (१), द्विजः (१), पतत्री (१), पत्री (१, ) पतगः (१), पतन् (१), पत्ररथः (१), अण्डजः (१), नगौकाः (१), वाजी (१), विकिरः (१), विः (१), विष्किरः (१), पतत्रिः (१), नीडोद्भवः (१), गरुत्मान् (१), पित्सन् (१), नभसङ्गमः (१)

## अभ्यासः

१. **खगस्य नामानि श्रावयत ।**

२. **भीरुकायाः नामानि वदत ।**

३. **सङ्क्षेपेण उत्तरयत**

(क) हंसस्य कति नामानि सन्ति कानि च तानि ?

(ख) मक्षिकायाः नामानि कानि ?

(ग) मयूरस्य कति नामानि सन्ति ?

(घ) हंसस्य योषित् का कथ्यते ?

(ङ) कीदृशो हंसो मल्लिकः कथ्यते ?

## ४. परस्परं मेलयत

| | |
|---|---|
| शिखी | शलभः |
| पतङ्गः | आडिः |
| पतङ्गिका | पिच्छम् |
| वर्वणा | केकी |
| शरारिः | पुत्तिका |
| शिखण्डः | नीला |

## ५. पर्यायशब्दान् लिखत

वरटा, चीरी, शलभः, ज्योतिरिङ्गणः, द्विरेफ, शिखावलः, पिच्छम्, मेचकः, शिखा ।

## ६. नेपालीभाषायामर्थं लिखत

कादम्बः, चूडा, आटिः, बलाका, झिल्लिका, दंशी, केका, लक्ष्मणा, वरटा, अली ।

## ७. अधोलिखितशब्दानां पञ्चम्यैकवचनस्य रूपाणि लिखत

मधुलिड्, आटिः, वरटा, दंशी, शिखी ।

## ८. भ्रमरस्य नामानि लिखत

## ९. संस्कृतभाषायामनुवादं कुरुत ।

(क) हामी मौरीबाट परिश्रमको पाठ सिक्न सक्छौँ ।

(ख) वर्षातको समयमा मयूर प्वाँख फिजाएर नाच्दछ ।

(ग) फूलमा भ्रमराको आसक्ति रहन्छ ।

(घ) चद्रमाको प्रकाशका अगाडि जूनकिरीको अस्तित्व कहाँ छ र ?

## सप्तमः पाठः

# सेवामहिमा

अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् ।
प्रधानोऽपप्रधानः स्याद्यदि सेवा-विवर्जितः ॥१॥

विद्यावतां महेच्छानां शिल्प-विक्रम-शालिनाम् ।
सेवा-वृत्ति-विदां चैव नाश्रयः पार्थिवं विना ॥२॥

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रुषुरधिगच्छति ॥३॥

सेवितव्यो महावृक्षः फलच्छाया समन्वितः ।
यदि दैवात् फलं नास्ति, छाया केन निवार्यते ॥४॥

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥५॥

१

**अन्वयः**

यदि पार्थिवम् सेवते (चेत्) अप्रधानः प्रधानः स्यात् । यदि सेवाविवर्जितः (अस्ति चेत्) प्रधानः अपि अप्रधानः स्यात् ।

**सरलार्थः**

यो राजानं सेवते स राज्ञः प्रियो भवति । प्रियश्च सामान्यजनोऽपि मुख्यो भवितुं शक्नोत्येव । तथैव यः सेवावियुक्तोऽस्ति, स राज्ञो निकटे एव नैव गच्छति, राजा तं विस्मरति । सेवाविमुखो जनो राज्ञः प्रियो भवितुं न शक्नोति । अत एव मुख्योऽपि सः शनैः शनैरमुख्यो भवितुं शक्नोति ।

२

**अन्वयः**

विद्यावताम्, महेच्छानाम्, शिल्पविक्रमशालिनाम्, सेवावृत्तिविदाम् चैव पार्थिवं विना आश्रयः न ।

**सरलार्थः**

सर्वेषामपि जनानां कश्चन आश्रयः आवश्यकः । राजा देशस्य नायकोऽस्ति । विदुषां मन्त्रणाभावे देशस्य दुर्दशा भवति अतो विदुषामाश्रयो राजा भवति । विशालमनोरथानां जनानां, शिल्पिनाम्, पराक्रमिणाम्, सेवकानां च जनानामाश्रयो राजा एव भवितुं शक्नोति ।

३

**अन्वयः**

यथा खनित्रेण खनन् नरः वारि अधिगच्छति (तथा) शुश्रुषुः गुरुगतां विद्याम् अधिगच्छति ।

**सरलार्थः**

भूगर्भस्थं जलं सरलतया प्राप्तुं न शक्यते । यः परिश्रमपूर्वकं खनित्रप्रयोगं कृत्वा खनति स एव भूगर्भस्थं जलं प्राप्तुमर्हति । गुरुगता विद्या अपि तथैव अस्ति । यो गुरुसेवां करोति स एव तां प्राप्तुं शक्नोति ।

४

**अन्वयः**

फलच्छायासमन्वितः महावृक्षः सेवितव्यः । यदि दैवात् फलं नास्ति (चेदपि) केन छाया निवार्यते ?

**सरलार्थः**

सदा फलछायासमन्वितस्य वृक्षस्य एव सेवा विधातव्या । यदि कथञ्चित् फलं नोत्पद्यते चेदपि छाया तु भवत्येव । छायां निवारयितुं तु न शक्यते, अतो लाभ एव भवति । सदैव महतां सेवा करणीया इति भावः ।

५

## अन्वयः

व्यासस्य अष्टादशपुराणेषु वचनद्वयम् (अस्ति)। (एकम्) परोपकारः पुण्याय (भवति), (अपरं च) परपीडनं पापाय (भवति)।

**सरलार्थः**

अष्टादशपुराणेषु अनेकाः श्लोकाः सन्ति। तत्र अनेकाः कथाप्रसङ्गाः सन्ति। परन्तु तेषां सर्वेषामपि सारभूतं वस्तु अधिकं नास्ति। व्यासस्य निष्कर्षवचनं तु द्वयमेव वर्तते। अन्येषां कल्याणविहितेन कर्मणा पुण्यमुत्पद्यते, तच्च स्वान्तःसुखाय भवति इति एकम्। अपरेषां दुःखप्रदानेन च केवलं पापमुत्पद्यते, तच्च स्वान्तर्दुःखाय भवति इति द्वितीयमिति भावः।

## शब्दार्थाः

| | |
|---|---|
| पार्थिवः | राजा |
| प्रधानः | मुख्य |
| सेवाविवर्जितः: | सेवा नगर्ने |
| विद्यावान् | ज्ञानी |
| महेच्छः | ठुलो सपना देख्ने |
| शिल्पविक्रमशालिनः | कलाकार र बलशाली |
| सेवावृत्तिविदः | सेवा गरेर बाँच्न जान्ने |
| खनन् | खनेर |
| वारि | पानी |
| अधिगच्छति | पाउँछ |
| फलच्छायासमन्वितः | फल र छाया भएको |
| निवार्यते | छेक्न सकिन्छ |

# अभ्यासः

## श्रवणं भाषणञ्च

**१. अधस्तनपदानामनूच्चारणं कुरुत**

| | | |
|---|---|---|
| पार्थिवः | प्रधानम् | सेवाविवर्जितः |
| विद्यावताम् | महेच्छानाम् | सेवावृत्तिविदाम् |
| ग्राह्या | विद्वान् | तद्द्वारेण |
| शुश्रुषुः | खनित्रम् | फलच्छायासमन्वितः |
| छाया | अष्टादशपुराणेषु | वचनद्वयम् |

**२. शिक्षकाच्छ्रुत्वा अधस्तनपद्येऽनुवाचयत**

विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् ।
सेवा-वृत्ति-विदां चैव नाश्रयः पार्थिवं विना ॥
अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

**३. गति-यति-लयनिर्धारणपुरःसरमधोऽङ्किते पद्ये वाचयत**

अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद्यदि सेवा-विवर्जितः ॥
सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति, छाया केन निवार्यते ॥

**४. अधस्तनश्लोकस्थपदानां शुद्धोच्चारणं कृत्वा प्रतिपदमर्थं श्रावयत**

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम् ॥
यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रुषुरधिगच्छति ॥

५. **पाठस्य तृतीयस्य श्लोकस्य अन्वयं सहपाठिनं श्रावयत ।**

६. **निर्दिष्टपदानां पर्यायान् कोशात् सङ्कलय्य श्रावयत**

पार्थिवः वृत्तिः द्वारेण पुण्याय

७. **पुस्तकमवलम्ब्य अन्तिमस्य श्लोकस्य सरलार्थं शिक्षकं श्रावयत ।**

८. **नीतिसम्बद्धं श्रुतपूर्वं श्लोकं विशिष्टवाक्यं वा कक्षायां श्रावयत ।**

९. **समूहं विधाय 'सेवाया महत्त्वम्' इति विषये मिथो विमर्शं कुरुत ।**

## पठनम्

१. **लयमनुसृत्य अधस्तनपद्ये सस्वरं वाचयत**

तद्दैवमिति सञ्चिन्त्य त्यजेन्नोद्योगमात्मनः ।
अनुयोगं विना तैलं तिलानां नोपजायते ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

२. **प्रदत्तश्लोकयोर्मौनपठनं विधायान्वयं प्रस्तुत**

अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद्यदि सेवा-विवर्जितः ॥
विद्यावतां महेच्छानां शिल्प-विक्रम-शालिनाम् ।
सेवा-वृत्ति-विदां चैव नाश्रयः पार्थिवं विना ॥

३. **अधस्तनश्लोकौ पठित्वा शिक्षकसाहाय्येन तदनुवर्तिनः प्रश्नानुत्तरयत**

दानेन तुल्यो निधिरस्ति नान्यो,
लोभाच्च नान्योऽस्ति रिपुः पृथिव्याम् ।
विभूषणं शीलसमं न चान्यत्

सन्तोषतुल्यं धनमस्ति नान्यत् ॥

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते

शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।

कन्दैः फलैर्मुनिवरा गमयन्ति कालम्

सन्तोष एव पुरुषस्य परं निधानम् ॥

(क) केन समं विभूषणं नास्ति ?

(ख) कथमपि सर्पा दुर्बला न सन्ति ?

(ग) सन्तोषं पुरुषस्य किम् अस्ति ?

(घ) वनगजाः कथं बलिनो भवन्ति ?

(ङ) दुर्बलास्ते इति पदस्य सन्धिविच्छेदगतं रूपं किम् ?

(च) अस्ति इति पदस्य धातु-लकार-पुरुष-वचनानि कानि ?

(छ) पवनम् इति पदस्य पर्यायमेकं कथयत ।

(ज) द्वितीयस्य श्लोकस्य सरलार्थः कः ?

**४. पाठं पठित्वा समस्तपदानि चिह्नीकुरुत ।**

**५. पाठस्य अन्तिमस्य श्लोकस्य सरलार्थं पठित्वा तत्र समाविष्टविषयान् सूत्ररूपेण कथयत ।**

**६. प्रदत्तं गद्यांशं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

परोपकारार्थं यत् कर्म क्रियते तेन विवेकप्रेरितेन भाव्यम् । विवेकनिर्णीतं कर्म एव सत्फलं जनयति । यत् कर्म मोहेन द्वेषेणान्धविश्वासेन आसक्त्या च क्रियते तद् हानिमुत्पादयति । सर्वेषां सेवाकारित्वात् सर्वेषां हिताधायकत्वात् सर्वेषाञ्च शुभविधायकत्वात् परमार्थोऽतितरां सार्वजनीनं पावनमनुष्ठानमस्ति । सज्जना महात्मानश्च अत एव परमार्थं मानवजीवनस्य मुख्यधर्मं मन्यन्ते । ज्ञानहीना बुद्धिविहीनाः स्वार्थे स्वलाभं मन्यन्ते । ते स्वोदरपूर्त्यर्थमेव सततमीहन्ते । स्वार्थनिमित्तेन ते सर्वविधमपि दुष्कर्म कर्तुं प्रवर्तन्ते । ते पापेभ्यो न

विरमन्ति । तेषां स्वार्थमयं कर्म सर्वामपि सामाजिकीं व्यवस्थां विध्वंसयति इति ते न जानन्ति । एकमात्रं पारमार्थिकं कर्म एवेदृशमस्ति येन जनजीवनं रच्यते, समाजस्य सर्वाण्यङ्गानि पोष्यन्ते, तेषु प्राणशक्तिः सञ्चार्यते, तानि दृढीक्रियन्ते च । अत एव वेदेष्वपि त्यागस्य महन्महत्त्वं वर्णितमस्ति । ईशावास्योपनिषदि त्यागपूर्वकं भोगाय निर्दिष्टमस्ति यत्-

**ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**

**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥ इति ॥**

गीतायामपि फलाशात्यागपूर्वकं कर्म कर्तुं भगवान् श्रीकृष्ण उपदिशति-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**

**मा कर्म फलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ इति ॥**

**(अ) एकवाक्येन उत्तरयत**

(क) परोपकारिणा कर्मणा कीदृशेन भाव्यम् ?

(ख) कीदृशं कर्म हानिमुत्पादयति ?

(ग) ईशावास्योपनिषदि किं निर्दिष्टमस्ति ?

(घ) बुद्धिविहीना जनाः किं कुर्वन्ति ?

(ङ) श्रीकृष्णः कुत्र उपदिशति ?

**(आ) सङ्क्षेपेण प्रश्नानामुत्तरं दत्त**

(क) कर्मण्येवाधिकारस्ते इति श्लोकस्याशयः कः ?

(ख) सज्जनस्य बुद्धिहीनस्य च जीवने का भिन्नता ?

(ग) कीदृशं कर्म पारमार्थिकमित्युच्यते ?

(घ) कीदृशं कर्म सत्फलं जनयति ?

(ङ) कस्य कर्म सामाजिकीं व्यवस्थां विध्वंसयति ?

## लेखनम्

१. **सन्धिविच्छेदं कुरुत**

| | | |
|---|---|---|
| आयुर्विद्या | फलच्छाया | नास्ति |
| यशो बलम् | प्रधानोऽप्यप्रधानः | नाश्रयः |

२. **अधस्तनपद्यस्यान्वयं लिखत**

अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद्यदि सेवा-विवर्जितः ॥

३. **गुरोः सहपाठिनां कोशस्य वा साहाय्येन अधः प्रदत्तेषु प्रतिपदं द्वौ पर्यायौ निर्दिशत**

प्रधानः विना नित्यम् वृक्षः

४. **अधस्तनस्य नीतिपद्यस्य सन्देशं सरलसुरभाषायां लिखत**

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रुषुरधिगच्छति ॥३॥

५. **प्रदत्तगद्यांशतः पञ्च बोधप्रश्नान् निर्माय तेषामुत्तराणि लिखत**

को न श्रृणोति श्रीमद्भगवद्गीताया नाम जगति ? ग्रन्थोऽयं महाभारतस्य अंशरूपो वर्तते । महाभारतस्य युद्धाय ख्यातनामानो वीराः सन्नद्धा आसन् । तत्र अर्जुनोऽपि तत्पर आसीत् । स युद्धे स्वबान्धवानपश्यत् । तद् दृष्ट्वा अर्जुनो युद्धाद् विमुखोऽभवत् । तदैव श्रीकृष्णोऽर्जुनं सन्मार्गं दर्शयितुं तस्मै उपदेशमयच्छत् । श्रीकृष्णस्य तस्य उपदेशस्य नाम एव श्रीमद्भगवद्गीता वर्तते । गीता जीवने मार्गदर्शनं करोति । गीतादर्शनं सर्वत्र प्रशंसितमस्ति । उक्तञ्च, "दुग्धं गीतामृतं महत्" इति ।

६. **सान्वयं व्याख्यात**

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

**७. अधस्तनपद्यस्य सप्रसङ्गं व्याख्यां कुरुत**

विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् ।
सेवा-वृत्ति-विदां चैव नाश्रयः पार्थिवं विना ॥

**८. अधोलिखितपद्यस्य शिक्षकसाहाय्येन वृत्तलक्षणं सङ्गमयत**

नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः ।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ॥

**अनुप्रयोगः**

**१. भवान् मातापित्रोः सेवां कथं करोति ? दश वाक्यानि लिखत ।**

**२. अधस्तनश्लोकस्य भावार्थः समीचीनो न वा ? स्वमतं प्रकटीकृत्य मिथो विमर्शं कुरुत**

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ॥

**३. सेवाविषये सरलमेकं श्लोकं रचयत ।**

## व्याकरणबोधः

**१. तव्यत्प्रत्ययान्तपदानां निर्माणप्रक्रियाविषये विमृशत**

| प्रकृतिः | प्रत्ययः | निर्मितशब्दः |
|---|---|---|
| गम् | तव्यत् | गन्तव्यत् |
| पठ् | तव्यत् | पठितव्यत् |
| हस् | तव्यत् | हसितव्यत् |

| | | |
|---|---|---|
| रक्ष् | तव्यत् | रक्षितव्यत् |
| जि | तव्यत् | जेतव्यत् |
| दा | तव्यत् | दातव्यत् |
| कृ | तव्यत् | कर्तव्यम् |
| चुर् | तव्यत् | चोरयितव्यत् |
| दृश् | तव्यत् | द्रष्टव्यम् |
| स्मृ | तव्यत् | स्मर्तव्यम् |

**(क) उदाहरणमाधृत्य लिखत**

ग्रन्थः पठितव्यः । कथा पठितव्या । पुस्तकं पठितव्यम् ।

| | |
|---|---|
| दुग्धम् | आरोहर्तव्याः |
| पुस्तकानि | लेखितव्याः |
| कथा | पातव्यम् |
| लेखाः | पठितव्यानि |
| वृक्षाः | श्रवणीया |

**(ख) शुद्धपदेन वाक्यपूर्तिं कुरुत**

(अ) जलम्...............। (पातव्यम्/पीतव्यम्)

(आ) पाठः..................। (पठितव्यः/पठितव्यम्)

(इ) शत्रुः..................। (जितव्यः/जेतव्यः)

२. **ण्वुल्-तृच्-ल्युट्-प्रत्ययान्तपदानां निर्माणप्रक्रियाविषये विमृशत**

**(क)**

| प्रकृतिः | प्रत्ययः | प्रत्ययस्य स्थाने आदेशः | निर्मितशब्दः |
|---|---|---|---|
| पच् | ण्वुल् | (अक) | पाचकः |
| श्रु | ण्वुल् | (अक) | श्रावकः |

| | | | |
|---|---|---|---|
| पठ् | ण्वुल् | (अक) | पाठकः |
| नृत् | ण्वुल् | (अक) | नर्तकः |
| लिख् | ण्वुल् | (अक) | लेखकः |
| सिच् | ण्वुल् | (अक) | सेचकः |
| (प्र+अप्) | ण्वुल् | (अक) | प्रापकः |
| त्रस् | ण्वुल् | (अक) | त्रासकः |
| नी | ण्वुल् | (अक) | नायकः |
| ग्रह् | ण्वुल् | (अक) | ग्राहकः |

**(ख)**

| प्रकृतिः | प्रत्ययः | निर्मितशब्दः |
|---|---|---|
| हन् | तृच् | हन्ता |
| जि | तृच् | जेता |
| श्रु | तृच् | श्रोता |
| नी | तृच् | नेता |
| दा | तृच् | दाता |
| कृ | तृच् | कर्ता |
| कथ् | तृच् | कथयिता |
| वच् | तृच् | वक्ता |

**(ग)**

| प्रकृतिः | प्रत्ययः | प्रत्ययस्य स्थाने आदेशः | निर्मितशब्दः |
|---|---|---|---|
| भू | ल्युट् | (यु-अन) | भवनम् |
| पा | ल्युट् | (यु-अन) | पानम् |
| श्रु | ल्युट् | (यु-अन) | श्रवणम् |
| गम् | ल्युट् | (यु-अन) | गमनम् |

| | | | |
|---|---|---|---|
| पठ् | ल्युट् | (यु-अन) | पठनम् |
| लिख् | ल्युट् | (यु-अन) | लेखनम् |
| दा | ल्युट् | (यु-अन) | दानम् |
| भज् | ल्युट् | (यु-अन) | भजनम् |
| हन् | ल्युट् | (यु-अन) | हननम् |
| ग्रह | ल्युट् | (यु-अन) | ग्रहणम् |
| यज् | ल्युट् | (यु-अन) | यजनम् |
| गण् | ल्युट् | (यु-अन) | गणनम् |
| पाल् | ल्युट् | (यु-अन) | पालनम् |
| सेव् | ल्युट् | (यु-अन) | सेवनम् |

**(घ) उदाहरणमनुसृत्य पदेषु प्रयुक्तान् प्रकृतिप्रत्ययान् लिखत**

| उदाहरणम् | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| | पालनम् | पाल् | ल्युट् |
| | (अ) हसनम् | ............ | ................ |
| | (आ) पाठकः | ............ | ................ |
| | (इ) खाद्यः | ............ | ................ |
| | (ई) भक्तिः | ............ | ................ |
| | (उ) नेता | ............ | ................ |
| | (ऊ) गायकः | ............ | ................ |

**३. क्तिन्-टाप्-प्रत्ययान्तपदानां निर्माणप्रक्रियाविषये विमृशत**

**(क)**

| प्रकृतिः | प्रत्ययः | निर्मितशब्दः |
|---|---|---|
| श्रु | क्तिन् | श्रुतिः |
| भी | क्तिन् | भीतिः |

| | | |
|---|---|---|
| कृ | क्तिन् | कृतिः |
| भज् | क्तिन् | भक्तिः |
| दृश् | क्तिन् | दृष्टिः |
| मन् | क्तिन् | मतिः |
| बुध् | क्तिन् | बुद्धिः |
| वच् | क्तिन् | उक्तिः |
| प्र आप् | क्तिन् | प्राप्तिः |
| स्तु | क्तिन् | स्तुतिः |

**(ख)**

| | | |
|---|---|---|
| अश्व | टाप् (आ) | अश्वा |
| सुत | टाप् (आ) | सुता |
| सरल | टाप् (आ) | सरला |
| प्रथम | टाप् (आ) | प्रथमा |
| बालक | टाप् (आ) | बालिका |
| मूषक | टाप् (आ) | मूषिका |
| शिक्षक | टाप् (आ) | शिक्षिका |
| साधक | टाप् (आ) | साधिका |
| गायक | टाप् (आ) | गायिका |
| नायक | टाप् (आ) | नायिका |

**४. ङीष्-ङीप्-ङीन्-प्रत्ययान्तपदानां निर्माणप्रक्रियाविषये विमृशत**

| प्रकृतिः | प्रत्ययः (ङीष्, ङीप् ङीन् वा) | निर्मितशब्दः |
|---|---|---|
| कर्तृ | ई | कर्त्री |
| दातृ | ई | दात्री |
| धातृ | ई | धात्री |
| तपस्विन् | ई | तपस्विनी |

| | | |
|---|---|---|
| गुणिन् | ई | गुणिनी |
| नद | ई | नदी |
| देव | ई | देवी |
| भयङ्कर | ई | भयङ्करी |
| गोप | ई | गोपी |
| महिष | ई | महिषी |
| शूकर | ई | शूकरी |
| ब्राह्मण | ई | ब्राह्मणी |
| मृग | ई | मृगी |
| त्रिलोक | ई | त्रिलोकी |
| पञ्चवट | ई | पञ्चवटी |
| गच्छत् | ई | गच्छन्ती |
| वदत् | ई | वदन्ती |
| दर्शयत् | ई | दर्शयन्ती |
| श्रीमत् | ई | श्रीमती |
| भवत् | ई | भवती |
| गतवत् | ई | गतवती |
| इन्द्र | ई | इन्द्राणी |
| वरुण | ई | वरुणानी |
| भव | ई | भवानी |
| मातुल | ई | मातुलानी |
| रुद्र | ई | रुद्राणी |

**(क) पाठात् तव्य-क्तिन्-ल्युट्-प्रत्ययान्तपदानि अन्विष्य लिखत ।**

# कोषानुशीलनम्

## सिंहादिवर्गः

**तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः । तित्तिरिः कुक्कुभो लावो जीवञ्जीवश्चकोरकः ॥**
**कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः । गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम् ॥**
**स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ । प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ॥**
**पेशी कोषो द्विहीनेऽण्डं कुलायो नीडमस्त्रियाम् । पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ॥**
**स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगुलं युगम् । समूहो निवहव्यूहसंदोहविसरव्रजाः ॥**
**स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः । समुदायः समुदयः समवायश्चयो गणः ॥**
**स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् । वृन्दभेदाः समैर्वर्गः सङ्घसार्थौ तु जन्तुभिः ॥**
**सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकम् । पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम् ॥**
**स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम् । कापोतशौकमायूरतैत्तिरादीनि तद्गणे ॥**
**गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥**

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५) स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**पक्षिविशेषाणां नामानि** – हारीतः (१), मद्गुः (१), कारण्डवः (१), प्लवः (१), तित्तिरिः (१), कुक्कुभः (१), लावः (१), जीवञ्जीवः (१), चकोरकः (१), कोयष्टिकः (१), टिट्टिभकः (१), वर्तकः (१), वर्तिका (२) आदि इति पदेन शारिकादयः ज्ञेयाः ।

**पक्षस्य नामानि** – गरुत् (१), पक्षः (१), छदः (१), पत्रम् (३), पतत्रम् (३), तनूरुहम् (३)

**पक्षमूलस्य नामनी** – पक्षतिः (२), पक्षमूलम् (३)

**चञ्च्वाः नामनी** – चञ्चुः (२), त्रोटिः (२)

**खगगतिक्रियायाः नामानि** – प्रडीनम् (३), उड्डीनम् (३), संडीनम् (३)

**अण्डस्य नामानि** – पेशी (२), कोशः (१), अण्डम् (३)

**नीडस्य नामनी** - कुलायः (१), नीडः (नीडम्) (५)

**शिशोः नामानि** - पोतः (१), पाकः (१), अर्भकः (१), डिम्भः (१), पृथुकः (१), शावकः (१), शिशुः (१)

**त्रीपुंसयोः नामानि** - स्त्रीपुंसः (१), मिथुनम् (३), द्वन्द्वम् (३)

**एतानि युगलस्य नामानि** - युग्मम् (३), युगलम् (३), युगम् (३)

**समूहस्य नामानि** - समूहः (१), निवहः (१), व्यूहः (१), सन्दोहः (१), विसरः (१), व्रजः (१), स्तोमः (१), ओघः (१), निकरः (१), व्रातः (१), वारः (१), सङ्घातः (१), सञ्चयः (१), समुदायः (१),समुदयः (१), समवायः (१), चयः (१), गणः (१), संहतिः (२), वृन्दम् (३), निकुरम्बम् (३), कदम्बकम्

**समवस्तूनां वृन्दस्य नाम** - वर्गः (१)

**प्राणिनां समूहस्य नामनी** - सङ्घः (१), सार्थः (१)

**सजातीयानां प्राणिनां समूहस्य नाम** - कुलम् (३

**पशुपक्षिणां समूहस्य नाम** - यूथम् (५)

**पशूनां समूहस्य नाम** - समजः (१)

**पशुभिन्नप्राणिनां समूहस्य नाम** - समाजः (१)

**सधर्मिणां समूहस्य नाम** - निकायः (१)

**पुञ्जस्य नामानि** - पुञ्जः (१), राशिः (१), उत्करः (१), कूटम् (५)

**कपोतशुकमयूरतित्तिरीणां गणानां नामानि** - कापोतम् (३), शौकम् (३), मायूरम् (३), तैत्तिरम् (३)

**गृहे पालितानां पशुपक्षिणां नामनी** - छेकः (१), गृह्यकः (१)

## अभ्यासः

१. **समूहस्य नामानि श्रावयत ।**

२ **शावकस्य सर्वाणि नामनि वदत ।**

३ **सङ्क्षेपेण उत्तरं लिखत**

(क) युगलस्य कानि नामानि सन्ति ?

(ख) सजातीयानां प्राणिनां समूहस्य नाम किम् ?

(ग) पशुपक्षिणां समूहस्य किं नाम वर्तते ?

(घ) कपोतशुकमयूराणां गणानां कानि नामानि सन्ति ?

(ङ) सधर्मिणां समूहस्य किं नाम वर्तते ?

४. **परस्परं मेलयत**

| | |
|---|---|
| वर्तकः | संडीनम् |
| पक्षः | वर्तिका |
| प्रडीनम् | युग्मम् |
| मिथुनम् | राशिः |
| युगम् | गरुत् |
| पुञ्जः | द्वन्द्वम् |

५. **नेपालीभाषायामर्थं लिखत**

चकोरकः, त्रोटिः, पक्षतिः, कोषः, पाकः, शावकः, युगलम्, संहतिः, सङ्घः, उत्करः ।

६. **पर्यायशब्दान् लिखत**

लावः, छदः छेकः, कूटम्, स्तोमः, निवहः, कुलायः, पृथुकः, युगलम्, सार्थः।

७. **शिशुशब्दस्य सर्वाणि रूपाणि लिखत ।**

८. **पुञ्जस्य सर्वाणि नामानि लिखत ।**

९. **संस्कृतेऽनुवादं कुरुत**

(क) चराहरू रुखमा गुँड बनाउँछन् ।

(ख) हामी सामाजिक प्राणी भएकाले समाजमा मिलेर बस्छौँ ।

(ग) मानिसलगायत पशु र पन्छीले पनि आफ्ना बच्चाको पालन गर्दछन् ।

(घ) मुस्ताङबाट भेडाको बथान आउँदै छ ।

# स्वावलम्बनम्

(किलेन्थिसः जिनोनामकस्य ग्रीसदेशस्य विदुषो गुरुकुले पठति । सः निर्धनो वर्तते किन्तु प्रतिभाशाली अस्ति । गुरुकुले क्रीडासमयो वर्तते । बहवश्छात्राः क्रीडास्थले क्रीडन्तो दृश्यन्ते, किन्तु किलेन्थिसः किञ्चिद् दूरे एकाकी वृक्षच्छायायां पुस्तकमादाय पठन्नस्ति । तस्याध्ययनशीलं स्वभावं दृष्ट्वा सतीर्थ्यास्तमसूयन्ति, तस्य जीर्णानि शीर्णानि च वस्त्राणि विलोक्य तमुपहसन्ति ।)

**निकोलसः** (उपहसन्निव) अयि मित्राणि ! इतः शृण्वन्तु । महत्त्वपूर्णा वार्ता वर्तते ।

**कोलम्बसः** (त्वरया गच्छन्) का वर्तते वार्ता ? शीघ्रं वद, औत्सुक्येन धैर्यं मे क्षीणं वर्तते । ज्ञातुमिच्छामि नवीनं वृत्तान्तम् ।

**अलेक्जेन्डरः** (समीपमागत्य) का गोप्यवार्ता प्रचलति ? अहमपि ज्ञातुं शक्नोमि किमु ?

**निकोलसः** किमर्थं न हि ? एकं परित्यज्य सर्वेऽपि वयं ज्ञातुं शक्नुमः । (सर्वानाहूय, मन्दस्वरेण) गुरुर्वदति, "किलेन्थिसो मम प्रियतमश्छात्रः । स हि जिज्ञासुर्निष्ठावाननुशिष्टश्च । तस्य विद्याव्यसनमन्यैरपि सर्वैरनुकरणीयम्" इति ।

(निकोलसस्य वार्तां श्रुत्वा अन्ये विस्मयान्विता भवन्ति)

**कोलम्बसः** (उपहासेन मुखं विकुर्वन्) स खलु दरिद्रः कथं प्रियतमश्छात्रो भवितुमर्हति ? तस्य पार्श्वे तु गुरवे उपहरणीयं किमपि नास्ति । न तु स्वस्य शरीरे कानिचन सुन्दराणि वस्त्राणि सन्ति । केवलं पुस्तकमादाय पठनेन विद्याव्यसनं भवति किमु ? वयमपि पठामस्तर्हि ।

**अलेक्जेन्डरः** इत्थं कुर्मः । सर्वेऽपि तस्येव पुस्तकमादाय वसामः, गुरुरस्मान् वीक्ष्यास्माकमपि प्रशंसां विधास्यति । यथा स वञ्चको गुरुं भ्रामयति, तथैव कुर्मो वयमपि ।

**कोलम्बसः** आम्, शोभनः खलु उपायः । शुभस्य शीघ्रम् । किं मित्राणि ?

(सर्वे परस्परं मुखं वीक्ष्य स्वीकृतिं जनयन्ति । पुस्तकमादाय किलेन्थिसस्य समीपं गत्वा निवसन्ति । किलेन्थिसोऽध्ययने निमग्नो वर्तते । किन्त्वन्येषामध्ययने तथा

ध्यानं नास्ति, केवलं पुस्तकमादाय तमुपहसन्तो वर्तन्ते ।)

**निकोलसः** मित्राणि ! पश्यन्तु, विद्याव्यसनिनं गुरोः प्रियतमं च शिष्यम् । कथं ध्यानेन पठति ? अहमनुमिनोमि, एष खलु विश्वगुरुर्भविष्यति किल !

**कोलम्बसः** (अट्टहासं कुर्वन्) हा हा हा ... ! विश्वगुरुः । यस्य पार्श्वे प्रतिभा नास्ति स हि खलु पुस्तकानि रटति । अस्मादृशानां प्रतिभाशालिनां कृते नैवावश्यकं पुस्तकस्य ज्ञानम् । प्रतिभाबलेनैव विश्वं वशीकर्तुं पारयामः । किमु मित्राणि ?

**अलेक्जेन्डरः** आम् मित्र ! शुकवत् पुस्तकानां रटनेन किम् ? अयं हि संसारः प्रतिभाबलेन संसरति । संसारे तु धनवतामेव महिमा गीयते, न ज्ञानवताम् । यस्य पार्श्वे धारणाय समीचीनानि वस्त्राणि न वर्तन्ते स कथं ज्ञानवान् भवितुं शक्ष्यति ? असम्भवमिदं सर्वम् ।

**कोलम्बसः** एष तु प्रतिमासं गुरवे शुल्कमपि दातुं न शक्नोति । पश्यन्तु, अपरस्मिन् मासे एव गुरुकुलाद् निष्कासितो भविष्यति ।

**निकोलसः** परं श्रूयते, एष तु प्रतिमासं समये एव शुल्कं प्रददाति इति, तत् कथं सम्भवेत् ?

**कोलम्बसः** धनार्जनस्य अनेके उपायाः सन्ति मित्राणि ! वाणिज्यम्, वेतनम्, भिक्षाटनम्, चौर्यम् चेत्यादय उपायाः । एष खलु दरिद्रो वाणिज्यं तु नैव करोति, न वा कुतोऽपि वेतनं लभते । आदिनं विद्यालये एव निवसति, अतो भिक्षाटनायापि समयो नास्ति । प्रतिमासं भिक्षामपि जना दातुं नैव शक्नुवन्ति, यतो जनानां पार्श्वे निष्प्रयोजनं धनं तु न भवति । तर्हि भवन्त एवानुमानं कुर्वन्तु एष कथं धनमर्जयति ?

**अलेक्जेन्डरः** (विस्मयान्वितः सन्) अहो ! मया तु विचारो नैव विहित आसीत् । एष खलु चौर्यं करोति । अतः प्रतिमासं समये एव शुल्कं दातुं शक्नोति । नो चेत् कथमेतस्य पार्श्वे रूप्यकाणि आपतेयुः ?

**निकोलसः** अहो ! एतत् तु सर्वं गुरवे निवेदनीयम् । चौर्यं खलु नैव शोभनम् । यश्चौर्यं करोति, स खलु राजदण्डभाग् भवति गुरुणा वयं निवेदिताः । एष खलु राजदण्डस्य भाजनम् ।

(एतत् सर्वं श्रुत्वा किलेन्थिसस्य धैर्यं विनश्यति । ततः स वक्तुमारभते ।)

**किलेन्थिसः** मित्राणि ! भवतां कृते मित्रेति सम्बोधनमपि नोचितं मन्ये । येऽन्येषां

निर्धनतामुपहसन्ति, स्वयं नाधीयन्ते, अन्यानपि बाधन्ते । नाहं चौर्यं करोमि कदापि, अन्यायेन द्रव्यार्जनं न मे रोचते । अहं तु परिश्रमेण धनमर्जयित्वा शुल्कं गुरवे निवेदयामि । किन्तु भवन्तो मामसूयन्तो दोषारोपं कुर्वन्ति । (रोदितुमारभते)

**अलेक्जेन्डरः** चौर्यमपि खलु परिश्रमः । तत्रापि धनं कुत्रास्तीति प्रथमं ज्ञातव्यं भवति । पश्चाच्च निर्जने गृहे प्राकारमारुह्य गन्तव्यं भवति । यदि धनपतिस्तत्रापतिष्यति तर्हि ? एतादृशं महान्तं परिश्रमं कृत्वा धनार्जनं कथमन्ये कर्तुं शक्नुवन्ति ? एतानि वस्त्राणि अपि प्राकारस्य आरोहणे शीर्णानि स्युः, किमु मित्राणि ?

**अन्ये** आम् ! अवश्यमेव तथा स्यात् । गच्छामो गुरवे सर्वं निवेदयितुम् ।

(सर्वे गुरुसमीपं गच्छन्ति । किलेन्थिसोऽपि मलिनमुखो गच्छति ।)

**निकोलसः** गुरो ! निवेदनीयं किमपि वर्तते ।

**गुरुः (जिनो)** वदन्तु ! किं निवेदनीयं वर्तते ?

**निकोलसः** चौर्येण धनार्जने दोषो वर्तते न वा ?

**गुरुः** अवश्यमेव । यश्चौर्यं कुरुते स हि राजदण्डभाग् भवति । किमर्थमेतादृशं प्रश्नं पृच्छसि ?

**अलेक्जेन्डरः** अस्माकमेकः सखा चौर्यं करोतीत्यस्माकं निश्चितम् । अतः सोऽपि राजदण्डमर्हति ।

**गुरुः** कस्तथा कुरुते ? वदन्तु ।

**कोलम्बसः** यो भवतां पुरतः साधुवद् आचरति । प्रतिमासं शुल्कं समये प्रददाति च । यस्य पार्श्वे धारणाय समीचीनानि वस्त्राणि न सन्ति, पठनाय समीचीनानि पुस्तकानि च न सन्ति, कथं स समये शुल्कं ददत् अस्ति ? सम्यग् विचारिते सति चौर्यमेव तस्य शरणम् । एतदस्माकं गुरुकुलस्य लोकापवादाय भवति । अत एष दण्डभाजनो दण्डनीयः ।

**गुरुः** कथं यूयमेतावता निश्चयेन वक्तुं शक्नुथ ? अस्ति किञ्चन प्रमाणम् ?

**निकोलसः** एष निर्धनो वर्तते इति तु सर्वेषां ज्ञातमेव । वाणिज्यं त्वेष नैव कुरुते, न वा वेतनं कुतश्चन लभते । भिक्षाटनाय समयो नास्ति । तर्हि चौर्यमेवास्य शरणम् । अत एव वयं निश्चयेन वक्तुं शक्नुमः ।

**किलेन्थिसः** गुरो ! नाहं चौर्यं कुर्वे । श्रमेण धनमर्जयित्वा भवते शुल्कं निवेदयामि । परिश्रमेण पठामि च । मम नास्ति कोऽपि अपराधः, भवानेव मम शरणम् ।

**अन्ये** अहो ! पश्यन्तु वञ्चनम् । गुरुस्तु सर्वदैव एतस्य पक्षपातं करिष्यत्येव । यत एष हि गुरोः प्रियतमः शिष्यः । अस्त्वेतस्य कल्याणम् । वयमपि इतः परं चौर्याय प्रवृत्ता भवेम । अध्ययनेन किम् ?

(बालकानां तादृशं दुर्वचनं श्रुत्वा, दुर्व्यवहारं च दृष्ट्वा गुरुः खिन्नः सञ्जातः ।)

**गुरुः** (खिन्नः सन्) अस्तु तर्हि न्यायालयं गच्छामः । न्यायाधीशो हि निर्णयं करिष्यति सर्वम् । वत्स किलेन्थिस ! मा भैषीः । यदि त्वं निरपराधोऽसि तर्हि न्यायाधीशस्ते रक्षां विधास्यति ।

**सर्वे** (एकेन स्वरेण) अस्तु गच्छामः, एष खलु कारागारे पातनीयः ।

(गुरोः प्रस्तावमनुसृत्य सर्वे न्यायालयं गच्छन्ति । न्यायाधीशः सर्वमपि वृत्तान्तं श्रुत्वा किलेन्थिसमग्रे आहूय प्रष्टुमारभते ।)

**न्यायाधीशः** किलेन्थिस ! त्वयि आरोपो वर्तते यत्त्वं चौर्यं कृत्वा शुल्कं निवेदयसि ।

**किलेन्थिसः** नहि महोदय ! नाहं चौर्येण धनमर्जयामि । अहन्तु परिश्रमेण धनमर्जयित्वा गुरवे निवेदयामि ।

**न्यायाधीशः** त्वं तु बाल एवासि । कीदृशं श्रमं कुरुषे येन धनार्जनं भवेत् ? अस्ति किमपि प्रमाणम् ?

**किलेन्थिसः** आम्, अवश्यमेव । मम पार्श्वे साक्षिद्वयं वर्तते । येषां माध्यमेन मम निरपराधता सेत्स्यति । भवतामनुमतिर्वर्तते चेदहं स्वस्य प्रथमं साक्षिणमत्र आह्वयामि ।

**न्यायाधीशः** अवश्यम्, अनुमतिर्वर्तते ।

(कश्चन उद्यानरक्षकः किलेन्थिसस्य प्रथमः साक्षी आसीत् । स अग्रे आगत्य स्थितवान्)

**न्यायाधीशः** किं किलेन्थिसः चौर्यं कुरुते इति तन्मित्राणामारोपो निराधारो वर्तते ? अस्ति किमपि प्रमाणम् ? सत्यं वदतु भवान्, नो चेत् भवानेव दण्डभाग् भविष्यति ।

**उद्यानरक्षकः** अवश्यमेव महोदय ! असत्यभाषणम् ममैव दण्डाय भवतीत्यहं सम्यग् जानामि । किन्तु 'मौनात् सत्यं विशिष्यते' इति ऋषिवचनमपि स्मरामि ।

निरपराधस्य दण्डोऽपि नोचित इति सत्यं वक्तुमुपस्थितोऽस्मि । गुरुकुलस्याध्ययनं समाप्य प्रतिदिनमेष बालो ममोद्याने आगच्छति, यत्राहं कार्यं करोमि । अहं वृद्धावस्थापन्नोऽपि । अतः कूपाज्जलं निष्कासयितुं कष्टमनुभवामि । किन्त्वेष बालकः प्रतिदिनमागत्य कूपाज्जलं निःसारयति । तस्य कृते अहं प्रतिसप्ताहं किञ्चित् पारिश्रमिकमेतस्मै ददामि । अतोऽहं निश्चयेन वक्तुं शक्नोमि, एतेन शुल्कार्थं चौर्यं विहितं नास्तीति ।

**न्यायाधीशः** समीचीनम् । भवतां प्रमाणाय धन्यवादाः ! भवान् निवसतु ।

**किलेन्थिसः** अनुमतिर्वर्तते चेदहमन्यमपि साक्षिणं आह्वयितुं वाञ्छामि ।

**न्यायाधीशः** अनुमतिर्वर्तते । आह्वयतु ।

(किलेन्थिसः एकां वृद्धामग्रे आह्वयति । सा वृद्धापि न्यायाधीशस्य समक्षम् आगत्य उत्तिष्ठते)

**वृद्धमाता** अभिवादनं स्वीकरोतु महोदय ! किं मे कर्तव्यम् ?

**न्यायाधीशः** किं भवती एतं बालकं परिचिनोति ?

**वृद्धा** किमर्थं न परिचिनोमि ? एष तु मम नप्तेव वर्तते, यः प्रतिदिनमागत्य मम सहयोगं करोति ।

**न्यायाधीशः** किं भवती असत्यं तु न वदति ?

**वृद्धा** किमर्थमसत्यं ब्रूयाम् ? अस्मिन् वार्धक्ये असत्यभाषणेन नरके पतनाय मे इच्छा न हि वर्तते । एष हि बालकः प्रतिदिनं मद्गेहम् आगच्छति । वार्धक्येनाहं पिष्टपेषणाय घट्टं चालयितुं न शक्नोमि । एष घट्टं चालयति । अन्यानि अपि कर्माणि कर्तुं मम सहयोगं करोति । अहमपि प्रेम्णा कदाचन रूप्यकाणि ददामि ।

(न्यायाधीशः सर्वमपि वृत्तान्तं श्रुत्वा चकितो भवति । ततश्च सः स्वस्य निर्णयं श्रावयितुमारभते ।)

**न्यायाधीशः** आरोपस्य प्रमाणानां च सम्यङ् निरीक्षणेन निश्चितं भवति यत् किलेन्थिसः सर्वथा निर्दोषो निरपराधश्च वर्तते । असूयावशाद् मित्रैरारोपितो दोषो मिथ्या सिद्धो भवति । बालस्यापि किलेन्थिसस्य एतादृशं विद्याव्यसनं दृष्ट्वा सर्वे वयं प्रौढा हृष्टाः स्मः । इतः परं सर्वकार एव शुल्कस्य व्यवस्थां करिष्यति । शुल्कस्य कृते एतेन परिश्रमो नैव करणीयो भविष्यति ।

**किलेन्थिसः** महोदय ! क्षम्यताम् ! अहं मम अध्ययनव्यवस्थायै सर्वकारस्य शुल्कं दास्यतीति

प्रस्तावमहं न स्वीकरोमि । यतोऽहं परिश्रमेण अर्जयित्वा एव अध्ययनं कर्तुं वाञ्छामि । एतेन ममाभिभावकानामुपदेशः सार्थो भविष्यति । अहञ्च अध्ययनाय सम्यक् प्रवृत्तो भविष्यामि । एतेषां वृद्धानामपि तेनैव व्याजेन सेवा भविष्यति, एतेषामाशीर्वादाञ्चाहं प्राप्स्यामि । मम परिश्रमेणाध्ययने सर्वेषां कल्याणं निहितमस्ति । सर्वकारः तादृशानामन्येषां शिक्षाया व्यवस्थां करोतु, ये दुर्बलतया श्रमं कर्तुमसमर्थाः सन्ति । इति ।

(बालस्यापि किलेन्थिसस्यैतादृशं वचनं श्रुत्वा सर्वे सतीर्थ्याः लज्जया नतमस्तका अभूवन् । न्यायाधीशश्चात्यन्तं हृष्टः सञ्जातः । सर्वे प्रौढाः आशीर्भिस्तमन्वमोदयन् । गुरुश्चात्यन्तं हर्षाश्रुपूरितलोचनस्तमचुम्बत् ।)

## शब्दार्थाः

| | |
|---|---|
| निर्धनः | गरिब |
| एकाकी | एक्लै |
| सतीर्थ्याः | सहपाठी साथीहरू |
| औत्सुक्येन | उत्सुकतापूर्वक |
| अनुशिष्टः | अनुशासित |
| विद्याव्यसनम् | अध्ययन गर्ने बानी |
| वीक्ष्य | देखेर |
| वशीकर्तुम् | वशमा राख्न |
| निष्प्रयोजनम् | बेकारको |
| राजदण्डभाग् | राज्यको कारबाहीको पात्र |
| साधुवद् | सज्जन जस्तै |
| लोकापवादाय | सामाजिक बेइज्जती |
| मा भैषीः | नडराऊ |
| कारागारे | जेलमा |
| सेत्स्यति | प्रमाणित हुन्छ |
| वार्धक्ये | बुढेसकालमा |
| दुर्बलतया | कमजोरीले |

# अभ्यासः

## श्रवणं भाषणञ्च

**१. संवादस्य पात्राणां भूमिकां विभज्य केचन साभिनयं पाठं पठत, अन्ये च सुष्ठु श्रुत्वा प्रतिक्रियां प्रकटयत ।**

**२. ह्रस्वदीर्घादिमात्राविचारपुरःसरं वर्णानामुच्चारणस्थानविचारपुरःसरं च उच्चारयत**

वृक्षच्छायायाम्, औत्सुक्येन, अट्टहासम्, निष्कासिताः, शक्नुवन्ति, नाधीयन्ते, न्यायाधीशः, आह्वयामि, उत्तिष्ठते, अध्ययनाय

**३. सन्धियुतानि अधस्तनानि पदानि विच्छिद्य वदत**

तस्याध्ययनशीलम्, जिज्ञासुर्निष्ठावाननुशिष्टश्च, वीक्ष्यास्माकमपि, किन्त्वन्येषामध्ययने, भिक्षाटनायापि, धनपतिस्तत्रापतिष्यति, करोतीत्यस्माकम्, निरपराधोऽसि, प्रस्तावमनुसृत्य, भवतामनुमतिर्वर्तते, पारिश्रमिकमेतस्मै, मित्रैरारोपितः, ममाभिभावकानामुपदेशः

**४. पाठात् कानिचन पञ्च समस्तपदानि अन्विष्य वदत ।**

**५. उदाहरणानुसारं विशेषणविशेष्ये पृथक्कृत्य वदत**

उदाहरणम् - 'बहवः छात्राः' इत्यत्र बहवः इति विशेषणपदम्, छात्राः इति विशेष्यपदम् ।

बहवः छात्राः, धैर्यं मे क्षीणम्, शोभनः खलु उपायः, समीचीनानि वस्त्राणि, एष खलु दरिद्रः, अन्यानि अपि कर्माणि ।

**६. पाठाद् विसर्गयुतानि अनुस्वारयुतानि च पञ्च पञ्च पदानि अन्विष्य वदत ।**

**७. अधस्तनपदैर्निर्मितानि वाक्यानि पाठादन्विष्य वदत**

शीघ्रम्, उपहरणीयम्, ध्यानेन, प्रददाति, निवेदनीयम्, गन्तव्यम्, विचारिते, निश्चयेन

## ८. अतिसङ्क्षेपेण प्रश्नानुत्तरयत

(क) संवादः केषां मध्ये प्रचलति ?

(ख) को गुरोः प्रियतमः शिष्यः ?

(ग) न्यायालये को न्यायं विदधाति ?

(घ) स्वावलम्बी बालकः कः ?

(ङ) गुरोर्नाम किम् ?

(च) साक्षिद्वयं किम् ?

(छ) संवादस्य को विषयः ?

(ज) संवादस्य मूलसन्देशः कः ?

## ९. अधस्तनमनुच्छेदं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत

समाजो द्विविधो भवति सभ्योऽसभ्यश्च । यत्र सामाजिकाः परस्परं कलहं न कुर्वन्ति, मिलित्वा निवसन्ति स समाजः सभ्यः । यत्र च सामाजिकाः परस्परं कलहं कोलाहलं वा कुर्वन्ति, स च असभ्यः । सभ्यसमाजे जनाः सामाजिकमर्यादां पालयन्ति । तत्र नागरिकाः सामाजिकशान्त्यै प्रयतन्ते । समाजे आपतितानां समस्यानां समाधानाय परस्परं वार्तालापं विधाय उपायानन्विषन्ति । असभ्यसमाजे जना मर्यादां नैव पालयन्ति । सामाजिका दुर्व्यवहारं कुर्वन्तो दृश्यन्ते, येन शान्तिर्न भवति । आपतितानां समस्यानां समाधानाय वार्तालापं नैव कुर्वन्ति, अपि तु परस्परं स्वस्य अहङ्कारं प्रदर्श्य अशान्तिम् निमन्त्रयन्ति । सभ्यसमाजेषु बालानां वृद्धानां च सम्यग् पालनं दृश्यते । किन्तु असभ्यसमाजेषु बालकानां वृद्धानां च सम्यग् पालनं पोषणं वा न भवति । अतः शिक्षिता मानवाः सभ्यसमाजे एव निवसितुमिच्छन्ति ।

### (अ) एकवाक्येन उत्तरयत

(क) समाजः कतिविधो भवति ?

(ख) कस्मिन् समाजे जनाः मिलित्वा वसन्ति ?

(ग) शिक्षिता जनाः कुत्र निवसितुमिच्छन्ति ?

**(आ) अधस्तना व्यवहाराः सभ्येऽसभ्ये वा कीदृशे समाजे दृश्यन्ते ? अनुच्छेदं पठित्वा वदत**

(क) परस्परं कलहः

(ख) वार्तालापेन समस्यायाः समाधानम्

(ग) अहङ्कारस्य प्रदर्शनम्

(घ) बालानां सम्यक् पालनम्

(ङ) शान्तिस्थापनायै प्रयत्नः

**(इ) अधस्तनानि भाषिककार्याणि कुरुत**

(क) अनुच्छेदात् द्वे विशेषणपदे अन्विष्य लिखत ।

(ख) क्रियापदत्रयम् अन्विष्य तेषां प्रयोगद्वारा वाक्यानि निर्माय वदत ।

(ग) षष्ठ्यन्तानि त्रीणि पदानि अन्विष्य वदत ।

(घ) विपरीतार्थबोधकं पदयुग्मद्वयं अन्विष्य लिखत ।

**१०. सन्मित्राणि कीदृशं व्यवहारं कुर्वन्ति ? दुर्मित्राणि च कीदृशम् ? परस्परं विमृश्य निष्कर्षं श्रावयत ।**

## पठनम्

**१. पाठानुसारं शब्दार्थौ परस्परं मेलयत**

| | |
|---|---|
| औत्सुक्येन | बहिष्कृतः |
| उपहरणीयम् | निर्दोषः |
| विश्वगुरुः | उत्सुकतया |
| निष्कासितः | वृद्धावस्था |
| मलिनमुखः | निवेद्यम् |
| निरपराधः | जगद्गुरुः |
| वार्धक्यम् | मलिनवदनः |

२. **सखिद्वयमुद्यानरक्षकस्य, वृद्धमहिलायाश्च अभिव्यक्ती: पठ, अन्ये च त्रुटीर्विचार्य निराकुरुत ।**

३. **पाठस्य मौनपठनं विधाय रिक्तस्थानं पूरयत**

(क) किलेन्थिसः ......... वर्तते, किन्तु प्रतिभाशाली अस्ति ।

(ख) सखायः किलेन्थिसस्य .............. कुर्वन्ति ।

(ग) बालकः प्रतिदिनं कूपाज्जलं ......... सहयोगं करोति ।

(घ) अभिभावकानामुपदेशः .............. भविष्यति ।

(ङ) सर्वकारः तेषां सहयोगं करोतु, ये .......... परिश्रमं कर्तुं न शक्नुवन्ति ।

४. **किलेन्थिसस्य मित्राणि कीदृशं व्यवहारं कुर्वन्ति स्म ? कैश्चन वाक्यैस्तेषां व्यवहारस्य वर्णनं कुरुत ।**

५. **पूर्वं पाठस्य मौनपठनं कुरुत, तदनु तस्य निष्कर्षं सङ्क्षेपेण कक्षायां श्रावयत ।**

६. **अधो लिखितानां कथनानां वक्तारं निश्चित्य लिखत**

(क) किलेन्थिसो मम प्रियतमश्छात्रः । स हि जिज्ञासुर्निष्ठावाननुशिष्टश्च । तस्य विद्याव्यसनमन्यैरपि सर्वैरनुकरणीयम्

(ख) यथा स वञ्चको गुरुं भ्रामयति, तथैव कुर्मो वयमपि ।

(ग) अस्मादृशानां प्रतिभाशालिनां कृते नैवावश्यकं पुस्तकस्य ज्ञानम् ।

(घ) नाहं चौर्यं करोमि कदापि, अन्यायेन द्रव्यार्जनं न मे रोचते

(ङ) सम्यग् विचारिते सति चौर्यमेव तस्य शरणम् ।

(च) कीदृशं श्रमं कुरुषे येन धनार्जनं भवेत् ? अस्ति किमपि प्रमाणम् ?

(छ) निरपराधस्य दण्डोऽपि नोचित इति सत्यं वक्तुमुपस्थितोऽस्मि ।

(ज) एष हि बालकः प्रतिदिनं मद्गेहम् आगच्छति ।

(झ) एतेषां वृद्धानामपि तेनैव व्याजेन सेवा भविष्यति, एतेषामाशीर्वादाञ्चाहं प्राप्स्यामि ।

७. अधस्तनं चित्रं दृष्ट्वा तस्य अनुच्छेदेनैकेन वर्णनं कुरुत



८. सन्मित्राणां दुर्मित्राणां च व्यवहारं अधस्तनरीत्या लिखत

| सन्मित्राणि | दुर्मित्राणि |
| --- | --- |
| १. अध्ययने सहयोगं कुर्वन्ति । | १. मित्रस्य असूयां कुर्वन्ति । |
| २. अन्येषामग्रे प्रशंसां कुर्वन्ति । | २. अन्येषामग्रे निन्दां कुर्वन्ति । |
| ३. ...................... | ३. ...................... |
| ४. ...................... | ४. ...................... |
| ५. ...................... | ५. ...................... |

## ९. अधस्तनं पद्यं पठित्वा गद्यान्तरं कृत्वा लिखत

दुर्जनेन समं सख्यं
वैरं वापि न कारयेत् ।
उष्णो दहति चाङ्गारः
शीतः कृष्णायते करम् ॥

## १०. अधोलिखितं संवादं पठित्वा पात्राणां रुचिं वर्णयत

**नन्दनः** नरेश ! कुत्र गच्छसि ?

**नरेशः** क्रीडनाय गच्छामि ।

**विजयः** सम्प्रति क्रीडायाः समयो नास्ति । अयं तु गृहकार्यस्य समयः ।

**निखिलः** भवतु तावत्, अहं तु दूरदर्शने सानन्दं व्यङ्ग्यचलचित्रं पश्यामि ।

**गोपालः** इदानीं नाहं तत् करोमि । पुष्पवाटिकामेत्य जलसेचनं करोमि । पुष्पाणि शुष्काणि सन्ति ।

**प्रमोदः** प्रतिवेशिगृहे नैतिकप्रवचनस्य कार्यक्रमो वर्तते । तत्र गत्वा लाभान्वितो भवामि ।

**रमा** अद्य कपोता बुभुक्षिताः सन्ति । तेभ्योऽन्नं ददामि । जलपात्रे जलं च स्थापयामि ।

**दीपिका** अहं तु गृहकार्याय मातुः सहयोगं करोमि । माता एकाकिनी गृहकार्यं कुर्वाणा वर्तते ।

**नन्दनः** अहमपि नास्मि अलसः । गृहं परितः अवकरं सङ्कलय्य एकत्र स्थापयामि । वातावरणस्य स्वच्छीकरणमपि अतीव आवश्यकम् ।

# लेखनम्

## १. अधस्तनानि पदानि शुद्धानि विधायाभ्यासपुस्तिकायां लिखत

श्रिण्वन्तु, परीत्यज्य, प्रतिभासालिनाम्, निस्काशितः, न्यायधीसः, सेत्स्यति, विद्याब्यसनम्, दुर्वलतया ।

२. **सङ्क्षेपेण उत्तराणि लिखत**

(क) किलेन्थिसः कुत्र पठति ?

(ख) त्रिभिर्वाक्यैः किलेन्थिसस्य परिचयं लिखत ।

(ग) किं सर्वैरनुकरणीयम् ?

(घ) पुस्तकस्य ज्ञानं केषां कृते नावश्यकम् ?

(ङ) धनार्जनस्य उपायान् लिखत ।

(च) किलेन्थिसस्य सतीर्थ्यानां कृते मित्रेति सम्बोधनं किमर्थं नोचितम् ?

(छ) कीदृशो जनो राजदण्डभाग् भवति ?

(ज) निरपराधस्य रक्षां कः करिष्यति ?

(झ) वृद्धा किमर्थमसत्यं न वदति ?

(ञ) केषां कृते सर्वकारद्वारा शिक्षायै व्यवस्था करणीया ?

३. **अधस्तनपदानां वाक्येषु प्रयोगं कुरुत**

एकाकी, किमु, विद्याव्यसनम्, महिमा, प्रददाति, निष्प्रयोजनम्, निवेदयामि, मलिनमुखः, प्रतिमासम्, भिक्षाटनाय, पक्षपातः, निरपराधता, निःसारयति, रूप्यकाणि, अध्ययनाय ।

४. **स्वावलम्बनेन के लाभा भवन्ति ? विमृश्य अनुच्छेदेनैकेन सरलभाषया वर्णयत ।**

५. **स्वावलम्बनाय अस्माभिः कीदृशाः उपाया अबलम्वितुं शक्यन्ते ? लिखत ।**

६. **पाठात् पञ्च क्रियापदानि, पञ्च विशेषणपदानि, पञ्च नामपदानि च सङ्गृह्य सारिण्यां दर्शयत ।**

| क्रियापदानि | विशेषणपदानि | नामपदानि |
|---|---|---|
| १. ...................... | १. ...................... | १. ...................... |
| २. ...................... | २. ...................... | २. ...................... |
| ३. ...................... | ३. ...................... | ३. ...................... |
| ४. ...................... | ४. ...................... | ४. ...................... |
| ५. ...................... | ५. ...................... | ५. ...................... |

**७. अधस्तनं गद्यांशं पठित्वा पञ्च प्रश्नान् निर्मात**

मानवानां शरीरे अनेके रोगा उत्पद्यन्ते । रोगाणां कारणेन शरीरं दुर्बलं जीर्णं च भवति । आहारविहारयोरनियमितत्वम्, पौष्टिकाहारस्याभावः, वातावरणप्रदूषणम्, धूमपानम्, मद्यपानम् चेत्यादीनि कारणानि रोगाणां भवन्ति । सम्प्रति विश्वस्मिननेके नवीना रोगा वर्धमाना दृश्यन्ते । कीटाणूनां प्रकोपाद् जायमानानां रोगाणामाधिक्यं दृश्यन्ते । मानवानामेव न अपि तु वृक्षाणाम् ओषधीनां वनस्पतीनां च क्षेत्रेषु रोगाः प्रसरन्तः सन्ति । येन वन्याः पशवोऽपि रोगार्ता जायमानाः सन्ति । एतेन प्राणिसमुदायः सर्वोऽपि दुःखार्तो दृश्यते । चिकित्सालयानां सङ्ख्या प्रतिदिनं वर्धमाना वर्तते । तथापि सर्वेषु चिकित्सालयेषु रोगार्तानां संबाधो यथावत् वर्धमानो वर्तते । एतादृश्याः समस्यायाः समाधानं कथं भवेदिति अस्माभिरहरहः विचारणीयम् । समाधानाय प्रयत्नोऽपि विधेयः ।

**८. उपर्युल्लिखितं गद्यं शिक्षकस्य मुखात् श्रुत्वा लिखत, तस्य साहाय्येन त्रुटीश्च निराकुरुत ।**

**९. अधोलिखितं संवादं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

**पत्रकारः** महाशय ! भवान् किञ्चित् प्रष्टुमिच्छामि ? अनुमतिर्वर्तते ?

**दार्शनिकः** आम् अनुमतिर्वर्तते, यथेच्छं दश प्रश्नान् कुरु ।

**पत्रकारः** भवतामनुसारेण प्राणिनां दुःखस्य मूलं कारणं किमस्ति ?

**दार्शनिकः** अज्ञानमेव निखिलस्य दुःखस्य कारणं वर्तते । ज्ञानेन विना प्राणिनो दुःखिनो भवन्ति ।

**पत्रकारः** अज्ञानस्य निराकरणस्य उपायो नास्ति ?

**दार्शनिकः** कथं न भवेत् ? अस्ति । प्राणिभिस्तत् कार्यं कर्तव्यं येन दुःखस्य कारणमज्ञानमेव नष्टं भवेत् ।

**पत्रकारः** मनसि कथमशान्तिः उत्पद्यते ? तदपि ज्ञातुमिच्छामि ।

**दार्शनिकः** प्राणिनो लोभाकृष्टा भवन्ति । लोभाद् मनोऽशान्तं जायते । उद्विग्नमनसो जनस्य धैर्यमपि समाप्तं भवति । लोभात् जनः सरलतया मुक्तो भवितुं न शक्नोति ।

**पत्रकारः** मानवजीवनस्य कर्तव्यं किम् ?

**दार्शनिकः** लोकोपकार एव । लोकोपकाराद् नास्ति अन्यद् गुरुतरं कर्तव्यम् । लोकोपकारेण विना जीवनयापनं व्यर्थमेव । लोको लोकोपकारं न विदधाति चेत् को विदधाति ?

**पत्रकारः** क ईश्वरं प्राप्नोति ?

**दार्शनिकः** यः सत्कर्म करोति स ईश्वरं प्राप्नोति । ईश्वरप्राप्तेर्द्वारं सत्कर्म वर्तते ।

**(क) अधस्तनानां प्रश्नानामुत्तराणि लिखत**

(अ) कः प्रष्टा ? कश्च उत्तरयिता ?

(आ) प्रष्टा कस्मिन् विषये प्रश्नान् पृच्छति ?

(इ) दार्शनिकस्यानुसारेण दुःखस्य मूलं कारणं किम् ?

(ई) कस्य धैर्यं समाप्तं भवति ?

(उ) मानवजीवनस्य किं कर्तव्यम् ?

**(ख) परस्परं मेलयत**

| | |
|---|---|
| अज्ञानाद् | जीवनं सार्थकम् भवति । |
| लोभाद् | जन ईश्वरं प्राप्नोति । |
| लोकोपकाराद् | प्राणिनो दुःखिता भवन्ति । |
| सत्कर्मणः | मनसि अशान्तिरुत्पद्यते । |

**(ग) निर्दिष्टानि भाषिककार्याणि कुरुत**

(अ) 'प्राणिनो लोभाकृष्टाः भवन्ति' इति वाक्ये किं विशेषणं किं च विशेष्यम् ?

(आ) त्रीणि कृदन्तपदानि अन्विष्य लिखत ।

(इ) 'मनस्'शब्दस्य सर्वासु विभक्तिषु रूपाणि लिखत ।

(ई) उपसर्गयुतानि त्रीणि पदानि अन्विष्य लिखत ।

## १०. अधस्तनं गद्यांशं पठित्वा उचितं शीर्षकं निर्धारयत

अस्माकं राष्ट्रं प्राकृतिकस्रोतसो दृष्ट्या समृद्धं वर्तते । जल-वन-पर्वत-हिमालयाः कामधेनुरूपाः सन्ति । प्राकृतिकस्रोतसामुपयोगेन वयं धनिनो भवितुं शक्नुमः । वैदेशिकाश्च व्याहरन्ति यद् नेपालभूमिः स्वर्णस्थाली इव वर्तते । स्वर्णस्थाल्या उपयोगार्थं राज्येन नागरिकैश्च सक्रियैर्भाव्यम् । इयं राष्ट्रसेवेति विचार्य कार्यं क्रियते चेद् नेपालो धनवान् भविष्यति । नेपालिनश्च सुखं प्राप्स्यन्ति ।

## ११. विभक्तिवचने निर्दिशत

क्रीडन्तः, पठनेन, पुस्तकानाम्, रूप्यकाणि, राजदण्डभाग्, निरपराधस्य ।

## १२. निर्देशानुसारेण रिक्तस्थानं पूरयत

(क) अहं गुरवे प्रतिमासं शुल्कं ...... । (प्र+दा, लट्-बहुवचनम्)

(ख) सतीर्थ्याः किलेन्थिसस्य असूयां ..... । (वि+धा, लट्-बहुवचनम्)

(ग) न्यायाधीशो निर्णयम् ....... . । (कृ, लङ्, बहुवचनम्)

(घ) अहं किमपि ............... वाञ्छामि । (प्रच्छ, तुमुन्)

(ङ) किलेन्थिसस्य पार्श्वे गुरवे .......... वस्तु नास्ति । (उप+हृ, अनीयर्)

### अनुप्रयोगः

## १. अधस्तनमनुच्छेदं सम्यक् पठित्वा उत्तराणि लिखत

संस्कृतभाषायां षट् कारकाणि प्रसिद्धानि सन्ति । वाक्ये क्रियापदेन सह सम्बद्धानि पदानि कारकाणि उच्यन्ते । क्रियासम्पदने यः स्वतन्त्रतया प्रवृत्तो दृश्यते स **कर्ता** उच्यते । कर्तुः क्रियाद्वारा यद् आप्तुं वाञ्छति तत् **कर्म**पदेनाभिधीयते । क्रियां साधयितुं कर्ता साधनरूपेण यत् प्रयुङ्क्ते तत् **करणम्** । दानक्रियायां ग्रहीता **सम्प्रदान**रूपो भवति । यस्मात् किञ्चन वियुज्यते तद् **अपादानम्** । आधारश्च **अधिकरणम्** । एते केवलं कारकस्य सामान्यनियमाः सन्ति । संस्कृतभाषायां कारकस्य चर्चा विस्तरेण लभ्यते । अत एव 'सर्वे भग्नाः कारकान्तप्रयोगे' इति उक्तिरत्यन्तं प्रसिद्धा वर्तते । कारकाणां नामानि स्मर्तुं अधस्तनं पद्यं सहायकं भवति-

**कर्ता कर्म च करणं सम्प्रदानं तथैव च ।**
**अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥**

कारकाणि बोधयितुं विशेषविभक्तेः प्रयोगः संस्कृतभाषायां प्रसिद्धः । यद्यपि एतस्मिन् कारके एतस्या विभक्तेः प्रयोग इति सामान्यनियम एव । कुत्रचित् एकस्यैव कारकस्य बोधनाय बहवः कर्तृवाच्ये कर्तरि प्रथमा, कर्मवाच्ये कर्मणि प्रथमा प्रयुज्यते । कर्तृवाच्यस्य कर्मणि द्वितीयाविभक्तेः प्रयोगो भवति । कर्मभाववाच्ययोः कर्तरि, करणे च तृतीया युज्यते । सम्प्रदाने चतुर्थी, अपादाने पञ्चमी, अधिकरणे च सप्तमी विभक्तिः प्रयुज्यते । अन्यासु च विशेषावस्थासु विभक्तिप्रयोगे अनेके नियमाः सन्ति ।

(अ) कारकाणि कति ? कानि च तानि ?

(आ) क्रियासम्पादकं कारकं किम् ?

(इ) तृतीयाविभक्तिः कुत्र विधीयते ?

(ई) अधिकरणे का विभक्तिर्जायते ?

२. **कारकाणामुदाहरणानि दृष्ट्वा तादृशानि एव अन्यानि वाक्यानि निर्माय वदत**

| **कारकाणि** | **उदाहरणानि** |
|---|---|
| कर्ता | **गुरुः** छात्रान् संस्कृतभाषां पाठयति ।<br>**बालकः** कन्दुकेन क्रीडति ।<br>**रावणेन** बहवो निर्दोषा मानवा हताः । |
| कर्म | गुरुः **छात्रान् संस्कृतभाषां** पाठयति ।<br>रावणेन बहवो निर्दोषा **मानवा** हताः । |
| करणम् | कृषको **हलेन** क्षेत्रं कर्षति ।<br>छात्राः **पताकाभि**र्विद्यालयं सज्जीकुर्वन्ति । |
| सम्प्रदानम् | शिक्षिका **छात्रायै** पुस्तिकां ददाति ।<br>वयं **सर्वेभ्यो याचकेभ्यो** रूप्याकाणि दातुं न शक्नुमः । |
| अपादानम् | मम पिता **विदेशात्** धनम् आनेष्यति ।<br>**हिमालयेभ्यो** नद्यः प्रभवन्ति । |
| अधिकरणम् | भगिन्या**श्चित्रकलायां** रुचिरस्ति ।<br>**पुस्तकेषु** ज्ञानराशिर्भवति । |

## ३. रेखाङ्कितानां पदानां कारकाणि निर्दिशत

**संसारे** बहुविधाः **मानवा** वसन्ति । तेषां सर्वेषां भिन्नेषु **विषयेषु** रुचिर्भवति । केषाञ्चन **गायने**, केषाञ्चन लेखने, केषाञ्चन व्यापारे, केषाञ्चन परोपकारे वा रुचिर्दृश्यते । किन्तु सर्वाणि **कार्याणि** आनन्दस्य **लाभाय** एव कुर्वन्ति जनाः । यस्माद् **कार्यादा**नन्दो लभ्यते तदेव कार्यं जनाः कुर्वन्ति । सङ्गीतानुरागी **वाद्येन** यथा आनन्दमनुभवति तथैव सर्जको **लेखन्या** आनन्दमनुभवति । यथा जनानां रुचिस्तथैव आनन्दस्यानुभवोऽपि । अत एवोच्यते '**मुण्डे** मुण्डे मतिर्भिन्ना' इति ।

## ४. कारकाणां समुचितप्रयोगद्वारा 'नेपालस्य प्राकृतिकं सौन्दर्यम्' इति विषयेऽनुच्छेदमेकं रचयत ।

## ५. आशीर्लिङ्लकारस्य अधस्तनानि उदाहरणानि पठित्वा निर्दिष्टकार्याणि कुरुत

| पुरुषाः | परस्मैपदे रूपाणि | | | आत्मनेपदे रूपाणि | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | देयात् | देयास्ताम् | देयासुः | दासीष्ट | दासीयास्ताम् | दासीरन् |
| मध्यमपुरुषः | देयाः | देयास्तम् | देयास्त | दासीष्ठाः | दासीयास्थाम् | दासीध्वम् |
| उत्तमपुरुषः | देयासम् | देयास्व | देयास्म | दासीय | दासीवहि | दासीमहि |

द्रष्टव्यम् - दाधातुरुभयपदी अस्ति । अतः परस्मैपदे आत्मनेपदे च रूपाणि भवन्ति । सर्वे धातव उभयपदिनो न भवन्ति । परस्मैपदिनां परस्मैपदे एव रूपणि भवन्ति । आत्मनेपदिनां च आत्मनेपदे एव ।

(क) शिक्षकस्य साहाय्येन पानार्थकस्य पाधातोराशीर्लिङि सर्वाणि रूपाणि लिखत ।

(ख) कोशस्य व्याकरणस्य वा साहाय्येन स्पर्ध (स्पर्ध सङ्घर्षे) धातोराशीर्लिङि रूपाणि लिखत ।

## ६. निर्दिष्टधातूनाम् आशीर्लिङ्लकारस्य रूपाणां प्रयोगद्वारा वाक्यानि पूरयत

(क) सर्वेषां प्राणिनां मङ्गलं ............ । (भू सत्तायाम्)

(ख) शिक्षका बालानामपि विचारं ............ । (श्रु श्रवणे)

(ग) चिकित्सको रुग्णं रोगभयात् .......... । (त्रैङ् पालने)

(घ) शारदा अस्माकं वदने निवासं .......... । (कृ (डुकृञ्) करणे)

(ङ) वयं बहूनि धनानि ............. । (लभ् (डुलभष्) लाभे)

**७. आशीर्लिंङ्लकारस्य क्रियापदानि प्रयुज्य कानिचन दश वाक्यानि निर्माय शिक्षकं दर्शयत ।**

## कोषानुशीलनम्

### अथ मनुष्यवर्गः

**मनुष्या मानुषा मर्त्या मनुजा मानवा नराः । स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥**

**स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः । प्रतीपदर्शिनी वामा वनिता महिला तथा ॥**

**विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना । प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥**

**सुन्दरी रमणी रामा कोपना सैव भामिनी । वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥**

**कृताभिषेका महिषी भोगिन्योऽन्या नृपस्त्रियः । पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥**

**भार्या जायाऽथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी । पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता ॥**

**कृतसापत्निकाध्यूढाधिविन्नाथ स्वयंवरा । पतिंवरा च वर्याथ कुलस्त्री कुलपालिका ॥**

**कन्या कुमारी गौरी तु नग्निका नागतार्तवा । स्यान्मध्यमा दृष्टरजास्तरुणी युवतिः समे ॥**

**समाः स्नुषाजनीवध्वश्चिरिण्टी तु सुवासिनी । इच्छावती कामुका स्याद् वृषस्यन्ती तु कामुकी ॥**

### पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५) स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**मनुष्यस्य नामानि** – मनुष्यः (१), मानुषः (१), मर्त्यः (१), मनुजः (१), मानवः (१), नरः (१)

**पुरुषस्य नामानि** – पुमान् (१), पञ्चजनः (१), पुरुषः (१), पूरुषः (१), ना (१)

**स्त्रिया नामानि** – स्त्री (२), योषिद् (२), अबला (२), योषा (२), नारी (२), सीमन्तिनी (२), वधूः (२), प्रतीपदर्शिनी (२), वामा (२), वनिता (२), महिला (२)

**स्त्रीविशेषाणां नामानि** – अङ्गना (२) सुन्दराङ्गवती । भीरुः (२) भययुक्ता । कामिनी (२)

कामुका । वामलोचना (२) सुन्दरनयना । प्रमदा (२) यौवनमत्ता । मानिनी (२) अभिमानवती । कान्ता (२) मनोहारिणी । ललना (२), अतिविलासशालिनी । नितम्बिनी (२) विशालनितम्बा । सुन्दरी (२) सौन्दर्ययुता । रमणी (२) रामा (२) रमणप्रिया ।

**कोपवत्याः स्त्रिया नामनी** – कोपना (२), भामिनी (२) ।

**सर्वाङ्गसौन्दर्यसम्पन्नाया स्त्रिया नामानि** – वरारोहा (२) मत्तकाशिनी (२) उत्तमा (२) वरवर्णिनी (२)

**कृताभिषेकाया नृपस्त्रिया नाम** – महिषी (२)

**एतदकृताभिषेकाया नृपस्त्रिया नाम** – भोगिनी (२)

**पत्न्या नामानि** – पत्नी (२), पाणिगृहीती (२), द्वितीया (२), सहधर्मिणी (२), भार्या (२), जाया (२), दाराः (१)

**पतिपुत्रवत्याः स्त्रिया नामनी** – कुटुम्बिनी (२), पुरन्ध्री (२)

**पतिव्रतायाः स्त्रिया नामानि** – सुचरिता (२), सती (२), साध्वी (२), पतिव्रता (२)

**कृतसापत्निकाया नामानि** – कृतसापत्निका (२), अध्यूढा (२), अधिविन्ना (२)

**स्वयंवरायाः स्त्रिया नामानि** – स्वयंवरा (२), पतिंवरा (२), वर्या (२)

**कुलस्त्रिया नामनी** – कुलस्त्री (२), कुलपालिका (२)

**कन्याया नामनी** – कन्या (२), कुमारी (२)

**गौर्याः नामानि** – गौरी (२), नग्निका (२), अनागतार्तवा (२)

**प्रथमवारदृष्टपुष्पायाः स्त्रिया नामनी** – मध्यमा (२), दृष्टरजाः (२)

**युवत्याः नामनी** – तरुणी (२), युवतिः (२)

**स्नुषाया नामानि** – स्नुषा (२), जनी (२), वधूः (२)

**स्ववासिन्या नामनी** – चिरिण्टी (२), स्ववासिनी (२)

**इच्छावत्या नामनी** – इच्छावती (२), कामुका (२)

**कामुक्याः स्त्रिया नामनी** – वृषस्यन्ती (२) कामुकी (२)

## अभ्यासः

१. **स्त्रीविशेषाणां नामानि श्रावयत ।**

२. **पतिव्रतायाः स्त्रिया नामानि वदत ।**

## ३. परस्परं मेलयत

| | |
|---|---|
| ना | कान्ता |
| वनिता | स्वयंवरा |
| ललना | कुलपालिका |
| पुरन्ध्री | पुमान् |
| वर्या | अबला |
| कुलस्त्री | कुटुम्बिनी |

## ४. सङ्क्षेपेण उत्तरयत

(क) पुरुषस्य कति नामानि सन्ति ? कानि च तानि ?

(ख) कुलस्त्रिया द्वे नामनी लिखत ।

(ग) कीदृशी कन्या गौरी कथ्यते ?

## ५. नेपालीभाषायामर्थं लिखत

भामिनी, उत्तमा, सती, दाराः, योषिद्, कुमारी, कामुका, स्वयंवरा, पुरन्ध्री ।

## ६. पर्यायान् लिखत

अवला, ना, मर्त्यः, द्वितीया, साध्वी, अधिविन्ना, वर्या, कुलपालिका, मध्यमा, नग्निका, तरुणी, जनी, चिरिण्टी

## ७. कृतसापत्निकायाः नामानि लिखत ।

## ८. दाराशब्दस्य सर्वासां विभक्तीनां रूपाणि लिखत ।

## ९. संस्कृतेऽनुवादं कुरुत ।

(क) महिला र पुरुष एक रथका दुई पाङ्ग्रा हुन् ।

(ख) बुहारी घरकी लक्ष्मी हुन् ।

(ग) पुरुषले कमाउने र महिलाले जोगाउने गरेमा परिवार सुखी हुन्छ ।

(घ) बुहारीलाई छोरी मानेर माया गर्नुपर्दछ ।

(ङ) अहिले आफैँ पति रोज्ने युवतिको सङ्ख्या बढ्दो छ ।

## नवमः पाठः

# सुन्दरो रारातडागः

ऐषमः शैक्षिकभ्रमणाय रारातडागं यावद् गन्तुं योजना निर्मिता । यानेन बाँकेबर्दियाजनपदौ परिभ्रम्य वयं सुर्खेतजनपदं प्राप्नुम । तत्र देउतीबज्यै-बुलबुलेतडाग-काँकेविहारस्थानानि अटित्वा कालिकोटजनपदाय अगच्छाम । अस्माकं गन्तव्यं रारासरोवर आसीत् । वयं सुर्खेजनपदस्य सीमामतिक्रम्य दैलेखं प्राविशाम । मार्गः कर्णालीनद्यास्तटं निकषा आसीत्, यश्च कुत्रचित् सङ्कीर्णो भग्नश्चासीत् । स्थाने स्थाने विशालाः शिला मार्गमवरोद्धुमुद्यता इव आसन् । ता अपसार्य जलप्रपातावलिं विलोक्य च वयमग्रेसरा अभवाम । भ्रमणस्य द्वितीये दिवस एव कालिकोटजनपदं प्राप्नुम । तत्रत्यापणं भ्रमित्वा दिनद्वयं सुखेन सहर्षं यापितम् ।

चतुर्थेऽहनि दिवा एकवादने मान्माख्यं कालिकोटमुख्यालयं परित्यज्य वयमगच्छाम । अद्य मित्राणां हृदि उत्साहो वृद्धिङ्गत आसीत् । मार्गः सङ्कीर्णः सन्नपि वक्रीकृत आसीत् परं भूयोभूयो भयमुद्भावयति स्म । मार्गं परितो भीतिकरा भृगवो दृष्टिपथमायाताः । सायङ्कालः समागतः । यदि भवितव्यं जायेत न कोऽपि नो ज्ञास्यतीति भीया वयमचिन्तयाम । अद्य रारातडागोपगमनमस्माकं बलीयान् सङ्कल्प आसीत् ।

यदा वयं जुम्लाजनपदं प्राविशाम तदा चेतोहरा हिमालया दृष्टाः । 'शोभनो जनपदोऽयम्' इति सर्वे सहैवावदन् । सर्वे चलभाषोपकरणेन दृश्याङ्कनं कर्तुमारभन्त । बहुत्र सेवफलस्य वृक्षा आसन् । रसवन्ति सेवफलानि विलोक्य अस्माकं मनो लोभाविष्टमजायत । कर्णालीनदी प्रवहन्ती आसीत् । तस्या दृश्यमस्माकं मानसं समतोषयत् । अधोऽदृश्यत सिञ्जोपत्यका यत्र धान्यमाला दोलायमाना आसन् । परितः सल्लीवनराजिविराजिता आसीत् ।

सायं षड्वादने वयं जुम्लाजनपदस्य सिञ्जाग्रामपालिकायाः काटैनामाख्यं स्थानमाप्नुम । तदनन्तरमपि अस्माकं यात्रा सततं प्रावर्धत एव । वयं मुगुजनपदं प्राविशाम । तत्रातिशैत्येन वयमकम्पामहि । विस्तीर्णेऽजिरे मेषा हिमालयीया अजाश्च एकत्र निर्भयं निवसन्त आसन् । तद् दृष्ट्वा हृदयं नितरां प्रफुल्लमभवत् । मेषाजानां पालका रक्षकाश्च पटवेश्म निर्माय वसन्ति स्म । तन्निखिलां हिमालयीयशोभां विलोक्य अस्माकं तद्दिनं व्यतीतम् ।



अपरेद्यू राराराष्ट्रियनिकुञ्जमुत्तीर्य वयं गन्तव्यमचलाम । रारातडागः कियद्दूरमस्तीति ज्ञातुं वयमसमर्था आस्म । मार्गोऽवक्रीकृतो भृगुपरिवेष्टितः कोणीयश्चासीत्, कालश्च रात्रिः । रारातडागो न प्राप्यते किमु इत्याशङ्का मनसि जाता । यान एव रात्रिर्व्यतीता भवेदिति अचिन्तयाम । आसन्नैकादशवादनेऽस्माकं यानं सल्लेरीस्थानं प्रापत् । क्लान्ता वयमतिथिसदने भोजनमकुर्म । तदा रात्रौ द्वादशवादनमासीत् ।

अपरस्मिन् दिने वयं प्रातश्चतुर्वादन एवोदतिष्ठाम । वयं रारातडागं द्रष्टुं व्यग्रा स्म । अमुमटितुमवलोकयितुञ्चास्माकं भ्रमणं लक्ष्यितमासीत् । वयं सोत्साहं तत्र प्राप्नुम ।

प्रसिद्धस्तडागोऽसौ मुगुजनपदस्य छायानाथनगरपालिकायामवस्थितो वर्तते । अयं नेपालस्य विपुलतमस्तडागोऽस्ति । अयं समुद्रस्तरात् २, ९७२ मिटरमितोच्चैर्भूभागे विराजते । अस्य क्षेत्रफलं १०.८ वर्गकिलोमिटरमितमास्ते । अस्य तडागस्याधिकतमं लम्बनं ५ किलोमिटरपर्यन्तं वर्तते चेदधिकतममायातनं ३.२ किलोमिटरमितदीर्घमस्ति । गाम्भीर्यञ्च १६७ मिटरपरिमितं विद्यते ।

प्रकृत्या स्वोपहाररूपेण इव तडागोऽसौ सृष्टो दृश्यते । अयं राराराष्ट्रियनिकुञ्जस्यान्तर्गतं विलसति । परितो हरितं वनं सुशोभते यत्र कस्तूरीप्रभृतिजन्तवो राष्ट्रियपक्षिणा नवरङ्ग (डाँफे) इत्यनेन सहिता नैके विहगाश्च विचरन्ति । निकुञ्जोऽसौ १०६ वर्गकिलोमिटरमितं क्षेत्रफलं व्याप्नोति ।

वयं तदखिलं विलोक्य मुदितमानसा अभवाम । कानिचन मित्राणि अश्वमारुह्य तत्र प्रातिष्ठन्त । मया सह इतरे सखाय: पादाभ्यामगच्छन् । पञ्चचत्वारिँशता कलाभिर्वयमुपरारातडागमाप्नुम । यतो हि मार्ग: सरल आसीत् । शैत्यवाहकवायुर्मन्दं मन्दमचलत् । मनोरमं दृश्यं सर्वेषां मन: परिश्रमञ्चाहरत् । स्थलमिदमहं भूस्वर्गमिवान्वभवम् ।

तडागोऽसौ आदिवसं बहुवारं परिवर्तते । जलोर्मय: प्रतिक्षणं नानारूपाणि प्रदर्शयन्ति । मित्राणि तद्रूपाणि चलभाषोपकरणेन समकलयन् । सर्वे सातिशयं हृष्टा आसन् । तडागस्य सौन्दर्यं वाण्या व्याख्यातुं न शक्यते इति ये निगदन्ति तन्नासत्यम् । अयं यत् सुराङ्गना उच्यते तदपि नानौचित्यमिति मन्ये ।

तडागस्यातिरिक्तं वैशिष्ट्यं विलोकयितुं वयमश्वमारुह्य मुर्माटपस्थलमाप्नुम । स्थलमिदं ३, ७२६ मिटरमितोच्चैर्भागे वर्तते । ततोऽधिकमद्भुतं रारालावण्यमपश्याम । तत: सैपालहिमशृङ्खलाञ्च वयमातृप्ति व्यलोकयाम । तदनन्तरं गमगढीस्थानं लक्ष्यीकृत्य प्रत्यगच्छाम ।

अन्यस्मिन् दिने जुम्लाजनपदस्य भुलभुलेस्थानं सम्भूय चन्दननाथं प्राप्यावसाम । अपरेद्यु: सायं नेपालगन्जनगरमाप्नुम । भ्रमणस्यानुभवं परिवारं मित्राणि च श्रावयितुं वय व्यग्रा आस्म । सकलान् सखीनभिवाद्य स्वसामग्रीरूढ्वा च वयं गृहं प्रत्यगच्छाम ।

## शब्दार्था:

| | |
|---|---|
| ऐषम: | यस वर्ष, यसपालि |
| जलप्रतापावलि: | झर्नाको ताँती |
| भृगु: | भिर |
| उपगमनम् | नजिक पुग्नु |
| लोभाविष्टम् (नपुं.) | लोभिएको |
| दोलायमाना | हल्लिरहेका |
| सल्लीवनराजि: | सल्लाको वनको लहर |
| अजिरे | मैदानमा, फाँटमा, आँगनमा |
| पटवेश्म | पाल |
| आतृप्ति | धित मरुन्जेल |

# अभ्यासः

## श्रवणं भाषणञ्च

१. **एकस्मात् छात्रात् पाठस्य वाचनं श्रुत्वा अन्ये अनुवदत ।**

२. **पाठस्य प्रथमानुच्छेदात् क्रियापदानि, द्वितीयानुच्छेदाद् अव्ययपदानि, तृतीयानुच्छेदात् समस्तपदानि च अन्विष्य श्रावयत ।**

३. **शुद्धमुच्चारयत**

परिभ्रम्य, उद्यता, वृद्धिङ्गतः, भृगवः, दृश्याङ्कनम्, प्रफुल्लः, प्रत्यगच्छाम ।

४. **पदार्थान् कथयत**

एषम, अपसार्य, जलप्रपातावलिः, लोभाविष्टम्, धान्यमाला, दोलायमाना, वनराजिः, अकम्पामहि, मुदितमानसा, भूस्वर्गम्, लावण्यम्, ऊढ्वा ।

५. **सन्धिं विच्छेद्य उच्चारयत**

तत्रत्यापणम्, चेतोहराः, सहैवावदन्, वनराजिर्विराजिता, तन्निखिलाम्, आसन्नैकादशवादने, प्रत्यगच्छाम ।

६. **एकवाक्येन उत्तरयत**

(क) बुलबुलेतडागः कुत्रास्ति ?

(ख) को मार्गः सङ्कीर्णो भग्नश्चासीत् ?

(ग) भृगवः कीदृशा आसन् ?

(घ) सिञ्जोपत्यकाया वैशिष्ट्यं किम् ?

(ङ) रारातडागस्य गाम्भीर्यं कियन्मिटरमितं वर्तत ?

(च) रारातडागस्य जलोर्मयः किं कुर्वन्ति ?

(छ) कस्मात् स्थानाद् रारातडागस्याद्भुतं लावण्यं द्रष्टुं शक्यते ?

## पठनम्

### १. अधोलिखितं गद्यांशं पठित्वा सारांशं निगदत

संस्कृतसाहित्ये प्रतिभाशालिन्याः कवयित्र्या विज्जकायाश्च नामापि श्रूयते । सा रसभावभरितां कवितामलिखत् । तस्याःकवितायां मधुरा पदावली हृदयहारी भावश्च प्राप्येते । प्रतिभासम्पन्नाया विज्जकाया जीवनस्य विषये स्पष्टं ज्ञानं न प्राप्यते । अस्या नामैव विज्जका विज्जाका विद्या वेति आसीदिति अनुमीयते । विज्जकाया आविर्भावकालो दण्डिनः पश्चाद् निर्धार्यते । विज्जकायाः कतिचित् पद्यानि संस्कृतकाव्याचार्यैरुद्धृतानि सन्ति । अस्याः कवितासु शृङ्गाररस व्यक्तो वर्तते । स्वभावोक्त्यलङ्कारस्य सौन्दर्यमपि चित्तमाह्लादयति । प्रकृतिवर्णनं रम्यं संवेद्यं च दृश्यते ।

### २. अधोलिखितं गद्यखण्डं पठित्वा प्रश्नानुत्तरयत

गद्यं वा पद्यं कीदृशं काव्यं पठितुं सरलं भवतीति विषये काव्यविदो मुहुर्मुहुर्विमृशन्ति । गद्यमपि काव्यं पद्यमपि काव्यमेव वर्तते । बाण-दण्डि-सुबन्धु-अम्बिकादत्तव्यासादयः कवयो गद्यकाव्यादपि कीर्तिपात्राणि अभवन् । वाल्मीकिरश्वघोष-कालिदास-भारवि-माघ-श्रीहर्षादयो महाकवयः पद्यकाव्यात् लोकविश्रुता अजायन्त । गद्येऽपि पद्यस्य गुणाः सन्निविष्टा भवन्ति । पद्येऽपि गद्यस्य प्रवाहो भवत्येव । कवीनां निकषं गद्यमिति काव्यज्ञानां कथनमस्ति । पद्ये लयोत्पादने सङ्गीताधाने प्रवाचने त यत् सौकर्यं भवति गद्ये तन्न सम्भवति । गद्ये च स्वातन्त्र्येण यद् वर्णितुं शक्यते पद्ये तत् सौविध्यं न मिलति । तदपि गद्यकाराः पद्यकाराः सर्वे एव साहित्यकारा इति निश्चयेन कथयितुं शक्यते ।

(क) गद्यकवयः के ?

(ख) महाकवयः के ?

(ग) गद्ये कस्य गुणाः सन्निविष्टा भवन्ति ?

(घ) काव्यज्ञानां कथनं किम् ?

(ङ) गद्ये किं न सम्भवति ?

(च) पद्ये कीदृशं सौविध्यं न भवति ?

(छ) साहित्यकाराः के ?

### ३. अधोलिखितं गद्यांशं पठित्वा शीर्षकं निर्धारयत

जीवनवृत्तस्य पठनेन को लाभ इति विद्यार्थिनो गुरून् पृच्छन्ति। ततः कीदृशी प्रेरणा मिलतीति च तेषां जिज्ञासा वर्तते । जीवनचरितं विशिष्टव्यक्तेरेव लिख्यते । यो देशजनतयोर्हिताय कार्यं करोति तस्य जीवनवृत्तं लेखनीयम् । विद्या-क्रीडा-परोपकारादिकार्येषु दत्तमनसामपि जनानां जीवनचरितं प्रेरणादायकं भवति । ततो जीवने सत्कार्याणि कर्तुमुत्साहो वर्धते । विशिष्ट-जनानाम् अनुभवेन शिक्षा च अवाप्यते । जीवनचरितं कृतज्ञतायाः स्वरूपमपि अस्ति । महात्मनां कार्येण लाभो भवति । तस्य लाभस्य मूल्यं मापनेन निर्धारयितुं न शक्यते । जीवनचरितस्याध्ययनेन इतिहासोऽपि ज्ञायते । जीवनचरितपाठात् प्राप्तव्यो लाभोऽतुलनीय एव भवति ।

## लेखनम्

### १. रारातडागस्य मापनं परस्परं योजयत

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| लम्बनम् | २९७२ मिटर |
| आयतनम् | १६७ मिटर |
| गाम्भीर्यम् | ५ किलोमिटर |
| क्षेत्रफलम् | ३.२ किलोमिटर |
| उच्चता | १०.८ वर्गकिलोमिटर |

### २. उत्तरयत

(क) सुर्खेतजनपदे दर्शनीयानि स्थानानि कानि सन्ति ?

(ख) विशालाः शिलाः कुत्र आसन् ?

(ग) भ्रमणस्योद्देश्यं किमस्ति ?

(घ) रारातडागं परितः किं किं द्रष्टुं शक्यते ?

(ङ) रारातडागः किमर्थं सुराङ्गना उच्यते ?

(च) स्वगिरा रारातडागस्य सौन्दर्यं वर्णयत ।

३. **पदानि प्रयुज्य वाक्यं रचयत**

जनपदः, बहुत्र, भृगुः, क्लान्ताः, दृश्यम्, समकलयन्, अपरेद्युः ।

४. **निर्देशानुसारेण क्रियापदानि परिवर्तयत**

(क) वयं कालिकोटजनपदमगच्छाम । (लट्लकारे)

(ख ) सायङ्कालः समागच्छति । (लङ्लकारे)

(ग) सर्वे सहैवावदन् । (लिट्लकारे)

(घ ) वयं गन्तव्यमचलाम । (लट्लकारे)

(ङ) मनोरमं दृश्यं मनोऽहरत् । (लिट्लकारे)

५. **अधोलिखितानां क्रियापदानामुपसर्गं लिखत**

अतिक्रम्य, प्रवहन्ती, प्राप्नुम, प्रातिष्ठन्त, परिवर्तते, निगदन्ति, प्रत्यगच्छाम ।

६. **अधोलिखितं वाक्यं विश्लिष्य त्रिषु सरलवाक्येषु पुनर्लेखनं कुरुत .**

ता अपसार्य जलप्रपातावलिं विलोक्य च वयमग्रेसरा अभवाम ।

७. **नेपालीभाषायाम् अनुवादं कुरुत**

(क) चतुर्थेऽहनि दिवा एकवादने मान्माख्यं कालिकोटमुख्यालयं परित्यज्य वयमगच्छाम ।

(ख) यदा वयं जुम्लाजनपदं प्राविशाम तदा चेतोहरा हिमालया दृष्टाः ।

(ग) स्थलमिदमहं भूस्वर्गमिवान्वभवम् ।

(घ) अयं यत् सुराङ्गना उच्यते तदपि नानौचित्यमिति मन्ये ।

(ङ) भ्रमणस्यानुभवं परिवारं मित्राणि च श्रावयितुं वय व्यग्रा आस्म ।

**अनुप्रयोगः**

१. **अधोलिखिताः मुख्यपदावली आधृत्य सङ्क्षिप्तं यात्रावर्णनं कुरुत**

- शीतकालिकावकाशस्य समयः
- अष्टमकक्षाया विद्यार्थिनामग्रेसरता

- कक्षाशिक्षकस्य नेतृत्वम्
- पोखरातो जनकपुरस्य भ्रमणनिर्धारणम्
- दशविद्यार्थिनां सहभागिता
- २०७९ पौषस्य १५ दिवसे प्रातः सप्तवादने बसयानेन प्रस्थानम्
- नारायणघट्टे प्रातर्भोजनम्
- बसयानादेव निकुञ्जे विहरतां पशूनामवलोकनम्
- बर्दिवासस्थाने चायपानम्
- चतुर्वादने जनकपुरागमनम्
- अतिथिगृहे भोजनमावासनञ्च
- १६ दिवसे रामजानकीमन्दिरभ्रमणं दर्शनञ्च
- भोजनानन्तरं प्रथमवारं रेलयानावलोकनम्
- १७ दिवसे धनुषधामभ्रमणावलोकनम्
- अपराह्णे बाह्वबिघाक्षेत्रस्यावलोकनम्
- १८ दिवसे जनकपुरधाम्नो गङ्गासागर-धनुषसागरप्रभृतिकुण्डानां प्राचीनमन्दिराणाञ्चावलोकनभ्रमणम्
- शिक्षकस्य निर्देशनेन सायं भोजनात् पूर्वं भ्रमणस्य प्रमुखसूत्राणां विलेखनम्
- १९ दिवसे प्रातराशं भुक्त्वा पोखरां प्रत्यावर्तनम् ।

२. **जनकपुरधाम्नो धार्मिकं सांस्कृतिकञ्च महत्त्वं वर्णयित्वा अनुच्छेदमेकं रचयत ।**

# व्याकरणबोधः

## १. रूपावलीं पठत

### स्त्रीशब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | स्त्रीः | स्त्रियौ | स्त्रियः |
| द्वितीया | स्त्रियम् | स्त्रियौ | स्त्रियः |
| तृतीया | स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः |
| चतुर्थी | स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः |
| पञ्चमी | स्त्रियः | स्त्रीभ्याम् | स्त्रीभ्यः |
| षष्ठी | स्त्रियः | स्त्रियोः | स्त्रीणाम् |
| सप्तमी | स्त्रियाम् | स्त्रियोः | स्त्रीषु |
| सम्बोधनम् | हे स्त्रि | हे स्त्रियौ | हे स्त्रियः |

### वाच्शब्दस्य रूपाणि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वाक्, वाग् | वाचौ | वाचः |
| द्वितीया | वाचम् | वाचौ | वाचः |
| तृतीया | वाचा | वाग्भ्याम् | वाग्भिः |
| चतुर्थी | वाचे | वाग्भ्याम् | वाग्भ्यः |
| पञ्चमी | वाचः | वाग्भ्याम् | वाग्भ्यः |
| षष्ठी | वाचः | वाचोः | वाचाम् |
| सप्तमी | वाचि | वाचोः | वाक्षु |
| सम्बोधनम् | हे वाक् | हे वाचौ | हे वाचः |

**दिश्शब्दस्य रूपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | दिक्, दिग् | दिशौ | दिशः |
| द्वितीया | दिशम् | दिशौ | दिशः |
| तृतीया | दिशा | दिग्भ्याम् | दिग्भिः |
| चतुर्थी | दिशे | दिग्भ्याम् | दिग्भ्यः |
| पञ्चमी | दिशः | दिग्भ्याम् | दिग्भ्यः |
| षष्ठी | दिशः | दिशोः | दिशाम् |
| सप्तमी | दिशि | दिशोः | दिक्षु |
| सम्बोधनम् | हे दिक् | हे दिशौ | हे दिशः |

२. **रिक्तस्थानं पूरयत**

(क) स्त्रीशब्दस्य द्वितीयाविभक्तेर्बहुवचने ........... भवति ।

(ख) वाच्शब्दस्य षष्ठीभिक्तेर्द्विवचने .............. भवति ।

(ग) ........... दिश्शब्दस्य चतुर्थीविभक्तेर्बहुवचनस्य रूपमस्ति ।

(घ) दिश्शब्दः .........लिङ्गे वर्तते ।

(ङ) धी-श्री-मतिशब्दाः........... लिङ्गे प्रयुज्यन्ते ।

३. **श्री-विद्युत्-सरित्-जगच्छब्दानां रूपावलीं लिखत ।**

४. **स्त्री-वाच्-दिश्-श्री-विद्युत्-सरित्-जगच्छब्दानां न्यूनतोऽपि एकैकं किञ्चन रूपं प्रयुज्य अनुच्छेदमेकं रचयत ।**

# कोषानुशीलनम्

## मनुष्यवर्गः

**कान्तार्थिनी तु या याति संकेतं साभिसारिका। पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी॥**
**स्वैरिणी पांसुला च स्यादशिश्वी शिशुना विना। अवीरा निष्पतिसुता विश्वस्ताविधवे समे॥**
**आलिः सखी वयस्याथ पतिवत्नी सभर्तृका। वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती॥**
**शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च। आभीरी तु महाशूद्री जातिपुंयोगयोः समा॥**
**अर्याणी स्वयमर्या स्यात्क्षत्रिया क्षत्रियाण्यपि। उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः॥**
**आचार्यानी तु पुंयोगे स्यादर्यी क्षत्रियी तथा। उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा॥**
**वीरपत्नी वीरभार्या वीरमाता तु वीरसूः। जातापत्या प्रजाता च प्रसूता च प्रसूतिका॥**
**स्त्री नग्निका कोटवी स्याद्दूतीसंचारिके समे। कात्यायन्यर्धवृद्धा या काषायवसनाधवा॥**
**सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका। असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी॥**
**वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः। सत्कृता वारमुख्या स्यात्कुट्टनी शम्भली समे॥**
**विप्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला। स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि॥**
**ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवम्। श्रद्धालुर्दोहदवती निष्कला विगतार्तवा॥**
**आपन्नसङ्खवा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी। गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे॥**
**पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः। स तु द्विजोऽग्रे दिधिषूः सैव यस्य कुटुम्बिनी॥**
**कानीनः कन्यकाजातः सुतोऽथ सुभगासुतः। सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः॥**
**पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः। सुता मातृष्वसुश्चैवं वैमात्रेयो विमातृजः॥**

### पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते।

**कान्तार्थिन्याः स्त्रियाः नाम** – अभिसारिका (२)

**पुंश्चल्यादिस्त्रीविशेषाणां नामानि** – पुंश्चली (२), धर्षिणी (२), बन्धकी (२), असती (२), कुलटा (२), इत्वरी (२), स्वैरिणी (२), पांशुला (२)

**शिशुविहीनायाः स्त्रियाः नाम** – अशिश्वी (२)

**पतिपुत्रहीनायाः स्त्रियाः नाम** – अवीरा (२)

**विधवायाः नामनी** – विश्वस्ता (२), विधवा (२)

**सख्याः नामानि** – आलिः (२), सखी (२), वयस्या (२)

**भर्तृकायाः स्त्रियाः नामनी** – पतिवत्नी (२), सभर्तृका (२)

**वृद्धायाः नामनी** – पलिक्नी (२), वृद्धा (२)

**प्राज्ञायाः स्त्रियाः नामनी** – प्राज्ञी (२), प्राज्ञा (२)

**धीमत्याः स्त्रियाः नामनी** – प्राज्ञी (२), धीमती (२)

**शूद्रस्य भार्यायाः नाम** – शूद्री (२)

**शूद्रजातेः स्त्रियाः नाम** – शूद्रा (२)

**आभीरस्य भार्यायास्तथाभीरजातेः स्त्रियाश्च नाम** – महाशूद्री (२)

**वैश्यजातेः स्त्रियाः नामनी** – अर्याणी (२), अर्या (२)

**क्षत्रियजात्याः स्त्रियाः नामनी** – क्षत्रिया (२), क्षत्रियाणी (२)

**अध्यापिकायाः नामनी** – उपाध्याया (२), उपाध्यायी (२)

**मन्त्राध्यापिकायाः स्त्रिया नाम** – आचार्या (२)

**मन्त्राध्यापकस्य पत्न्याः नाम** – आचार्यानी (२)

**वैश्यस्य पत्न्याः नाम** – अर्थी (२)

**क्षत्रियस्य पत्न्याः नाम** – क्षत्रियी. (२)

**अध्यापकस्य पत्न्या नामनी** – उपाध्यायानी (२), उपाध्यायी (२)

**पुंसलक्षणायाः स्त्रियाः नाम** – पोटा (२)

**वीरस्य भार्यायाः नामनी** – वीरपत्नी (२), वीरभार्या (२)

**वीरस्य मातुः नामनी** – वीरमाता (२), वीरसूः (२)

**प्रसूतिकायाः नामानि** – जातापत्या (२), प्रजाता (२), प्रसूता (२), प्रसूतिका (२)

**दूत्याः नामनी** – दूती (२), सञ्चारिका (२)

**काषायवस्त्रधारिण्या अर्धवृद्धाया अधवायाः स्त्रिया नाम** कात्यायनी (२)

**स्ववशायाः परवेश्मस्थायाः शिल्पकारिकायाः स्त्रियाः नाम** – सैरन्ध्री (२)

**कुट्टन्याः नामनी** – कुट्टनी (२), शम्भली (२)

**दैवज्ञायाः स्त्रियाः नामानि** – विप्रश्निका (२), ईक्षणिका (२), दैवज्ञा (२)

**रजस्वलायाः स्त्रियाः नामानि** – रजस्वला (२), स्त्रीधर्मिणी (२), अविः (२), आत्रेयी (२), मलिनी (२), पुष्पवती (२), ऋतुमती (२), उदक्या (२)

**रजस्वलाया रजसः नामानि** – रजः (३), पुष्पम् (३), आर्तवम् (३)

**विगतार्तवायाः नामनी** – निष्कला (२), विगतार्तवा (२)

**गर्भिण्याः नामानि सन्ति** – आपन्नासत्वा (२), गुर्विणी (२), अन्तर्वत्नी (२), गर्भिणी (२)

**गणिकाया गणस्य नाम** – गाणिक्यम् (३)

**गर्भिणीनां समूहस्य नाम** – गार्भिण्यम् (३)

तरुणीनां समूहस्य नाम - यौवतम् (३)

द्वितीयवारविवाहितायाः स्त्रियाः नामनी - **पुनर्भूः** (२) **दिधिषूः** (२)

**पुनर्भुवः पत्युः नाम** – दिधिषुः (१)

**यः नरः पुनर्भुवं स्त्रियं मुख्यां कारयित्वा गृहे स्थापयति तस्य नाम** – अग्रेदिधिषूः (१)

**विवाहात् पूर्वं कन्याया जातस्य पुत्रस्य नाम** – कानीनः (१)

**भाग्यवत्याः स्त्रियाः पुत्रस्य नामनी** – सुभगासुतः (१), सौभागिनेयः (१)

**परस्त्रियां जातस्य पुत्रस्य नाम** – पारस्त्रैणेयः (१)

**पितृभगिन्याः पुत्रस्य नामनी** – पैतृष्वसेयः (१), पैतृष्वस्रीयः (१)

**मातृस्वसुः पुत्रस्य नामनी** – मातृस्वसेयः (१), मातृस्वस्त्रीयः (१

**विमातृजस्य पुत्रस्य नामनी** – वैमात्रेयः (१), विमातृजः (१)

## अभ्यासः

१. **अध्यापिकाया नामानि श्रावयत ।**

२. **कुलटाया नामानि वदत ।**

३. **परस्परं मेलयत**

| | |
|---|---|
| आत्रेयी | पांसुला |
| पलिक्नी | दैवज्ञा |
| प्रजाता | मलिनी |
| असती | वृद्धा |
| विप्रश्निनका | प्रसूता |

४. **सङ्क्षेपेण उत्तरयत**

(क) कीदृशी 'स्त्री' पोटा कथ्यते ?
(ख) वैश्यस्य स्त्री का कथ्यते ?
(ग) आभीरजातेः स्त्रियाः किं नाम वर्तते ?
(घ) वीरस्य पत्न्याः के नामनी स्तः ?
(ङ) गर्भिण्याः स्त्रिणां नामानि कानि ?
(च) कीदृशी स्त्री दिधिषूः कथ्यते ?

५. **नेपालीभाषायामर्थं लिखत**

अविः, दूती, आचार्या, अर्थी, आलिः, सैरन्ध्री, प्राज्ञा

६. **पर्यायशब्दान् लिखत**

अर्या, वयस्या, शम्भली, वारस्त्री, वीरसूः, कानीनः, कोटवी, विमातृजः ।

७. **पुनर्भूशब्दस्य सर्वाणि रूपाणि लिखत ।**

८. **दैवज्ञायाः स्त्रिया नामानि लिखत ।**

९. **नेपालीभाषायामनुवादं कुरुत**

(क) अकाले च प्रसूता स्त्री स्नेहपानं विवर्जयेत् ।
(ख) लज्जा कुलस्त्रिणां भूषणमस्ति ।
(ग) श्राद्धदिने पैतृश्वसेय आगच्छति।
(घ) दैवज्ञा भविष्यं वदति ।
(ङ) आत्रेयी शक्तिहीना भवति ।

# वायुरक्षणम्

प्राणिनां जीवनयापनाय बहूनां पदार्थानामावश्यकता भवति । एतेषु पदार्थेषु कतिचित् प्राकृतिकाः कतिचिच्च मानवनिर्मिताः सन्ति । वायुः प्राकृतिकपदार्थो वर्तते । वायुना विना कस्यापि प्राणिनो जीवनं नैव सम्भवति । प्राणिनां वनस्पतीनाञ्च अस्तित्वं वायुना एव सुरक्षितं भवति । वायौ प्रदूषिते जीवनमपि प्रदूषितं जायते । अतो वायो रक्षणं स्वच्छीकरणञ्च जीवनस्यैव सुरक्षणं मन्तव्यम् ।

सम्प्रति जगति वायुप्रदूषणं प्रतिदिनं वर्धमानं वर्तते । इयं न केवलमस्माकं देशस्य अपि तु विश्वव्यापिनी समस्या वर्तते । वायुप्रदूषणस्य कारणात् प्रतिदिनं रोगा वर्धमानाः सन्ति । प्रदूषितेन वायुना मानवेतरे प्राणिनोऽपि रुग्णा भवन्ति । एतेन प्राणिनां जीवनमपि स्वल्पं जायमानं वर्तते ।

वायुप्रदूषणस्य विभिन्नानि कारणानि सन्ति । संसारेऽस्मिन् प्रतिदिनं जनसङ्ख्याया वृद्धिर्जायमाना वर्तते । विशेषेण अल्पविकसितदेशेषु जनसङ्ख्या सातत्येन वर्धमाना दृश्यते । जनसङ्ख्याया वृद्धेः प्रभावः सर्वत्र आपतति । जनानां वृद्ध्या मानवीयकार्यकलापैः सह तेषां जीविकायै प्राकृतवस्तूनां दहनं च वर्धते । तेन सर्वविधं प्रदूषणं वर्धते ।

अधुना मानवानां सौविध्याय विज्ञानेन विविधानां यन्त्रोपकरणानामाविष्कारः कृतो विद्यते । एतेषां निर्माणं सञ्चालनं च वायुप्रदूषणस्य अपरं कारणं वर्तते । प्रतिदिनं वर्धमानैर्यातायातसाधनैः, औद्योगिकयन्त्रोपकरणैश्च निरन्तरं हानिकारकाणि धूमानि उत्सृज्यन्ते । तेन वायुः प्रदूषितं भवति । आधुनिकसुविधायाः साधनानां वर्धनेन पर्यावरणमेव शिथिलायमानमस्तीति चिन्ताया विषयो वर्तते । अत्र सर्वेषां चिन्तनमावश्यकमस्ति ।

वायुप्रदूषणस्य अपरं कारणं वनविनाशोऽस्ति । वृक्षाः प्रदूषितं वायुं स्वच्छं कुर्वन्ति । एतत् विज्ञानेन प्रमाणितं तथ्यं वर्तते । एतद् ज्ञात्वापि जना वनविनाशाय तत्परा दृश्यन्ते । वनविनाशाद् जलस्रोतांसि शुष्कतां यान्ति । वनेन जलेन च सह वायोर्निकटसम्बन्धो भवति । अनयोर्विनाशाद् वायुप्रदूषणं स्वाभाविकरूपेण वर्धते ।

वर्तमानयुगे जनानामार्थिकसमृद्धौ अधिकं ध्यानं भवति । अर्थोपार्जनाय जना यत्किमपि कुर्वन्ति, तस्य परिणामं न विचारयन्ति । अस्माकं देशे कृषियोग्या भूमिरावासयोजनायां प्रयुज्यमाना दृश्यते । ततः समस्याद्वयमुत्पन्नं वर्तते- अन्नोत्पादनस्य न्यूनता, वायुप्रदूषणस्य वृद्धिश्च । अतः कृषियोग्यायां भूमौ कृष्युत्पादनमेव विधातुं नीतिनिर्माणस्य आवश्यकता वर्तते ।

उद्योगानामुत्पादनशालानाञ्च संस्थापनं सञ्चालनं च आर्थिकविकासाय आवश्यकं भवति । परं वायुप्रदूषणस्य कृते एतेषां विकास एकं कारणं दृश्यते । एभिरुद्योगैर्मोचितो धूमराशिर्वायुं विशेषेण दूषयति । विद्युता चाल्यमानानां उद्योगानां संस्थापनेन वायुप्रदूषणं न्यूनीकर्तुं शक्यते ।

प्रायो नगरक्षेत्रेषु अवकरस्य व्यवस्थापनं दुर्बलं दृश्यते । अनेनापि वायुप्रदूषणं तीव्रतया वर्धितं वर्तते । जना नगरेषु मुखाच्छादिकां परिधाय चलन्ति । एतस्य कारणमपि वायुप्रदूषणमेव वर्तते । पृथिव्यां तापमानो वर्धमानो वर्तते इति वैज्ञानिकानां सम्मतिरस्ति । अत्रापि वायुप्रदूषणमेव कारणं वर्तते ।

वायुप्रदूषणस्य नियन्त्रणस्य उपायाश्च सन्ति । वन-भूमि-जलस्रोतसां संरक्षणात्, जनसङ्ख्याया नियन्त्रणाच्च वायुप्रदूषणं न्यूनं जायते । यातायातसाधनानाम्, औद्योगिकयन्त्रोपकरणानां च विद्युच्छक्त्या सञ्चालनाच्च प्रदूषणस्य न्यूनीकरणं सम्भवति । वायुरस्माकं सर्वेषां सामूहिकी सम्पत्तिर्वर्तते । अस्य रक्षणात् स्वच्छीकरणाच्च इयं भूमिरस्माकं सन्ततीनाञ्च कृते वासयोग्या भवितुमर्हति ।

## शब्दार्थाः

| | |
|---|---|
| जीवनयापनाय | जीवनयापनका लागि, जीवन चलाउन |
| मन्तव्यम् | मान्नुपर्छ |
| मानवेतरे | मानवबाहेकका, मानवभन्दा अन्य |
| आपतति | आउँछ, आइपर्छ |
| सौविध्याय | सुविधाका निम्ति |
| अपरम् | अर्को |
| शिथिलायमानम् | शिथिल हुँदै, कमजोर हुँदै |
| शुष्कताम् | सुख्खापन |

| | |
|---|---|
| निकटः | नजिक |
| समृद्धौ | समृद्धिमा, उन्नतिमा |
| कृषियोग्या | कृषियोग्य, खेतीपातीका लागि योग्य |
| धूमराशिः | धुवाँको मुस्लो, धुवाँको समूह |
| अवकरस्य | फोहोरमैलाको |
| मुखाच्छादिका | मुखढकनी, मास्क |
| परिधाय | लगाएर |
| सम्मतिः | एकमत, सहमति |
| विद्युच्छक्त्या | विद्युत् शक्तिद्वारा, बिजुलीबाट |
| सन्ततीनाम् | सन्ततिको, सन्तानहरूको |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **अधस्तनानां पदानां यथाविधि उच्चारणं श्रुत्वा तदनूच्चारणं कुरुत**

विद्युच्छक्त्या, सम्मतिः, प्रदूषणम्, मुखाच्छादिकाम्, स्वच्छीकरणात्, यन्त्रोपकरणानाम्, आविष्कारः, आर्थिकसमृद्धौ, संसारेऽस्मिन्, नीतिनिर्माणस्य, अन्नोत्पादनस्य ।

२. **पाठस्य तृतीयस्य अनुच्छेदस्य आदर्शवाचनं कक्षायां श्रावयत ।**

३. **सखिमुखात् पाठस्य प्रथमानुच्छेदस्य वाचनं श्रुत्वा तत्र प्रयुक्तानि क्रियापदानि कथयत ।**

४. **प्रदूषणविषये ज्ञातपूर्वान् विषयान् कक्षायां श्रावयत ।**

५. **अधस्तनवाक्येषु समागतानि अव्ययपदानि वदत**

(क) वायुना विना कस्यापि जीवनं न चलति ।

(ख) वायुसंरक्षणादेव वयं सुरक्षिता भवामः ।

(ग) जनाः परिणामं न विचारयन्ति ।

(घ) तापक्रमो वर्धते इति वैज्ञानिकानां विचारो वर्तते ।

(ङ) इयमेव भूमिः वासयोग्या भवति ।

६. **पाठं श्रुत्वा एकेन वाक्येन अधस्तनप्रश्नानामुत्तराणि वदत**

(क) वायुः कीदृशः पदार्थो वर्तते ?

(ख) वायौ प्रदूषिते किं भवति ?

(ग) रोगाः कथं वर्धन्ते ?

(घ) वृक्षाः किं कुर्वन्ति ?

(ङ) वायोः काभ्यां सह सम्बन्धो भवति ?

(च) अवकरस्य व्यवस्थापनं कीदृशं दृश्यते ?

(छ) वायुप्रदूषणं कथं न्यूनं भवति ?

(ज) भूमिर्वासयोग्या कथं जायते ?

७. **कोशस्य यथावश्यकं साहाय्यमवाप्य पदार्थान् वदत**

अस्तित्वम्, रुग्णाः, विश्वव्यापिनी, तत्पराः, दूषयति, सामूहिकः, मोचितम् ।

## पठनम्

१. **अधोलिखितं गद्यभागं सस्वरं वाचयत**

नेपालो ग्रामप्रधानो देशोऽस्ति । अत्र बहवो जना ग्रामेषु निवसन्ति । परं सम्प्रति समयः परिवर्तितो वर्तते । ग्रामीणजनाः सौविध्याय नगरेषु वस्तुमिच्छन्ति । ग्रामाद् नगरेषु अधिकसेवाः प्राप्यन्ते । अत्र अवसरस्य च सम्भावना भवति । जनाः कृषिकार्यात् पराङ्मुखा दृश्यमानाः सन्ति । सर्वे उपभोग्यवस्तूनि आपणात् क्रीत्वा खादितुमिच्छन्ति । ग्रामाणां कृषिकार्याणां च त्यागात् कथं जीवनं सुखि भवेत् ?

२. **पाठस्य उपान्त्यस्यानुच्छेदस्य द्रुतपठनं कुरुत ।**

३. **पाठस्य पञ्चममनुच्छेदं सस्वरं वाचयित्वा कक्षायां श्रावयत ।**

**४. अधस्तनं गद्यभागं पठित्वा शीर्षकं निर्धारयत**

सर्वेषां जनानामेक एव विचारो न भवति । केचन कथयन्ति- विद्यार्थिभिः क्रीडनं न विधातव्यम्, पठनमेव कर्तव्यम् । अन्ये वदन्ति- विद्यार्थिनां कृते पठनेन सह क्रीडनस्यापि अतीव आवश्यकता भवति । पठनस्य क्रीडनस्य चोभयोः समाना आवश्यकता वर्तते इत्यपि जनानां विचारः श्रूयते । पठने अधिकं ध्यानं दत्त्वा क्रीडनमपि कर्तव्यमिति समन्वयवादिनां विचारो वर्तते । विद्यार्थिनोऽपि अमुं विचारं स्वीकुर्वन्ति ।

**५. पाठस्य मौनपठनं विधाय सन्धियुक्तानि अज्ञातार्थानि च पदानि चिह्नीकुरुत ।**

**६. पाठं पठित्वा अधस्तनपदानां प्रयोगेण निर्मितानि वाक्यानि अभ्यासपुस्तिकायामनुलिख्य नेपालीभाषायां तेषामर्थापनं कुरुत**

प्राणिनः, स्वच्छीकरणम्, स्वल्पम्, जलस्रोतांसि, समृद्धौ, मुखाच्छादिकाम्, विद्युच्छक्त्या, सम्पत्तिः ।

**७. पाठस्य द्वितीयानुच्छेदं मौनं पठित्वा अधस्तनान् प्रश्नानुत्तरयत**

(क) सम्प्रति किं वर्धमानमस्ति ?

(ख) वायुप्रदूषणं कीदृशी समस्या वर्तते ?

(ग) रोगाः केन वर्धमानाः सन्ति ?

(घ) वायुप्रदूषणेन जीवनं कीदृशं जायमानं वर्तते ?

(ङ) प्रदूषितेन वायुना के रुग्णा भवन्ति ?

## लेखनम्

**१. कोष्ठकात् समुचितं पर्यायपदं विचित्य रिक्तस्थाने लिखत**

(क) वायुः ........ (वातः, वह्निः)

(ख) मानवैः ........ (जनैः, निर्जरैः)

(ग) शीघ्रम् ........ (विलम्बेन, त्वरितम्)

(घ) कारणम् ........ (निवारणम्, हेतुः)

(ङ) वनम्  ........  (भवनम्, विपिनम्)

(च) पृथिवी  ........  (मेदिनी, व्योमपथः)

२. **पाठस्य अन्तिमस्य अनुच्छेदस्य शुद्धतया अनुलेखनं कुरुत ।**

३. **अधोलिखितानि वाक्यानि पाठाधारेण संशोध्य अभ्यासपुस्तिकायां लिखत**

(क) पदार्थाः प्राकृतिका एव भवति ।

(ख) वायोः रक्षणस्य आवश्यकता नास्ति ।

(ग) वनविनाशाद् वायुः स्वच्छो भवति ।

(घ) सम्प्रति आर्थिकसमृद्धौ ध्यानं न दीयते ।

(ङ) पृथिव्यां शैत्यं वर्धमानमस्ति ।

४. **अधस्तनपदानां वाक्ये प्रयोगं कुरुत**

पदार्थाः, मन्तव्यम्, सम्प्रति, सञ्चालनम्, प्रमाणितम्, परिणामः, भूमिः, नगरम्, सम्मतिः, न्यूनम्, सन्ततिः ।

५. **वाक्यस्थाम् अशुद्धिं संशोधयत**

(क) पर्यावरणं प्रदूषितो वर्तते ।

(ख) प्राणिनो रुग्णानि भवन्ति ।

(ग) वनविनाशो न विधातव्यम् ।

(घ) वायुः स्वच्छं करणीयम् ।

(ङ) जलं जीवनमेव वर्तन्ते ।

६. **पाठमाधृत्य सङ्क्षेपेण प्रश्नानुत्तरयत**

(क) जीवनयापनाय केषाम् आवश्यकता भवति ?

(ख) यातायातसाधनानि किमुत्सृजन्ति ?

(ग) जनसङ्ख्यावृद्धेः प्रदूषणेन सह कः सम्बन्धः ?

(घ) जनाः किमर्थं वनं विनाशयन्ति ?

(ङ) वनस्य संरक्षणं कथं कार्यम् ?

(च) पृथिव्याः तापमानवृद्धेः कारणं किम् ?

(छ) उद्योगाः कथं सञ्चालनीयाः ?

**७. वायुप्रदूषणस्य प्रधानकारणानि सूत्ररूपेण विलिख्य तन्निवारणोपायान् निदर्शयत ।**

**अनुप्रयोगः**

**१. अधोलिखितानां वाक्यानां संयोजनेन सङ्क्षिप्तं प्रबन्धं रचयत**

- खाद्यवस्तुषु विषं विकीर्यते ।
- विषं सर्वेषां रोगाणां कारणम् ।
- रासायनिकमलमपि स्वास्थ्यहानेः कारणम् ।
- ग्रामीणा गोमयं विकीर्य उत्पादनं वर्धयन्ति ।
- स्वच्छं व्यञ्जनं स्वच्छं जीवनं विदधाति ।
- कीटनाशाय कार्यमेतद् विधीयते ।
- भोजनेन विना वयं न जीवामः ।
- ग्रामीणकृष्यां प्राथमिकता प्रदातव्या ।
- कृषिभूमौ निर्माणकार्यं रोद्धव्यं भवति ।
- पर्यावरणरक्षणं शिक्षितजनैः कर्तव्यम् ।

**२. पेयजलस्य स्वच्छीकरोपायविषये सखिभिः सह विमृश्य अनुच्छेदमेकं रचयत ।**

## व्याकरणबोधः

### धातुरूपावली (लुङ्लकारस्य)

**१. प्रदत्ता धातुरूपावलीः पठित्वा अभ्यासपुस्तिकायामनुलिखत**

**पठ्** इति परस्मैपदिधातोः **लुङ्**-लकारे रूपाणि-

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | |
|---|---|---|---|
| अपाठीत् | अपाठिष्टाम् | अपाठिषुः | – **प्रथमः पुरुषः** |
| अपाठीः | अपाठिष्टम् | अपाठिष्ट | – **मध्यमः पुरुषः** |
| अपाठिषम् | अपाठिष्व | अपाठिष्म | – **उत्तमः पुरुषः** |

**अथवा**

| | | | |
|---|---|---|---|
| अपठीत् | अपठिष्टाम् | अपठिषुः | – **प्रथमः पुरुषः** |
| अपठीः | अपठिष्टम् | अपठिष्ट | – **मध्यमः पुरुषः** |
| अपठिषम् | अपठिष्व | अपठिष्म | – **उत्तमः पुरुषः** |

**भू**-धातोः **लुङ्**-लकारस्य रूपाणि-

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | |
|---|---|---|---|
| अभूत् | अभूताम् | अभूवन् | – **प्रथमः पुरुषः** |
| अभूः | अभूतम् | अभूत | – **मध्यमः पुरुषः** |
| अभूवम् | अभूव | अभूम | – **उत्तमः पुरुषः** |

**गम्**-धातोः **लुङ्**-लकारस्य रूपाणि-

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | |
|---|---|---|---|
| अगमत् | अगमताम् | अगमन् | – **प्रथमः पुरुषः** |
| अगमः | अगमतम् | अगमत | – **मध्यमः पुरुषः** |
| अगमम् | अगमाव | अगमाम | – **उत्तमः पुरुषः** |

**वृध्** (**वर्ध्**) इति **आत्मनेपदि**धातोः **लुङ्**-लकारे रूपाणि-

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | |
|---|---|---|---|
| अवर्धिष्ट | अवर्धिषाताम् | अवर्धिषत | – **प्रथमः पुरुषः** |
| अवर्धिष्ठाः | अवर्धिषाथाम् | अवर्धिध्वम् | – **मध्यमः पुरुषः** |
| अवर्धिषि | अवर्धिष्वहि | अवर्धिष्महि | – **उत्तमः पुरुषः** |

**कृ** इति **उभयपदि**धातोः **लुङ्**-लकारे-

**परस्मैपदस्य** रूपाणि-

| | | | |
|---|---|---|---|
| अकार्षीत् | अकर्ष्टाम् | अकार्षुः | – **प्रथमः पुरुषः** |
| अकार्षीः | अकार्ष्टम् | अकार्ष्ट | – **मध्यमः पुरुषः** |
| अकार्षम् | अकार्ष्व | अकार्ष्म | – **उत्तमः पुरुषः** |

**आत्मनेपदस्य** रूपाणि-

| | | | |
|---|---|---|---|
| अकृत | अकृषाताम् | अकृषत | **– प्रथमः पुरुषः** |
| अकृथाः | अकृषाथाम् | अकृढ्वम् | **– मध्यमः पुरुषः** |
| अकृषि | अकृष्वहि | अकृष्महि | **– उत्तमः पुरुषः** |

२. **धातुरूपावल्याः शिक्षकस्य वा साहाय्येन अधस्तनीं रूपवलीं पूरयत**

**लभ्–धातोः लुङि रूपणि–**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | |
|---|---|---|---|
| अलब्ध | ............. | अलप्सत | **– प्रथमः पुरुषः** |
| ............. | ललप्साथाम् | ............. | **– मध्यमः पुरुषः** |
| ............. | ............. | अलप्स्महि | **– उत्तमः पुरुषः** |

३. **लिख् (लेख्)–धातोः लुङ्–लकारस्य पठ्–धातुवद् रूपणि लिखत ।**

४. **धातुरूपावल्याः सहयोगेन अधस्तनधातूनां लुङ्–लकारे जायमानानि रूपाणि लिखत**

**परस्मैपदिनः** – पा, स्था, हस्, क्रन्द्, क्रीड्, धाव् ।

**आत्मनेपदिनः** – लभ्, एध्, वृत्, रुच् ।

**उभयपदी** – पच् ।

५. **परस्परं मेलयत**

| | |
|---|---|
| सः/सा/तत्/छात्रः | अभूः |
| तौ/ते/ते/छात्रौ | अलब्ध्वम् |
| ते/ताः/तानि/छत्राः | अपाठिष्टाम् |
| त्वम् | अलेखिषम् |
| युवाम् | अकार्षुः |
| यूयम् | अपाम |
| अहम् | अगमत् |
| आवाम् | अक्रीडिष्टम् |
| वयम् | अकृष्वहि |

**६. कोष्ठस्थं संकेतमनुसृत्य रिक्तस्थानं पूरयित्वा वाक्यानि रचयत**

(क) छात्रः अद्य प्रातः गीताम् ...................... । (पठ्, लुङ्)

(ख) त्वं स्पर्धायां प्रथमस्थानम् ...................... । (लभ्, लुङ्)

(ग) यूयं अद्य ह्यो वा तत्र ...................... । (गम्, लुङ्)

(घ) पितः ! अद्य कक्षायाम् अभिनयम् ...................... । (कृ, लुङ्, आत्मनेपदम्)

(ङ) बालकस्य स्फूर्तिः दुग्धपानेन ...................... । (वृध्, लुङ्)

**७. शिक्षकाद् यथावश्यकं साहाय्यमवाप्य पदानां वाक्येषु प्रयोगं दर्शयत**

अलब्ध, अभूवन्, अपाठीः, अकार्षीत्, अपाम्, अलेखिष्ट, अकृष्महि ।

**८. पाठे प्रयुक्तानि परस्मैपदीनि आत्मनेपदीनि च क्रियापदानि पृथक्कृत्य सारिण्यां दर्शयत ।**

## कोषानुशीलनम्

### मनुष्यवर्गः

**अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः । कौलटेरः कौलटेयो भिक्षुकी तु सती यदि ॥**

**तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः । आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥**

**आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे । स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता ॥**

**जनयित्री प्रसूर्माता जननी भगिनी स्वसा । ननान्दा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥**

**भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् । प्रजावती भ्रातृजाया मातुलानी तु मातुली ॥**

**पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः । पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः ॥**

**श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ । स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः ॥**

**पितामहः पितृपिता तत्पिता प्रपितामहः । मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥**

**समानोदर्यसोदर्यसगर्भ्यसहजाः समाः । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥**

ज्ञातेयं बन्धुता तेषां क्रमाद्भावसमूहयोः । धवः प्रियः पतिर्भर्ता जारस्तूपपतिः समौ ॥

अमृते जारजः कुण्डो मृते भर्तरि गोलकः । भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ ॥

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ । श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥

दम्पती जम्पती जायापती भार्यापती च तौ । गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियाम् ॥

सूतिमासो वैजननो गर्भो भ्रूण इमौ समौ । तृतीया प्रकृतिः शण्ढः क्लीबः पण्डो नपुंसके ॥

शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे । स्यात्स्थाविरं तु वृद्धत्वं वृद्धसङ्घेऽपि वार्धकम् ॥

पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा । स्यादुत्तानशया डिम्भा स्तनपा च स्तनन्धयी ॥

बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा । प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥

वर्षीयान्दशमी ज्यायान्पूर्वजस्त्वग्रियोऽग्रजः । जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥

अमांसो दुर्बलश्छातो बलवान्मांसलोंऽसलः । तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः ॥

अवटीटोऽवनाटश्चावभ्रटो नतनासिके । केशवः केशिकः केशी वलिनो वलिभः समौ ॥

विकलाङ्गस्त्वपोगण्डः खर्वो ह्रस्वश्च वामनः । खरणाः स्यात्खरणसो विग्रस्तु गतनासिकः ॥

खुरणाः स्यात्खुरणसः प्रज्ञुः प्रगतजानुकः । ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्संज्ञुः संहतजानुकः ॥

स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः । पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते ॥

वलिरः केकरे खोडे खञ्जस्त्रिषु जरावराः । जडुलः कालकः पिप्लुस्तिलकस्तिलकालकः ॥

अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया । भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥

स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः । क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः ॥

स्त्री क्षुत्क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान् । शोफस्तु श्वयथुः शोथः पादस्फोटो विपादिका ॥

किलाससिध्मे कच्छ्वां तु पाम पामा विचर्चिका । कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटकः स्त्रियाम् ॥

व्रणोऽस्त्रियामीर्मम‍रुः क्लीबे नाडीव्रणः पुमान् । कोठो मण्डलकं कुष्ठश्वित्रे दुर्नामकार्शसी ॥

आनाहस्तु निबन्धः स्याद्ग्रहणीरुक्प्रवाहिका । प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**व्यभिचारिण्याः पुत्रस्य नामानि** – बान्धकिनेयः (१), बन्धुलः (१), , असतीसुतः (१), कौलटेरः (१), कौलटेयः (१)

**सत्या भिक्षुक्याः पुत्रस्य नामनी** – कौलटिनेयः (१), कौलटेयः (१)

**पुत्रस्य नामानि** – आत्मजः (१), तनयः (१), सूनुः (१), सुतः (१), पुत्रः (१)

**एतानि पुत्र्याः नामानि** – आत्मजा (२), तनया (२), सूनुः (२), सुता (२), पुत्री (२), दुहिता (२)

**अपत्यस्य नामनी** – अपत्यम् (३), तोकम् (३)

**सवर्णपत्न्यां जातस्य पुत्रस्य नामनी** – औरसः (१) औरस्यः (१)

**पितुः नामानि** – तात : (१), जनकः (१), पिता (२)

**मातुः नामानि** – जनयित्री (२), प्रसूः (२), माता (२), जननी (२)

**भगिन्याः नामनी** – भगिनी (२), स्वसा (२)

**पतिस्वसुः नाम** – ननान्दा (२)

**पौत्र्याः नामानि** – नप्त्री (२), पौत्री (२), सुतात्मजा (२)

**भ्रातृवर्गस्य भार्यायाः नाम** – याता (२)

**भ्रातृजायायाः नामनी** – प्रजावती (२), भातृजाया (२)

**मातुल्याः नामनी** – मातुलानी (२), मातुली (२)

**पतिपत्न्योर्मातुः नाम** – श्वश्रूः (२)

**पतिपत्न्योः पितुः नाम** – श्वशुरः

**पितुर्भ्रातुः नाम** – पितृव्यः (१)

**मातृभ्रातुः नाम** – मातुलः (१)

**पत्न्या भ्रातुः नाम** – श्यालः (१)

**पतिभ्रातुः नामनी** – देवा (१) देवरः (१)

**भगिन्याः पुत्रस्य नामनी** – स्वस्रीयः (१), भागिनेयः (१)

**जामातु. नामनी** – जामाता (१), विट्पतिः (१)

**भगिन्याः पत्युः नामनी** – भामः (१), भगिनीपतिः (१)

**पितामहस्य नामनी** – पितामहः (१), पितृपिता (१)

**पितामहस्य पितुः नाम** – प्रपितामहः (१)

**मातामहस्य नामनी** – मातामहः (१), मातृपिता (१)

**सपिण्डस्य नामनी** – सपिण्डः (१), सनाभिः (१)

**समानोदर्यस्य नामानि** – समानोदर्यः (१), सोदर्यः (१), सगर्भ्यः (१), सहजः (१)

**बान्धवस्य नामानि** – सगोत्रः (१), बान्धवः (१), ज्ञातिः (१), बन्धुः (१), स्वः (१), स्वजनः (२)

**बन्धूनाम् क्रमाद् भावसमूहयोः नामनी** – ज्ञातेयम् (३) बन्धुता (२)

**भर्तुः नामानि** – धवः (१), , प्रियः (१), पतिः (१), भर्ता (१)

**जारस्य नामनी** – जारः (१), उपपतिः (१)

**अमृते भर्तरि सति जाराज्जातस्य पुत्रस्य नाम** – कुण्डः (१)

**भर्तरि मृते सति जाराज्जातस्य पुत्रस्य नाम** – गोलकः (१)

**भ्रातृजस्य नामनी** – भ्रात्रीयः (१), भ्रातृजः (१)

**भ्रातृभागिन्योः नामनी** – भ्रातृभगिन्यौ (२), भ्रातरौ (१)

**समुच्चयरूपेण मातापित्रोः नामानि** – मातापितरौ (१), पितरौ (१) मातरपितरौ (१) प्रसूजनयितारौ (२)

**समुच्चयरूपेण द्वयोः नामनी** – श्वश्रूश्वशुरौः (१), श्वशुरौ (१)

**पुत्रीपुत्रयोर्नाम** – पुत्रौ (१)

**पतिपत्न्योः नामानि** – दम्पती (१), जम्पती (१), जायापती (१), भार्यापतीः (१)

**गर्भाशयस्य नामनी** – गर्भाशयः (१), जरायुः (१)

**उल्बस्य नामनी** – उल्बम् (३), कललम् (५)

**सूतिमासस्य नामनी** – सूतिमासः (१), वैजननः (१)

**भ्रूणस्य नामनी** – गर्भः (१), भ्रूणः (१)

**नपुंसकस्य नामानि** – तृतीयाप्रकृतिः (१), षण्डः (१), क्लीवः (१), षण्डः (१), नपुंसकम् (५)

**शिशुत्वस्य नामानि** – शिशुत्वम् (३), शैशवम् (३), बाल्यम् (३)

**यौवनावस्थायाः नामनी** – तारुण्यम् (३), यौवनम् (३)

**वृद्धावस्थायाः नामनी** – स्थाविरम् (३), वृद्धत्वम् (३)

**वृद्धसङ्घस्य नाम** – वार्धकम् (३)

**जरया केशादौ शौक्ल्यस्य नाम** – पलितम् (३)

**वृद्धावस्थायाः नामनी** – विस्रसा (२), जरा (२)

**स्तनन्धयस्य शिशोः नामानि** – उत्तानशया (७), डिम्भा (७), स्तनपा (७), स्तनन्धयी (७)

**बालकस्य नामनी** – बालः (७), माणवकः (७)

**तरुणस्य नामानि** – वयस्थः (७), तरुणः (७), युवा (७)

**वृद्धस्य नामानि** – प्रवयाः (७), स्थविरः (७), वृद्धः (७), जीनः (७), जीर्णः (७), जरन् (७)

**अतिवृद्धस्य नामानि** – वर्षीयः, दशमिन्, ज्यायः

**ज्येष्ठस्य नामानि** – पूर्वजः, अग्रियः, अग्रजः

**कनिष्ठस्य नामानि** – जघन्यजः, कनिष्ठः, यवीयः, अवरजः, अनुजः

**दुर्बलस्य नामानि** – अमांसः, दुर्बलः, छातः

**बलवतः नामानि** – बलवान्, मांसलः, अंसलः

**तुन्दिलस्य नामानि** – तुन्दिलः, तुन्दिभः, तुन्दिन्, बृहत्कुक्षिः, पिचण्डिलः

**अवनाटस्य नामानि** – अवटीटः, अवनाटः, अवभ्रटः, नतनासिकः

**केशिकस्य नामानि** – केशवः, केशिकः, केशिनः

**वलिभस्य नामनी** – वलिनः, वलिभः

**विकलाङ्गस्य नामनी** – विकलाङ्गः, अपोगण्डः

**खर्वस्य नामानि** – खर्वः, ह्रस्वः, वामनः

**खरणसः नामानि** – खरणः, खरणसः

**विग्रस्य नामानि** – विग्रः, गतनासिकः

**खुरणसः नामनी** – खुरणः, खुरणसः

**प्रगतजानुकस्य नामनी** – प्रज्ञुः, प्रगतजानुकः

**ऊर्ध्वजानोः नामनी** – ऊर्ध्वज्ञुः, ऊर्ध्वजानुः

**संहतजानुकस्य नामनी** – संज्ञुः, संहतजानुकः

**बधिरस्य नामनी** – एडः, बधिरः

**कुब्जस्य नामनी** – कुब्जः, गडुलः

**कुकरस्य नामनी** – कुकरः, कुणिः

**अल्पतनोः नामनी** – पृश्निः, अल्पतनुः

**पङ्गोः नामनी** – श्रोणः, पङ्गुः

**मुण्डस्य नामनी** मुण्डः, मुण्डितः

**वलिरस्य नामनी** – वलिरः, केकरः

**खोडस्य नामनी** – खोडः, खञ्जः (जराशब्दादितःपर्यन्तं त्रिष्वेव लिङ्गेषु भवन्ति)

**कालकस्य नानानि** – जडुलः (१), कालकः (१), पिप्लु (१)

**तिलकस्य नामनी** – तिलकः (१), तिलकालकः (१)

**आरोग्यस्य नामनी** – अनामयम् (३), आरोग्यम् (३)

**चिकित्सायाः नामनी** – चिकित्सा (२), रुक्प्रतिक्रिया (२)

**औषधस्य नामानि** - भेषजम् (३), औषधम् (३), भैषज्यम् (३), अगदः (१०, जायुः (१)

**रोगस्य नामानि** – रुज् २, रुजा (२), उपतापः (१), रोगः (१), व्याधिः (१), गदः (१), आमयः (१)

**क्षयरोगस्य नामानि** – क्षयः (१), शोषः (१), यक्ष्मन् (१)

**पीनसस्य नामनी** –प्रतिश्यायः (१), पीनसः (१)

**क्षुतस्य नामानि** – क्षुत् (२), क्षुतम् (३), क्षवः (१)

**क्षवथोः नाम** – कासः (१), क्षवथु (१)

**शोफस्य नामानि** – शोफः (१), श्वयथुः (१), शोथः (१)

**पादस्फोटस्य नामनी** – पादस्फोटः (१), विपादिका (२)

**किलासस्य नामनी** – किलासम् (३), सिध्मम् (३)

**कासस्य नाम** – कच्छू (२), पामन् (१), पामा (२), विचर्चिका (२)

**कण्डूयायाः नामानि** – कण्डू (२), खर्जू (२), कण्डूया (२)

**पिटकस्य नामनी** – विस्फोटः (१), पिटकः (७)

**व्रणस्य नामानि** व्रणः (५), ईर्म (३), अरुः (३)

**नाडीव्रणस्य नाम** – नाडीव्रणः (१)

**कोठस्य नाम** – कोठः (१), मण्डलकः (३)

**कुष्ठरोगस्य नामनी** – कुष्ठम् (३), श्‍वित्रम् (३)

**दुर्नामकस्य नामनी** – दुर्नामकम् (३), अर्शः (३)

**विबन्धस्य नामानि** – आनाहः (१), विबन्धः (१)

**प्रवाहिकायाः नामनी** – ग्रहणी (२), प्रवाहिका (२)

**वमेः नामानि** – प्रच्छर्दिका (२), वमिः (२), वमथु (१)

## अभ्यासः

१. **पुत्रस्य नामानि श्रावयत ।**

२. **जनन्याः नामानि वदत ।**

३. **परस्परं मेलयत**

| | |
|---|---|
| तनयः | देवरः |
| नप्त्री | सुतः |
| देवा | गर्भाशयः |
| धवः | जीर्णः |
| जरायुः | पौत्री |
| स्थविरः | भर्ता |

४. **सङ्क्षिप्तोत्तरं लिखत**

(क) कीदृशो जनः "जारः" इत्युच्यते ?

(ख) भर्तरि मृते सति जाराज्जातस्य पुत्रस्य किं नाम भवति ?

(ग) भातृवर्गस्य भार्याः परस्परं किमुच्यन्ते ?

(घ) सगोत्रस्य कति नामानि सन्ति ?

(ङ) बान्धवानां त्रीणि नामानि लिखत ।

५. **नेपालीभाषायामर्थं लिखत**

बन्धुलः, कललम्, माणवकः, स्तनपा, श्यालः, षण्ढः, गोलकः, सनाभिः, भामः, औरसः, प्रसूः, औषधम्, तुन्दिभः, खर्वः ।

६. **पर्यायशब्दान् लिखत**

भ्रूणः, जीनः, तातः, उल्बम्, कुण्डः, मातुलानी, स्वसा, भागिनेयः, विट्पतिः, सूनुः।

७. **जामातृशब्दस्य सर्वाणि रूपाणि लिखत ।**

८. **शिशुत्वस्य नामानि लिखत ।**

९. **संस्कृतेऽनुवादं कुरुत**

(क) तिम्रा भाइबुहारी अमेरिका गएका हुन् र ?

(ख) शिशुलाई सबैले माया गर्छन् ।

(ग) भान्जाहरू कोसेली लिएर मामाघर गए ।

(घ) आज देवर देउरानी दोलखा भीमसेनस्थानको दर्शन गर्न गएछन् ।

(ङ) काकीले सुन्तला टिपेर दिनुभयो ।

(च) आज हाम्रो घरमा फुपाजु र भिनाजु आउनुभयो ।

# नीतिवचनानि

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥१॥
स्थिरा शैली गुणवतां खलबुद्ध्या न बाधते ।
रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते ॥२॥
नास्ति लोभसमो व्याधिर्नास्ति क्रोधसमो रिपुः ।
नास्ति दारिद्र्यवद् दुःखं नास्ति ज्ञानात्परं सुखम् ॥३॥
बीजाद् भवन्ति पुष्पाणि पुष्पेभ्यश्च फलोद्गमः ।
फलान्ते च पुनर्बीजं जीवनं किमतः परम् ॥४॥

१

**अन्वयः**

शूरश्च, कृतविद्यश्च, यः सेवितुं जानाति (स) च, (एते) त्रयः पुरुषाः सुवर्णपुष्पं पृथिवीं चिन्वन्ति ।

**सरलार्थः**

शूरः, विद्वान् परसेवायां प्रवृत्तश्चेति त्रिविधाः पुरुषाः पृथिव्यां सुवर्णपुष्पाणि प्राप्नुवन्ति । ते सर्वत्र सफला भवन्ति ।

२

**अन्वयः**

(यथा) रत्नदीपस्य शिखा हि वात्ययापि न नाश्यते (तथैव) गुणवतां (जनानाम्) स्थिरा शैली खलबुद्ध्या न बाधते ।

**सरलार्थः**

यथा रत्नरूपिणो दीपस्य शिखा वेगवता वायुना न विनाश्यते तथैव गुणवतां जनानां धीरा कार्यविचारव्यवहारादिशैली दुष्टमत्या नावरुध्यते ।

३

**अन्वयः**

लोभसमो व्याधिः नास्ति, क्रोधसमो रिपुः नास्ति, दारिद्र्यवद् दुःखं नास्ति, ज्ञानात् परं सुखं (च) नास्ति ।

**सरलार्थः**

इह जगति लोभसदृशो रोगः, क्रोधतुल्यः शत्रुः, दारिद्र्यवद् दुःखम्, ज्ञानवत् सुखं च न सन्ति ।

४

**अन्वयः**

बीजात् पुष्पाणि भवन्ति, पुष्पेभ्यः च फलोद्गमः (भवति), फलान्ते च पुनः बीजम् (भवति), अतः परं जीवनं किम् ?

**सरलार्थः**

बीजात् पुष्पणि जायन्ते । पुष्पेभ्यः फलानि फलन्ति । फलस्य समाप्तौ बीजमेव अवशिष्यते । अस्मात् चक्रात् जीवनं भिन्नं नास्ति । प्रक्रियेयं जीवनस्य सारमस्ति ।

## शब्दार्थाः

| | |
|---|---|
| चिन्वन्ति | टिप्दछन्, छान्दछन् |
| शूरः | वीर, निडर |
| कृतविद्यः | विद्या आर्जन गरेको व्यक्ति |
| सेवितुम् | सेवा गर्न |
| बाधते | रोक्दछ, अवरोध गर्छ |
| गुणवताम् | गुणवान् व्यक्तिहरूको, गुणले युक्तहरूको |

| | |
|---|---|
| शिखा | बत्तीको ज्वाला |
| वात्या | आँधी, वेगयुक्त वायु |
| दारिद्र्यवत् | दरिद्रताजस्तो, गरिबीजस्तो |
| फलोद्‌गमः | फलको उत्पत्ति |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **शुद्धमुच्चारयत**

सुवर्णपुष्पम्, पुरुषास्त्रयः, कृतविद्यश्च, वात्ययापि, दारिद्र्यवत्, पुष्पेभ्यश्च, फलोद्‌गमः, पुनर्बीजम् ।

२. **शिक्षकमुखात् पाठस्य श्लोकान् सलयं श्रुत्वा तमनुवाचयत ।**

३. **पाठस्य द्वितीयस्य पद्यस्य सरलार्थं कक्षायां श्रावयत ।**

४. **अधस्तनपदानाम् अर्थं कथयत**

स्थिरा, शिखा, दारिद्र्यवत्, फलोद्‌गमः, फलान्ते ।

५. **पाठाधारेण उत्तराणि वदत**

(क) कीदृशा जनाः पृथिव्यां सुवर्णपुष्पाणि प्राप्नुवन्ति ?

(ख) वात्यया किं कर्तुं न शक्यते ?

(ग) क्रोधः कीदृशो भवति ?

(घ) सुखं किम् ?

(ङ) पुष्पाणि कस्माद् भवन्ति ?

(च) बीजं कदा अवशिष्टं भवति ?

६. **अधोलिखितं श्लोकं श्रुत्वा प्रश्नानां उत्तरं कथयत**

गुणो भूषयते रूपं शीलं भूषयते कुलम् ।
सिद्धिर्भूषयते विद्यां भोगो भूषयते धनम् ॥

(क) गुणः किं भूषयते ?

(ख) का विद्यां भूषयते ?

(ग) भोगः किं भूषयते ?

(घ) 'सिद्धिर्भूषयते' इत्यत्र कः सन्धिः ?

७. **पाठस्थश्लोकान् मित्रमुखात् श्रुत्वा तत्रत्यानि अव्ययपदानि निगदत ।**

## पठनम्

१. **अधोलिखितं गद्यांशं पठित्वा उत्तराणि दत्त**

धनस्य विषये शास्त्रेषु बहु चर्चितं वर्तते। धनस्य किं प्रयोजनमिति विषये नैकमतमवाप्यते। धनं सञ्चयस्य विषयः, एतद् भोगस्य विषयः, इदं प्रदर्शनस्य विषयश्चेति मतान्तराणि श्रूयन्ते । कृपणा धनस्य केवलं सञ्चयमेव कुर्वन्ति, न हि व्ययम् । भोगपरायणा एतस्य भोगाय एव उपयोगं विदधति । आडम्बरिकास्तु ऋणं कृत्वापि धनमदं प्रदर्शयन्ति । नीतिशास्त्रेषु धनस्य तिस्रो गतयो भवन्तीति उल्लिखितं वर्तते- भोगः, दानम्, नाशश्च । गभीरचिन्तनेन वयं विचारयामश्चेद् धनस्य इमा एव गतयो दृश्यन्ते । भोगो दानं च सदुपयोगः, नाशस्तु दुरुपयोग एव । धनस्य चतुर्थी गतिर्नास्ति ।

(क) कस्मिन् विषये एकमतं नास्ति ?

(ख) कृपणाः किं कुर्वन्ति ?

(ग) धनमदस्य प्रदर्शकाः के ?

(घ) धनस्य तिस्रो गतयः काः ?

(ङ) धनस्य सदुपयोगः कथं भवति ?

(च) धनस्य व्ययं कुत्र कर्तव्यम् ?

२. **पाठस्य प्रथमं श्लोकं पठित्वा सन्धियुक्तपदानां सन्धिविच्छेदं कुरुत ।**

३. **अधोलिखितौ श्लोकौ यथाक्रमं संयोज्य पठत**

(क) विदेशेषु धनं विद्या (ख) व्यसनेषु धनं मतिः

(ग) परलोके धनं धर्मः (घ) शीलं सर्वत्र वै धनम्

(ङ) पुस्तकस्था तु या विद्या (च) परहस्तगतं धनम्

(छ) कार्यकाले समुत्पन्ने (ज) न सा विद्या न तद्धनम्

४. **पाठस्य अन्तिमं श्लोकं पठित्वा अन्वयं प्रदर्शयत ।**

५. **अधोलिखितं श्लोकं पठित्वा स्वमतं प्रस्तुत**

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥

६. **पाठस्य द्वितीयस्य श्लोकस्य सरलार्थं पठित्वा द्वौ प्रश्नौ निर्मात ।**

७. **अधस्तनं श्लोकं यति-गति-लयसंयोजनेन वाचयित्वा प्रश्नानुत्तरयत**

दरिद्रता धीरतया विराजते कुवस्त्रता शुभ्रतया विराजते ।
कदन्नता चोष्णतया विराजते कुरूपता शीलतया विराजते ॥

(क) धीरतया का विराजते ?

(ख) कुवस्त्रता कया शोभते ?

(ग) कुरूपता कया सुशोभिता भवति ?

(घ) का उष्णतया विराजते ?

(ङ) 'चोष्णतया' इत्यत्र द्वे पदे के ?

## लेखनम्

१. **श्रुतिलेखनं कुरुत**

कृतविद्यश्च, खलबुद्धया, वात्यया, दारिद्रचवत्, पुष्पेभ्यश्च, पुनर्बीजम्, प्रजापतिः, यथास्मै, परहस्तगतम्, समुत्पन्ने, तद्धनम् ।

## २. रिक्तस्थानं पूरयत

(क) त्रयः पुरुषाः सुवर्णपुष्पाणि ......... । (लभन्ते/पश्यन्ति)

(ख) ........ रत्नदीपस्य शिखा न नाश्यते । (वात्यया/वायुना)

(ग) ......... व्याधिर्नास्ति । (ज्ञानसमो/लोभसमो)

(घ) ........ परमं सुखं वर्तते । (दारिद्र्यम्/ज्ञानम्)

(ङ) बीजात् ......... भवन्ति । (पुष्पाणि/पुस्तकानि)

## ३. पाठाधारेण परस्परं मेलयत

| | |
|---|---|
| स्थिरा | रिपुः |
| कृतविद्यः | कुलभूषणम् |
| क्रोधसमः | शिखा |
| सुवर्णपुष्पम् | शैली |
| शीलम् | पृथिवीम् |
| रत्नदीपस्य | जनः |

## ४. उदाहरणानुसारेण वाक्यवियोजनं कुरुत

**यथा–**

पुत्रः पितरौ प्रणम्य गृहाद् बहिर्गच्छति ।

- पुत्रः पितरौ प्रणमति । स गृहाद् बहिर्गच्छति ।

(क) छात्राः गुरूनभिनन्द्य प्रशंसन्ति ।

(ख) चिकित्सको रोगिणं दृष्ट्वा मौनमाचरति ।

(ग) दानिनो धनं प्रदाय आनन्दमनुभवन्ति ।

(घ) वयं काव्यं पठित्वा हर्षमनुभवामः ।

(ङ) स स्वमतं प्रकटय्य अन्येषां विचारान् शृणोति ।

**५. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत**

शूरः, शैली, बाधते, दीपस्य, व्याधिः, दुःखम्, फलोद्गमः, बीजम्, जीवनम्, प्रजापतिः, परिवर्तते ।

**६. निर्देशानुसारेण वाक्यानि परिवर्तयत**

(क) साफल्यम् अधिगमनस्य उपयाः सन्ति । (एकवचने)

(ख) खलबुद्धिः दुःखस्य कारणमभवत् । (लट्लकारे)

(ग) यः क्रोधं जयति स साफल्यं लभते । (बहुवचने)

(घ) अहं सदैव सत्यं वदामि । (द्विवचने)

(ङ) दर्शकैः सततं हस्यते । (कर्तृवाच्ये)

(च) अर्जुनो विश्वरूपं पश्यति । (लङ्लकारे)

(छ) छात्राः भ्रमणाय गच्छन्ति । (लृट्लकारे)

**७. अशुद्धीः संशोध्य वाक्यानां पुनलेर्खनं कुरुत**

(क) बुद्धिवतां जनानाम् अनुसरणं कर्तव्यं भवति ।

(ख) पथे यात्रिणश्चलन्ति ।

(ग) छन्दे लघुगुरुणां गणना भवति ।

(घ) पाणिनेः व्याकरणं वैज्ञानिको मन्यते ।

(ङ) कालिदासस्य उपमा बहु चर्तितमस्ति ।

(च) म्याक्समूलरः संस्कृतस्य उपकारः अकरोत् ।

**८. संस्कृते अनुवादं कुरुत**

(क) काव्य पढ्नाले व्यावहारिक ज्ञान पाइन्छ ।

(ख) भारवि अर्थगौरवका कवि मानिन्छन् ।

(ग) सुख र दुःख चक्र झैँ घुमिरहन्छन् ।

(घ) सिद्धहरूको वाणीमा शक्ति हुन्छ ।

(ङ) गुरुको निर्देशन र शिष्यको परिश्रम सफलताका कारण हुन् ।

(च) पढाइमा भन्दा बुझाइमा बढी आनन्द हुन्छ ।

**९. पाठस्य चतुर्णामेव श्लोकानां स्वगिरा सरलार्थं लिखित्वा शिक्षकं दर्शयत ।**

**अनुप्रयोगः**

**१. अधोलिखितयोः श्लोकयोर्मध्ये कतमं पद्यं काव्यात्मकं वर्तते ? कारणमुल्लिख्य परस्परं विमृशत**

(क) आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥

(ख) स्वर्गतुल्या इयं पृथ्वी देवतुल्याः सुहृज्जनाः ।
कर्म देवार्चनं सर्वं व्यर्थं स्वर्गस्य कामना ॥

**२. अधोलिखितानंशान् संयोज्य पद्यमेकं रचयत**

सदूषणापि निर्दोषा, नमस्तस्मै कृता येन, सखरापि सुकोमला, रम्या रामायणी कथा ।

**३. भासाश्वघोष-कालिदास-भारवि-माघ-श्रीहर्षाणां मध्ये कस्यापि एकस्य महाकवेः पद्यमेकमन्विष्य सरलार्थं कथयत ।**

**४. अधोलिखितस्य पद्यस्य निर्देशानुसारेण परिचयं दत्त**

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

(क) अव्ययपदानि ..................

(ख) नामपदानि .....................

(ग) विशेषणपदानि .................

(घ) मोहात् विभक्तिः, वचनं च .............................

(ङ) उडुपेन विभक्तिः, वचनं च ...........

(च) मतिः लिङ्गम् ............

# व्याकरणबोधः

१. **प्रदत्तानां धातूनां लट्लकारस्य रूपाणि पठित्वा रिक्तस्थानं पूरयत**

**ज्ञा–धातुः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमः** | जानाति | जानीतः | जानन्ति |
| **मध्यमः** | जानासि | जानीथः | जानीथ |
| **उत्तमः** | जानामि | जानीवः | जानीमः |

**चि–धातुः**

| | | | |
|---|---|---|---|
| | चिनोति | चिनुतः | चिन्वन्ति |
| | चिनोषि | चिनुथः | चिनुथ |
| | चिनोमि | चिनुवः/चिन्वः | चिनुमः/चिन्मः |

**प–धातुः**

| | | | |
|---|---|---|---|
| | पिबति | पिबतः | पिबन्ति |
| | पिबसि | पिबथः | पिबथ |
| | पिबामि | पिबावः | पिबामः |

(क) बालाः रूपावलीं ........ । (ज्ञा-धातुः)

(ख) त्वं कतिसङ्ख्यकानि वस्त्राणि ...... । (चि-धातुः)

(ग) हरिणौ जलं .......... । (पा-धातुः)

(घ) वयं कवितां .......... । (श्रु-धातुः)

२. **पाठे प्रयुक्तानाम् अधस्तनक्रियापदानां लकारनिर्देशं कुरुत**

चिन्वन्ति, जानाति, बाधते, नाश्यते, अस्ति, भवन्ति ।

३. **क्रियापदानि प्रयुज्य वाक्यानि रचयत**

शृणुथ, पश्यन्ति, स्मः, जानीवः, शृणोषि, कुर्मः, यच्छति, बिभेति, नश्यति, नाशयति ।

४. **पाठस्य सहयोगेन कोष्ठकात् समुचितं पदं विचित्य रिक्तस्थानं पूरयत**

(क) त्रयः पुरुषाः ............... चिन्वन्ति । (पृथिवी, पृथिवीं)

(ख) त्रिभिः पुरुषैः ............... चीयते । (पृथिवी, पृथिवीं)

(ग) अहं तव ............... न जानामि । (समस्या, समस्याम्)

(घ) मया तव ............... न ज्ञायते । (समस्या, समस्याम्)

(ङ) वात्या अपि रत्नदीपस्य ............... न नाशयति । (शिखा, शिखाम्)

(च) वात्यया अपि रत्नदीपस्य ............... न नाश्यते । (शिखा, शिखाम्)

५. **उदाहरणमनुसृत्य यथानिर्देशं वाच्यपरिवर्तनं कुरुत**

**यथा–**

| **कर्तृवाच्ये–** | **कर्मवाच्ये–** |
|---|---|
| बालिका पाठं पठति । | - बालिकया पाठः पठ्यते । |
| बालिकाः पाठं पठन्ति । | - बालिकाभिः पाठः पठ्यते । |
| बालिके पाठान् पठतः । | - बालिकाभ्यां पाठाः पठ्यन्ते । |
| छात्रः कवितां शृणोति । | - छात्रेण कविता श्रूयते । |
| छात्रौ/छात्राः कवितां शृणुतः/शृण्वन्ति । | - छात्राभ्यां/छात्रैः कविता श्रूयते । |
| छात्रः द्वे कविते शृणोति । | - छात्रेण द्वे कविते श्रूयेते । |
| छात्रः कविताः शृणोति । | - छात्रेण कविताः श्रूयन्ते । |
| आवां त्वां पश्यावः । | - आवाभ्यां त्वं दृश्यसे । |
| गुरुः मां पश्यति । | - गुरुणा अहं दृश्ये । |

कर्मवाच्ये कर्तरि तृतीया, कर्मणि प्रथमा, प्रथमान्तस्य कर्मणः पुरुष-वचनानुसारेण च कर्मवाच्यस्य क्रियापदं भवति ।

पठ्-धातोः कर्मवाच्ये लट्लकारस्य क्रियापदानि यथा-

| | | |
|---|---|---|
| पठ्यते | पठ्येते | पठ्यन्ते |
| पठ्यसे | पठ्येथे | पठ्यध्वे |
| पठ्ये | पठ्यावहे | पठ्यामहे |

कर्मवाच्ये भाववाच्ये च सर्वेषां धातूनां क्रियापदेषु केवलम् आत्मनेपदं भवति । अकर्मकधातूनां कर्मवाच्ये प्रयोगो न भवति ।)

| **कर्तृवाच्ये-** | **भाववाच्ये-** |
|---|---|
| वयं तत्र तिष्ठामः । | - अस्माभिः तत्र स्थीयते । |
| त्वं तत्र तिष्ठसि । | - त्वया तत्र स्थीयते । |
| अहं परीक्षायामुत्तीर्णो भवामि । | - मया परीक्षायामुत्तीर्णेन भूयते । |
| वयं परीक्षायामुत्तीर्णाः भवामः । | - अस्माभिः परीक्षायामुत्तीर्णैः भूयते । |

भाववाच्ये सदैव प्रथमपुरुषस्य एकवचनस्य एव क्रियापदं प्रयुज्यते । सकर्मकधातूनां भाववाच्ये प्रयोगो न भवति ।)

(क) भगिनी गीतां पठति । (कर्मवाच्ये)

(ख) मात्रा ओदनः पच्यते । (कर्तृवाच्ये)

(ग) दर्शकाः नायकं पश्यन्ति । (कर्मवाच्ये)

(घ) भक्तः हरिं भजति । (कर्मवाच्ये)

(ङ) वयं कन्दुकेन क्रीडामः । (भाववाच्ये)

(च) मया प्रसन्नेन भूयते । (कर्तृवाच्ये)

(छ) वानरः फलानि खादति । (कर्मवाच्ये)

(ज) अस्माभिः कथाः श्रूयन्ते । (कर्तृवाच्ये)

(झ) युवां पाठान् पठथः । (कर्मवाच्ये)

(ञ) गुरुः छात्रान् पाठयति । (कर्मवाच्ये)

६. **अधस्तनधातूनां कर्मवाच्यस्य रूपाणि लिखत**

(क) गम्- गम्यते (ख) दा- दीयते

(ग) दृश्- दृश्यते (घ) पा- पीयते

(ङ) श्रु- श्रूयते (च) कृ- क्रियते

७. **पदानां वाक्ये प्रयोगं दर्शयत**

दीयन्ते, नाश्यते, लिख्यन्ते, ज्ञायते, न क्रियते, श्रूयन्ते, दृश्यन्ते, पीयते, भूयते, क्रीड्यते, स्थीयते ।

## कोषानुशीलनम्

### मनुष्यवर्गः

**व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः । श्लीपदं पादवल्मीकं केशघ्नस्त्विन्द्रलुप्तकः ॥**
**अश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु । रोगहार्यगदङ्कारो भिषग्वैद्यौ चिकित्सके ॥**
**वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात् । ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः ॥**
**आतुरोऽभ्यमितोऽभ्यान्तः समौ पामनकच्छुरौ । दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतोऽर्शसः ॥**
**वातकी वातरोगी स्यात्सातिसारोऽतिसारकी । स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्षिण चाप्यमी ॥**
**उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी । न्युब्जो भुग्ने रुजा वृद्धनाभौ तुन्दिलतुन्दिभौ ॥**
**किलासी सिध्मलोऽन्धोऽदृङ्मूर्च्छाले मूर्तमूर्च्छितौ । शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ॥**
**मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा । पिशितं तरसं मांसं पललं क्रव्यमामिषम् ॥**
**उत्ततप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् । रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम् ॥**
**बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा । पश्चाद्ग्रीवाशिरा मन्या नाडी तु धमनिः शिरा ॥**
**तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम् । अन्त्रं पुरीतद्गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ॥**
**स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे । सृणिका स्यन्दिनी लाला दूषिका नेत्रयोर्मलम् ॥**

**नासामलं तु सिङ्घाणं पिञ्जूषं कर्णयोर्मलम् । मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत् ॥**
**पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ । स्यात्कर्परः कपालोऽस्त्री कीकसं कुल्यमस्थि च ॥**
**स्याच्छरीरास्थ्नि कङ्कालः पृष्ठास्थ्नि तु कशेरुका । शिरोस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका ॥**
**अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम् । गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥**
**कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः । पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥**
**तद्ग्रन्थी घुटिके गुल्फौ पुमान्पार्ष्णिस्तयोरधः । जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम् ॥**
**सक्थि क्लीबे पुमानूरुस्तत्सन्धिः पुंसि वङ्क्षणः । गुदं त्वपानं पायुर्ना वस्तिर्नाभेरधो द्वयोः ॥**
**कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती । पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः ॥**
**कूपकौ तु नितम्बस्थौ द्वयहीने ककुन्दरे । स्त्रियाम्स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः ॥**
**भगं योनिर्द्वयोः शिश्नो मेढ्रो मेहनशेफसी । मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकम् ॥**
**पिचण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ । चूचुकं तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरम् ॥**
**उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः । स्कन्धो भुजशिरोंऽसोऽस्त्री सन्धी तस्यैव जत्रुणी ॥**
**बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः । मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः ॥**
**भुजबाहू प्रवेष्टो दोः स्यात्कफोणिस्तु कूर्परः । अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥**
**मणीबन्धादाकनिष्ठं करस्य करभो बहिः । पञ्चशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी ॥**
**अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी । मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥**
**पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् । प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥**
**अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः । पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥**

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**रोगविशेषाणां नामानि** – विद्रधिः (२), ज्वरः (१), मेहः (१), भगन्दरः (१)

**श्लीपदस्य नाम** – श्लीपदम् (३), पादवल्मीकम् (३)

**केशघ्नस्य नामनी** – केशघ्नम् (३), इन्द्रलुप्तकम् (३)

**मूत्रकृच्छस्य नामनी** – अश्मरी (२), मूत्रकृच्छ्रम् (३)

(इतः शुक्रपर्यन्तं सर्वे शब्दाः त्रिष्वेव लिङ्गेषु सन्ति ।)

**वैद्यस्य नामानि** – रोगहारिन्, अगदङ्कारः, भिषज्, वैद्यः, चिकित्सकः

**वार्तस्य नामानि** – वार्तः, निरामयः, कल्यः, उल्लाघः

**ग्लानस्य नामनी** – ग्लानः, ग्लास्नु

**विकृतस्य नामानि** – आमयाविन्, विकृतः, व्याधितः, अपटु, आतुरः, अभ्यमितः, अभ्यान्तः

**पामनस्य नामनी** – पामनः, कच्छुरः

**दद्रुणस्य नामनी** – दद्रुणः, दद्रुरोगी

**अर्शसस्य नामनी** – अर्शोरोगयुतः, अर्शसः

**वातरोगिणः नामानि** – वातकिन्, वातरोगिन्

**सातिसारस्य नाम** – सातिसारः, अतिसारकिन्

**चुल्लस्य नामानि** – चुल्लः, चिल्लः, पिल्लः

**उन्मत्तस्य नामनी** – उन्मत्तः, उन्मादवत्

**श्लेष्मलस्य नामानि** – श्लेष्मलः, श्लेष्मणः, कफिन्

**न्युब्जस्य नाम** – न्युब्जः

**तुन्दिलस्य नामानि** – वृद्धनाभिः, तुन्दिलः, तुन्दिभः

**सिध्मलस्य नामनी** – किलासिन्, सिध्मलः

**अन्धस्य नामनी** – अन्धः, अदृशः

**मूर्च्छालस्य नामानि** – मूर्च्छालः, मूर्तः, मूर्च्छितः,

(एते सर्वे विशेषणवचिनः शब्दाः सन्ति)

वीर्यस्य नामानि - शुक्रम् (३), तेजः (३), रेतः (३), बीजम् (३), वीर्यम् (३), इन्द्रियम् (३)

**पित्तस्य नामनी** – मायु (१), पित्तम् (३)

**कफस्य नामनी** – कफः (१), श्लेष्मन् (१)

**त्वचः नामनी** – त्वक् (२), असृग्धरा (२)

**मांसस्य नामानि** – पिशितम् (३), तरसम् (३), पललम् (३), क्रव्यम् (३), मांसम् (३), आमिषम् (३)

**शुष्कमांसस्य नामानि** – उत्तप्तम् (३), शुष्कमांसम् (३), वल्लूरम् (७)

**रुधिरस्य नामानि** – रुधिरम् (३), असृग् (३), लोहितम् (३), अस्रम् (३), रक्तम् (३), क्षतजम् (३), शोणितम् (३)

**बुक्कायाः नामनी** – बुक्का (२), अग्रमांस (३)

**हृदयस्य नामनी** – हृदयम् (३, हृद् (३)

**मेदसः नामानि** – मेदः (३), वपा (२), वसा (२)

**मन्यायाः नाम** – मन्या (२)

**नाड्याः नामानि** – नाडी (२), धमनिः (२), सिरा (२)

**तिलकस्य नामनी** – तिलकन् (३), क्लोमन् (३)

**गोर्दस्य नामनी** – मस्तिष्कम् (३), गोर्दम् (३)

**मलस्य नामनी** – किट्टम् (३), मलम् (५)

**अन्त्रस्य नामनी** – अन्त्रम् (३), पुरीतत् (५)

**गुल्मस्य नामनी** – गुल्मः (१), प्लीहा (१)

**वस्नसायाः नामानि** – वस्नसा (२), स्नायु (२)

**कालखण्डस्य नामनी** – कालखण्डम् (३), यकृत् (३)

**सृणिकाया नामानि** – सृणिका (२), स्यन्दिनी (२), लाला (२)

**दूषिकायाः नाम** – दूषिका (२)

**नासामलस्य नामनी** – नासामलम् (३), सिङ्घाणः (१)

**कर्णमलस्य नाम** – पिञ्जूषः (१)

**मूत्रस्य नामनी** – मूत्रम् (३), प्रस्रावः (१)

**शमलस्य नामानि** – उच्चारः (१), अवस्करः (१), शमलम् (३), शकृत् (३), पुरीषम् (३), गूथम् (३), वर्चस्कः (५) विष्ठा (२), विश् (२)

**कपालस्य नामनी** – कर्परः (१), कपालः (५)

**कीकसस्य नामानि** – कीकसम् (३), कुल्यम् (३), अस्थि (३)

**कङ्कालस्य नाम** – कङ्कालः (१)

**कशेरुकायाः नाम** – कशेरुका (२)

**करोटेः नामनी** – शिरोस्थि (३), करोटिः (२)

**पर्शुकायाः नाम** – पर्शुका (२)

**अङ्गानां नामानि** – अङ्गम् (३), प्रतीकः (१), अवयवः (१), अपघनः (१)

**शरीरस्य नामानि** – कलेवरम् (३), गात्रम् (३), वपुः (३), संहननम् (३), शरीरम् (३), वर्ष्म (३),

विग्रहः (१), कायः (१), देहः (५), मूर्तिः (२), तनुः (२), तनूः (२)

**पादाग्रस्य नामानि** – पादाग्रम् (३), प्रपदम् (३)

**पादानां (गोडा) नामानि** – पादः (१), पदः (१), अङ्घ्रिः (१), चरणः (५)

**घुटिकायाः नामानि** – घुटिका (२), गुल्फः (१)

**पार्ष्णेनाम** – पार्ष्णिः (१)

**जङ्घायाः नामनी** – जङ्घा (२), प्रसृता (२)

**जानोः नामानि** – जानु (५), ऊरुपर्वन् (५), अष्टीवत् (५)

**ऊरोर्नामनी** सक्थि (३), ऊरु (१)

**वङ्क्षणस्य नाम** – वङ्क्षणः (१)

**अपानस्य नामानि** – गुदम् (३), अपानम् (३), पायुः (१)

**वस्तेर्नाम** – वस्ति (४)

**कटस्य नामनी** – कटः (१), श्रोणिफलकम् (३)

**कटेः नामानि** – कटिः (२), श्रोणि (२), ककुद्मती (२)

**नितम्बस्य नाम** – नितम्बः (१)

**जघनस्य नाम** – जघनम् (३)

**कुकुन्दरस्य नाम** – कुकुन्दरः (१)

**कटिप्रोथस्य नाम** – स्फिच् (२), कटिप्रोथः (१)

**उपस्थस्य नाम** – उपस्थः (१)

**भगस्य नामनी** – भगम् (३), योनिः (४)

**लिङ्गस्य नामानि** – शिश्नः (१), मेढ्रः (१), मेहनम् (३), शेफः (३)

**मुष्कस्य नामानि** – मुष्कः (१), अण्डकोशः (१), वृषणः (१)

**त्रिकस्य नाम** – त्रिकम् (३)

**उदरस्य नाम** – पिचण्डः (१), कुक्षिः (१), जठरम् (५), उदरम् (३), तुन्दम् (३)

**स्तनस्य नामानि** – स्तनः (१), कुचः (१)

**कुचाग्रस्य नामनी** – चूचुकः (५), कुचाग्रम् (३)

**क्रोडस्य नामानि** – क्रोडः (६), भुजान्तरम् (३), उरः (३), वत्सः (५), वक्षः (३)

**पृष्ठस्य नाम** – पृष्ठम् (३)

**स्कन्धस्य नामानि** – स्कन्धः (१), भुजशिरः (३), अंसः (५)

**जत्रोः नाम** – जत्रु (३)

**कक्षस्य नाम** – बाहुमूलम् (३), कक्षः (१)

**पार्श्वभागस्य नाम** – पार्श्वः (५)

**अवलग्नस्य नामानि** – मध्यमः (५), अवलग्नः (५), मध्यः (५)

**भुजदण्डस्य नामानि** – भुजः४, बाहु (४), प्रवेष्टः (१), दोः (१)

**कूर्परस्य नामनी** – कफोणिः (४), कूर्परः (४)

**प्रगण्डस्य नाम** – प्रगण्डः (१)

**प्रकोष्ठस्य नाम** – प्रकोष्ठः (१)

**करभस्य नाम** – करभः (१)

**पाणेः नामानि** – पञ्चशाखः (१), शयः (१), पाणिः (१)

**तर्जन्याः नामनी** – तर्जनी (२), प्रदेशिनी (२)

**अङ्गुल्याः नामनी** – अङ्गुली (२), करशाखा (२)

**अङ्गुष्ठानां नामानि** – अङ्गुष्ठः (१), प्रदेशिनी (२), मध्यमा (२), अनामिका (२), कनिष्ठा (२)

**नखस्य नाम** – पुनर्भवः (१), कररुहः (१), नखः (५), नखर (५)

**प्रादेशस्य नाम** – प्रादेशः (१)

**तालस्य नाम** – तालः (१)

**गोकर्णस्य नाम** – गोकर्णः (१)

**वितस्तेः नामनी** – वितस्तिः (४), द्वादशाङ्गुलः (१)

**चपेटस्य नामानि** – चपेटः (१), प्रतलः (१), प्रहस्तः (१)

## अभ्यासः

१. **रुधिरस्य नामानि श्रावयत ।**

२. **तुन्दस्य नामानि वदत ।**

३. **सङ्क्षेपेण उत्तरयत**

(क) मांसस्य नामानि कति सन्ति कानि च तानि ?

(ख) उरसः नामानि कानि ?

(ग) नखस्य कति नामानि सन्ति ?

(घ) हस्तस्य नामानि कानि ?

**४. परस्परं मेलयत**

| | |
|---|---|
| वैद्यः | धमनिः |
| मूर्तः | कपालम् |
| पललम् | चिकित्सकः |
| कर्परः | मूर्च्छितः |
| कुल्यम् | मासंम् |
| नाडी | कीकसम् |

**५. नेपालीभाषायामर्थं लिखत**

निरामयः, पिल्लः, तेजः, मेदः, मलम्, शमलम्, अस्थि, पर्शुका, चपेटः ।

**६. पर्यायान् लिखत**

प्रहस्तः, कूर्परः, स्कन्धः, जठरम्, जानु, कायः, अवयवः, लोहितम्

**७. शरीरस्य सर्वाणि नामानि लिखत ।**

**८. त्वच्-शब्दस्य सर्वाणि रूपाणि लिखत ।**

**९. संस्कृतेऽनुवादं कुरुत**

(क) मानिसको शरीरमा बहत्तर करोड नसाहरू हुन्छन् ।

(ख) चिप्लो मान्छेको भर हुँदैन ।

(ग) आज मेरो कम्मर दुखेको छ।

(घ) उसले मलाई एक लबटो हिर्कायो ।

(ङ) दिनभरिको कामले शरीर गलेको छ ।

# अष्टावक्रः

पुरा कहोडनामकः ऋषिरासीत् । स वेदादीनां शास्त्राणां विद्वानासीत् । तस्य विवाहो तात्कालिकस्य प्रसिद्धस्य महर्षेरुद्दालकस्य पुत्र्या सह अभवत् । तस्या नाम सुजातासीत् । सा च महती विदुषी आसीत् । उभावेव शिक्षितावास्ताम् । अतः परस्परं शास्त्रादीनां विमर्शेन अध्ययनलेखनकार्येण च तौ समयं यापयतः स्म । कालानन्तरं सुजाता गर्भवती जाता ।

कस्मिंश्चित् काले मिथिलाक्षेत्रस्य राजा जनको द्वादशवर्षपर्यन्तं सञ्चाल्यमानं यज्ञमारभत । कहोड एतज्ज्ञातवान् । तस्मिन्नेवावसरे विदुषां शास्त्रार्थचर्चाया आयोजनं च जनकेन विहितम् । तच्च श्रुत्वा शास्त्रार्थचर्चायां भागं ग्रहीतुं कहोड ऐच्छत् । शास्त्रार्थचर्चायां शास्त्राणां विषये विमर्शो भवति स्म । विद्वांसः सभायां बौद्धिकीं प्रतिस्पर्धां कुर्वन्ति स्म । यस्तत्र विजेता भवति स्म स सर्वसम्मान्यः सन् बहुधनं पारितोषिकरूपेण लभते स्म । कथ्यते च, ‘मानो हि महतां धनम्’ इति ।



सम्मानकामी कहोडः पत्न्या सुजातया सह शास्त्रार्थचर्चायां गमनविषये परामर्शमकरोत् । तदा सुजाता गर्भवती आसीत् । गर्भवतीं तां गृहे संस्थाप्य गमने कहोडस्य रुचिर्नासीत् परन्तु राज्ञायोजिते यज्ञे शास्त्रार्थचर्चायाञ्च गमनाय तादृशोऽवसरः पश्चाद् नागच्छेत् । विमर्शानुसारं सुजातां श्वशुरगृहं प्रापयित्वा कहोडो मिथिलानगरं गच्छेदिति तौ निर्णीतवन्तौ । निर्णयानुसारं सुजातामुद्दालकगृहे संरक्ष्य कहोडो जनकस्य प्रासादं प्रति प्रस्थितवान् ।

बहूनि दिनानि व्यतीतानि परन्तु कहोडो न प्रत्यागच्छत् । पतिं प्रतीक्षमाणायाः सुजातायाः कर्णविवरे स तु दिवङ्गत इति खेदध्वनिः प्राविशत् । सा अतीव विक्षिप्ता जाता । मनो भ्रान्तमासीत् । शोककारणेन सा स्वस्या आरोग्यविषये तथा सावधाना भवितुं नाशक्नोत् । तादृश्यामवस्थायां तस्याः पुत्रोऽजायत । स चाष्टावक्र आसीत् । तस्य देहाकृतिं विलोक्य जनास्तमष्टावक्र इति नाम्ना सम्बोधयितुमारभन्त परन्तु शारीरिकं स्वरूपं वीक्ष्य नामकरणस्य कार्यं गर्हितं भवति तथापि सोऽष्टावक्र इति नाम्ना एव परिचितोऽभवत् ।

महर्षिरुद्दालकः स्वनप्तारमष्टावक्रमतीव ध्यानेन अशिक्षयत् । यतो हि विद्यैव गरीयसी भवति । अष्टावक्रो महान् विद्वान् भविष्यति चेत् ससम्मानं जीवनं यापयितुं सक्षमो भविष्यतीति स जानाति स्म । पितामहस्य इच्छानुसारमष्टावक्रो बाल्यादेव अध्ययनलेखनकार्ये महत्परिश्रममकरोत् । तस्य सामर्थ्यमवलोक्य सर्वेऽपि तं मुक्तकण्ठैः प्रशंसन्ति स्म । द्वादश एव वयसि स वेदानामन्येषां शास्त्राणां च ज्ञाता अभवत् ।

अष्टावक्रः पितुः कहोडस्य विषये किमपि न जानाति स्म । स जन्मन आरभ्य एव मातुलगृह आसीत् । मातुः, पितामहस्य, पितामह्याः, मातुलस्य च प्रेम्णा स जीवने पितुरभावं नान्वभवत् । स बहुसमयं पितामहेन सह यापयति स्म, अध्ययनादिषु च रमते स्म । एकस्मिन् दिने मातुलस्य श्वेतकेतुना सह तस्य पितुर्विषये विवादोऽभवत् । ततः स गृहमागत्य मात्रा सह अपृच्छत्, “मम पिता क्वास्ति ?” पुत्रस्य तादृशीं जिज्ञासां दृष्ट्वा माता अकथयत्, “पुत्र ! तव पिता राज्ञो जनकस्य सभायां शास्त्रार्थचर्चायै गत आसीत् परन्तु अद्यपर्यन्तं स प्रत्यागतो नास्ति । एतेन कारणेनाहमतीव चिन्तितास्मि ।”

मातुर्वचनं श्रुत्वा अष्टावक्रोऽवदत्, “मातः ! भवती चिन्तां मा करोतु, अहं श्वः पितरं गृहम् आनेतास्मि ।” पुत्रस्य कथनमाकर्ण्य मातावदत्, “वत्स ! त्वं बालक एवासि । राजसभायां तव प्रवेशस्तथा सम्भवो नास्ति । तत्र तवापमानं च भवितुं शक्नोति, यतः तव शरीरमष्टावक्रमस्ति ।” अष्टावक्रो मातरमाश्वसयनभणत्, “भवती विषादं मा करोतु । अहं यथाशक्ति पितरमन्विष्य आनेष्यामि ।” अष्टावक्रो गृहात् प्रासादं प्रति प्रस्थितवान् ।



अष्टावक्रो राजप्रासादं प्राप्नोत् । तत्र यज्ञसमाप्तेः समय आगच्छनासीत् परन्तु यज्ञः सञ्चाल्यमान आसीत् । अत उत्सवस्य वातावरणमितस्ततः परिलक्ष्यते स्म । यज्ञस्थानं गन्तुं स द्वारं प्रति अगच्छत् परन्तु द्वारपालेन स तत्रैव अवरुद्धः । "यज्ञे तु वयोवृद्धा ज्ञानवृद्धाश्च गन्तुं शक्नुवन्ति न तु बालका" इति द्वारपालोऽकथयत् । अष्टावक्रः प्रत्युदतरत्, "अहं बालकः सन् वेदानामपरेषां शास्त्राणां च वेत्तास्मि । अतो यज्ञस्थले मम गमनं सर्वथोचितं वर्तते ।" तच्छ्रुत्वा द्वारपालोऽन्तर्गत्वा अष्टावक्रस्य विषये कथयित्वा राजानमपृच्छत् । राज्ञ आदेशानुसारमष्टावक्रोऽन्तर्नीतः ।

बाल्ये एव वयसि शास्त्रार्थस्य कृते आगत एष मूर्खोऽस्तीति विचिन्त्य केचित्, केचिच्च अष्टावक्रस्य देहाकृतिं वीक्ष्य तस्य उपहासमकुर्वन् । सभास्था जना उच्चैर्हसितुमारभन्त । अष्टावक्रो निर्भयः सनवदत्, "भवन्तो मम शरीरं दृष्ट्वा किमर्थं हसन्ति भो ? मनुष्यस्य परिचयस्तस्य शरीरेण न अपितु विद्यया भवति । विद्या गरीयसी अस्ति । एतादृशं मूर्खव्यवहारं परित्यज्य मम विद्यायाः परीक्षणं कुर्वन्तु ।" राजा जनकस्तस्य तर्कपूर्णायामभिव्यक्तौ सम्मतिमजनयत् ।

राज्ञ आज्ञानुसारमष्टावक्रोऽन्यैर्विद्वद्भिः सह शास्त्रार्थचर्चायां सन्नद्धोऽभवत् । तत्र स बन्दीनामकं विद्वांसमपि पराजितमकारयत् । पूर्वं बन्दीनामकेन विदुषा सह अष्टावक्रस्य पिता पराजित आसीत् । वाचाबन्धानुसारं कहोडो बन्दीनामकस्य विदुषः पितुर्वरुणस्य गृहे स्थापित आसीत् । स्वविद्याबलेन तं विजित्य स्वपितरमष्टावक्रस्ततो निष्काश्य मात्रा सह कहोडस्य मेलनाय सक्षमोऽभवत् । स पुरस्काररूपेण महद्धनं च प्राप्नोत् । ये पूर्वं तस्य शरीरमवलोक्य उपहासं कुर्वन्ति स्म ते लज्जिताः सन्तस्तस्य प्रशंसां विहितवन्तः, क्षमां च याचितवन्तः ।

## शब्दार्थाः

| | |
|---|---|
| विमर्शेन | छलफलबाट |
| कालानन्तरम् | केही समयपछि |
| प्रतिस्पर्धा | प्रतियोगिता |
| पारितोषिकम् | पुरस्कार |
| सम्मानकामी | सम्मानको कामना गर्ने |
| श्वशुरगृहम् | ससुराली |
| प्रासादः | दरबार |
| खेदध्वनिः | चिन्तायुक्त आवाज |
| वीक्ष्य | देखेर |
| स्वनप्ता | आफ्नो नाति |
| मातुलः | मामा |
| क्व | कहाँ |
| आकर्ण्य | सुनेर |
| विषादः | चिन्ता |
| वयोवृद्धः | उमेरले पाको मानिस |
| ज्ञानवृद्धः | ज्ञानले पाको मानिस |
| सन्नद्धः | तयार |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **एकः छात्रः पाठं पठ, अन्ये च ध्यानपूर्वकं शृणुत ।**

२ **पाठस्य समस्तपदानां शुद्धोच्चारणं कुरुत ।**

३ **पाठस्य प्रथमपृष्ठस्य क्रियापदानां वचनं निर्दिशत ।**

## ४. अधोलिखितानि अव्ययपदयुक्तानि वाक्यानि वदत

गर्भवतीं तां गृहे संस्थाप्य गमने कहोडस्य रुचिर्नासीत् परन्तु राज्ञायोजिते यज्ञे शास्त्रार्थचर्चायाञ्च गमनाय तादृशोऽवसरः पश्चाद् नागच्छेत् । विमर्शानुसारं सुजातां श्वशुरगृहं प्रापयित्वा कहोडो मिथिलानगरं गच्छेदिति तौ निर्णीतवन्तौ । निर्णयानुसारं सुजातामुद्दालकगृहे संरक्ष्य कहोडो जनकस्य प्रासादं प्रति प्रस्थितवान् ।

## ५. पदार्थान् वदत

पुरा, द्वादशवर्षपर्यन्तम्, विमर्शः, प्रतिस्पर्धा, सर्वसम्मान्यः, सम्मानकामी, प्रासादः, विक्षिप्ता, वीक्ष्य, स्वनप्ता, जिज्ञासा, वयोवृद्धाः, ज्ञानवृद्धाः, देहाकृतिः, सम्मतिः, सन्नद्धः, निष्काश्य, उपहासः ।

## ६. प्रातः काले कर्तव्यानि त्रीणि प्रमुखकार्याणि निगदत ।

## ७. मातुः कथनेन पुत्रेण अनुभूतं परिवर्तनं सङ्क्षेपेण वदत ।

# पठनम्

## १. अधस्तनाद् गद्यात् सारवाक्यं निष्काश्य पठत

बाल्ये एव वयसि शास्त्रार्थस्य कृते आगत एष मूर्खोऽस्तीति विचिन्त्य केचित्, केचिच्च अष्टावक्रस्य देहाकृतिं वीक्ष्य तस्य उपहासमकुर्वन् । सभास्था जना उच्चैर्हसितुमारभन्त । अष्टावक्रो निर्भयः सनवदत्, "भवन्तो मम शरीरं दृष्ट्वा किमर्थं हसन्ति भो ? मनुष्यस्य परिचयस्तस्य शरीरेण न अपितु विद्यया भवति । विद्या गरीयसी अस्ति । एतादृशं मूर्खव्यवहारं परित्यज्य मम विद्यायाः परीक्षणं कुर्वन्तु ।" जनकस्तस्य तर्कपूर्णायामभिव्यक्तौ सम्मतिमजनयत् ।

## २. अधोलिखितम् अनुच्छेदं संवादशैल्यां परिवर्त्य पठत

छात्राः श्लोकान्ताक्षरीप्रतियोगिताम् आयोजयितुमिच्छन्ति । ते गुरोरनुमतिं कामयन्ते । गुरुरनुमतिं प्रयच्छति । छात्रा निर्णायकपदम् अलङ्कर्तुं गुरुं निवेदयन्ति । गुरुस्तदपि स्वीकरोति । गुरुः प्रतियोगिनां सङ्ख्याया विषये छात्रान् पृच्छति । छात्राश्च प्रतियोगिनो दश सन्तीति ज्ञापयन्ति । गुरुश्छात्रानभ्यासार्थं प्रेरयति । छात्राश्च गुरुं प्रणम्य गच्छन्ति ।

## ३. अधस्तनगद्यभागस्य सस्वरवाचनं कुरुत

अस्माकं मातृभूमिर्नेपालो वीरवर्यैर्जगति ख्यातनामा वर्तते । तेषामेव वीराणां न्यासरूपोऽयं देशः । ते नेपालस्य नेपालिनां च शत्रुभिः सह कठोरतया अयुध्यन्त । नैपालकवीराणां शौर्यं शक्तिं च विज्ञाय नेपालस्य वैरिणो दूरं पलायितवन्तः । नेपालश्चिराय सुरक्षितोऽभवत् । अस्माभिस्तेषां वीराणां कीर्तिकार्याणि सदैव संस्मरणीयानि । एतदेव तान् प्रत्यस्माकं कृतज्ञता भविष्यति । अधुनापि नेपालो वीरभूमिनाम्ना विदेशेषु प्रसिद्धो वर्तते । नेपालस्य नाम निशम्य वैदेशिकपर्यटका अत्र आगन्तुमिच्छन्ति । एषोऽस्माकं सर्वेषां गौरवस्य विषयोऽस्ति । वयं नेपालिनो भाग्यवन्तः स्म इत्यत्र नास्ति संशयः ।

## ४. अधोलिखितं गद्यभागं पठित्वा उपयुक्तं शीर्षकं दत्त

राज्ञो दशरथस्य चत्वारः पुत्रा आसन् । तेषु रामो ज्येष्ठः पुत्र आसीत् । दशरथो रामस्य यौवराज्यसमारोहम् आयोजयितुं सेवकानादिशत् । समारोहो विशेषेण सज्जीकृतः । तदैव कैकेयी राज्ञो दशरथाद् वरद्वयम् अयाचत, रामस्य वनगमनं भरतस्य राज्याभिषेकश्च । पितुराज्ञया रामो वनमगच्छत् । भरतो रामं प्रत्यावर्तयितुं वनमगच्छत् । रामोऽवदत्, -"अहं पितुः सत्यप्रतिज्ञां पालयामि एव ।" भरतो रामस्य पादुके आनीय प्रत्यावृत्तः । ते एव प्रपूज्य स राज्यं सञ्चालयामास । वनवासं समाप्य रामोऽयोध्यां प्रत्यागच्छत् । भरतो राज्यशासनं समर्प्य हृटोऽभवत् । दशरथपुत्राणां एतादृशी भ्रातृभक्तिरासीत् ।

## ५. पाठस्थकथाया आदिभागम्, मध्यभागम्, अन्त्यभागं च निश्चित्य पठत ।

# लेखनम्

## १. अधोलिखितानि कार्याणि कदा सम्पादयितुम् अधिकमुपयुक्तं भवति ? निर्दिष्टसंरचनायां लिखत

शयनम्, दैनिकभ्रमणम्, भोजनम्, क्रीडनम्, देवार्चनम्, ध्यानम्, वस्त्रप्रक्षालनम्, नाट्यावलोकनम्, गृहकार्य-सम्पादनम्, स्नानम्, नर्तनम्, योगाभ्यासः, दन्तधावनम्, आवश्यकवस्तूनां क्रयणम्, मुखप्रक्षालनम् ।

| प्रातः काले | मध्याह्ने | अपराह्ने | सायम् |
|---|---|---|---|
| .................. | ....... | ............ | .............. |
| .................. | ....... | ............ | .............. |
| .................. | ....... | ............ | .............. |

## २. पर्यायान् लिखत

माता, सखायः, प्रतिदिनम्, उपयुक्तः, अमृतम्, पूर्वम्, मनः, शरीरम्, सर्वाणि, पीयूषम्, जननी, नित्यम्, मित्राणि, उचितः, प्राक्, मानसम्, देशः, सकलानि ।

## ३. पदानि प्रयुज्य वाक्यं रचयत

विद्वान्, सह, महती, अध्ययनलेखनकार्येण, कालानन्तरम्, विहितम्, ग्रहीतुम्, पारितोषिकरूपेण, खेदध्वनिः, शोककारणेन, गर्हितम्, ज्ञाता, जानाति, ततः, अकथयत्, , श्वः, आश्वसयन्, आनेष्यामि, उत्सवस्य, विचिन्त्य, निर्भयः, कुर्वन्तु, विदुषः, याचितवन्तः ।

## ४. असमीचीनकथनं संशोध्य पुनर्लिखत

(क) बालकानां शास्त्रार्थचर्चाया आयोजनं जनकेन विहितम् ।
(ख) मानो हि मूर्खाणां धनम् अस्ति ।
(ग) पत्युः प्रतीक्षायां सुजाता अतीव प्रसन्ना जाता ।
(घ) यतो हि धनमेव गरीयसी भवति ।
(ङ) अष्टावक्रो जन्मन आरभ्य एव स्वगृह आसीत् ।
(च) जनकस्तस्य तर्कपूर्णायामभिव्यक्तौ विमतिमजनयत् ।

## ५. सङ्क्षेपेणोत्तरयत

(क) कहोडस्य विवाहः कया सह अभवत्, विवाहानन्तरं दम्पती कथं समयं यापयतः स्म ?
(ख) कहोडः किं विचिन्त्य मिथिलानगरम् अगच्छत् ?
(ग) अष्टावक्रेण द्वादश वर्षाणि कथं व्यतीतानि ?
(घ) अष्टावक्रः किमर्थं पितुरन्वेषणमकरोत् ?
(ङ) अष्टावक्रो राजसभायां किमकरोत् ?
(च) कहोडस्य सुजातया सह कथं मेलनमभवत् ?

६. **आशयं स्फुटीकुरुत**

(क) मानो हि महतां धनम् ।

(ख) यतो हि विद्यैव गरीयसी भवति ।

७. **निर्देशानुसारेण वाक्यपरिवर्तनं कुरुत**

(क) सखी क्रीडितुम् इच्छति । (बहुवचने)

(ख) माता पुत्रं निर्दिशति । (लङ्लकारे)

(ग) गुरवः प्रवचनं कुर्वन्ति । (द्विवचने)

(घ) एषा बालिका नृत्यति । (पुंलिङ्गे)

(ङ) सुन्दराणि पुष्पाणि मनो हरन्ति । (एकवचने)

(च) गावो दुग्धं ददति । (लृट्लकारे)

(छ) माता जलम् आनयति । (कर्मवाच्ये)

(ज) मया पाठः पाठ्यते । (कर्तृवाच्ये)

८. **अधो रेखाङ्कितानां पदानां विभक्तिं लिखत**

(क) नगराद् बहिः शान्तिर्वर्तते ।

(ख) धनी अनाथाय भोजनं ददाति ।

(ग) कूपे मत्स्या निवसन्ति ।

(घ) एकलव्यो गुरवे दक्षिणामददात् ।

(ङ) मम मित्रं मनसा पवित्रं वर्तते ।

(च) नेतारो मञ्चे वसन्ति ।

(छ) पुराणेषु नीतिकथाः प्राप्यन्ते ।

(ज) वयं नेत्राभ्यां पश्यामः ।

(झ) विद्या विवादाय न भवतु ।

(ञ) आत्मनः प्रतिकूलानि परेषामपि प्रतिकूलानि एव भवन्ति ।

९. **पाठस्यानुसारेण अष्टावक्रस्य विशेषताः लिखत ।**

**१०. गार्हस्थवस्तूनां प्रयोगानन्तरं यथास्थानं स्थापनस्य विषये मातृपुत्र्योः सङ्क्षिप्तं संवादं लिखत ।**

### अनुप्रयोगः

**१. अधोलिखितानि पदानि प्रयुज्य बालिकाद्वयस्य दशवाक्यानां संवादं लिखत**

नीते ! रमे ! कुत्र गच्छसि, अभिवादनम्, वाटिकायां जलसेचनाय, पुष्पाणि, कदा विकसन्ति ?, शीघ्रम्, त्वम्, किं करोषि ? उत्तरपुस्तिकानां परीक्षणम्, सुन्दरं लेखनमस्ति, अधिकपरिश्रमः आवश्यकः, आवां कथयिष्यावः ।

**२. प्रातरुत्थानादारभ्य भोजनावसरं यावत् प्रतिदिनं क्रियमाणानां कार्याणां सूचीं निर्माय शिक्षकं दर्शयत ।**

**३. परिश्रमस्य महत्त्वं वर्णयित्वा मित्रं प्रति पत्रं लिखत ।**

## व्याकरणबोधः

**१. रूपाणि पठत**

**धातृशब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धाता | धातारौ | धातारः |
| द्वितीया | धातारम् | धातारौ | धातृन् |
| तृतीया | धात्रा | धातृभ्याम् | धातृभिः |
| चतुर्थी | धात्रे | धातृभ्याम् | धातृभ्यः |
| पञ्चमी | धातुः | धातृभ्याम् | धातृभ्यः |
| षष्ठी | धातुः | धात्रोः | धातृणाम् |
| सप्तमी | धातरि | धात्रोः | धातृषु |
| सम्बोधनम् | हे धातः ! | हे धातारौ ! | हे धातारः ! |

**पितृ शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः ! | हे पितरौ ! | हे पितरः ! |

२. **कर्तृ–वक्तृ– होतृशब्दानां रूपावलीं लिखत ।**

३. **सङ्केतस्यानुसारेण रिक्तस्थाने रूपाणि लिखत**

(क) भ्रातृ - चतुर्थी - बहुवचनम् ...................

(ख) भर्तृ - द्वितीया - द्विवचनम् ...................

(ग) जामातृ - षष्ठी - द्विवचनम् ...................

(घ) विधातृ - सप्तमी - बहुवचनम् ...................

(ङ) श्रोतृ - पञ्चमी - एकवचनम् ...................

(च) मातृ - सम्बोधन- एकवचनम् ...................

४. **ध्यानेन पठत**

शब्दकोशेषु शब्दानां व्युत्पत्तिः, पर्यायपदानि, प्रयोगसन्दर्भश्च प्रदर्शिता भवन्ति । तत्र पदानां स्थापनं वर्णानुक्रमानुसारेण क्रियते । पूर्वं स्वरवर्णानां क्रमो भवति चेत् पश्चाद् व्यञ्जनवर्णानां क्रमो भवति ।

उदाहरणम् -

हरिः, सुधा, अमृतम्, गृहम्, ईश्वरः ।

एतेषां पदानां वर्णानुक्रमानुसारेण स्थापनं निम्नरीत्या भवति -

अमृतम्, ईश्वरः, गृहम्, सुधा, हरिः ।

शब्दकोशेषु पदानामन्वेषणं वर्णानुक्रमानुसारेण कर्तव्यम् ।

अधस्तनानि पदानि वर्णानुक्रमानुसारेण लिखत

(क) ऋषिः, विवाहः, उभौ, परस्परम्, राजा, विजेता ।

(ख) गर्भवती, गृहम्, यज्ञः, दिनम्, इति, नाम ।

(ग) एव, अतीव, जीवनम्, ज्ञाता, मातुलः, तादृशी ।

(घ) अद्य, चिन्ता, श्वः, अपमानम्, उत्सवः, बालकः ।

(ङ) बाल्यम्, शरीरे, परीक्षणम्, आज्ञा, पिता, निष्काश्य, लज्जितः ।

## कोषानुशीलनम्

### मनुष्यवर्गः

**द्वौ संहतौ संहतलप्रतलौ वामदक्षिणौ । पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान् ॥**

**प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया । स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥**

**व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् । ऊर्ध्वविस्तृतदोः पाणिनृमाने पौरुषं त्रिषु ॥**

**कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि । कम्बुग्रीवा त्रिरेखा सावटुर्घाटा कृकाटिका ॥**

**वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् । क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥**

**ओष्ठाधरौ तु रदनच्छदौ दशनवाससी । अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परा हनुः ॥**

**रदना दशना दन्ता रदास्तालु तु काकुदम् । रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्किणी ॥**

**ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ । कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका ॥**

**लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । दृग्दृष्टी चास्त्रु नेत्राम्बु रोदनं चास्रमश्रु च ॥**

अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने । कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥

उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् । चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥

तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः । ते ललाटे भ्रमरकाः काकपक्षः शिखण्डकः ॥

कबरी केशवेशोऽथ धम्मिल्लः संयताः कचाः । शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा ॥

वेणी प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे । पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥

तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुम्मुखे । आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥

दशैते त्रिष्वलङ्कर्तालङ्करिष्णुश्च मण्डितः । प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः ॥

विभ्राड्भ्राजिष्णुरोचिष्णू भूषणं स्यादलङ्क्रिया । अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ॥

मण्डनं चाथ मुकुटं किरीटं पुन्नपुंसकम् । चूडामणिः शिरोरत्नं तरलो हारमध्यमगः ॥

वालपाश्या पारितथ्या पत्रपाश्या ललाटिका । कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनम् ॥

ग्रैवेयकं कण्ठभूषा लम्बनं स्याल्ललन्तिका । स्वर्णैः प्रालम्बिकाथोरः सूत्रिका मौक्तिकैः कृता ॥

हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टिका । हारभेदा यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः ॥

अर्धहारो माणवक एकावल्येकयष्टिका । सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥

आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् । केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिका ॥

साक्षराङ्गुलिमुद्रा स्यात्कङ्कणं करभूषणम् । स्त्रीकट्यां मेखला काञ्ची सप्तमी रशना तथा ॥

क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिषु । पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥

हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका । त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥

वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् । कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजम् ॥

अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे । तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥

पत्रोर्णं धौतकौशेयं बहुमूल्यं महाधनम् । क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु ॥

स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः । दैर्घ्यमायाम आरोहः परिणाहो विशालता ॥

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**प्रतलस्य नामनी** – संहतलः १, प्रतलः १

**प्रसृतेः नाम** – प्रसृतिः २,

**अञ्जलेर्नाम** – अञ्जलिः १

**हस्तैकपरिमाणस्य नाम** – हस्तः १,

**रत्नेः नाम** – रत्नि ४,

**अरत्नेः नाम** – अरत्नि ४,

**पौरुषस्य नाम** – पौरुषः७,

**कण्ठस्य नामानि** – कण्ठः ७, गलः १,

**ग्रीवायाः नामानि** – ग्रीवा २, शिरोधिः २, कन्धरा २

**कम्बुग्रीवायाः नाम** – कम्बुग्रीवा २,

**घटाया नामानि** – अवटु १, घटा २, कृकाटिका २

**परिमाणस्य नाम** – व्यामः १

**मुखस्य नामानि** – वक्त्रम् ३, आस्यम् ३, वदनम् ३, तुण्डम् ३, आननम् ३, लपनम् ३, मुखम् ३

**नासिकायाः नामानि** – घ्राणम् ३, गन्धवहा २, घोणा २, नासा २, नासिका २

**ओष्ठस्य नामानि** – ओष्ठः १, अधरः १, रदनच्छदः १, दशनवासः ३,

**चिबुकस्य नाम** – चिबुकम् ३,

**कपोलस्य नामनी** – गण्डः १, कपोलः १,

**हनोः नाम** – हनु १,

**दन्तस्य नामानि** – रदनः १, दशनः १, दन्तः १, रदः १

**काकुदस्य नामनी** – तालु ३, काकुदम् ३,

**रसनायाः नामानि** – रसज्ञा २, रसना २, जिह्वा २,

**अक्षिणः नाम** – सृक्किणी ३,

**ललाटस्य नामानि** – ललाटम् ३, अलिकम् ३, गोधिः १,

**भ्रुवो नाम** – भ्रूः २,

**कूर्चस्य नाम** – कूर्चः ५,

**तारकायाः नामनी** – तारका २, कनीनिका २

**नेत्रस्य नामानि** – लोचनम् ३, नयनम् ३, नेत्रम् ३, ईक्षणम् ३, चक्षुः ३, अक्षि ३, दृश् २, दृष्टिः २,

**रोदनस्य नामानि** – अश्रु ३, नेत्राम्बु ३, रोदनम् ३, अस्रम् ३, अश्रु ३,

**अपाङ्गस्य नाम** – **अपाङ्गः** १

**कटाक्षस्य नामनी** – कटाक्षः १, अपाङ्गदर्शनम् ३,

**कर्णस्य नामानि** – कर्णः १, शब्दग्रहः १, श्रोत्रम् ३, श्रुतिः २, श्रवणम् १, श्रवः ३,

**शिरसः नामानि** – उत्तमाङ्गम् ३, शिरः ३, शीर्षम् ३, मूर्धा १, मस्तकम् ५,

**केशानां नामानि** – चिकुरः १, कुन्तलः १, बालः १, कचः १, केशः १, शिरोरुहः १,

**केशानां समूहस्य नामनी** – कैशिकम् ३, कैश्यम् ३,

**अलकस्य नामनी** – अलकः १, चूर्णकुन्तलः १,

**भ्रमरकस्य नाम** – भ्रमरकः १,

**काकपक्षस्य नामनी** – काकपक्षः १, शिखण्डकः १

**केशवेशस्य नामनी** – कबरी २, केशवेशः १

**धम्मिल्लस्य नाम** – धम्मिल्लः १

**शिखाया नामानि** – शिखा २, चूडा २, केशपाशी २

**जटायाः नामनी** – सटा २, जटा २

**वेण्याः नामनी** – वेणी २, प्रवेणी २

**निर्मलकेशस्य नाम** – शीर्षण्यः १. शिरस्यः १

**(केशवाचकशब्दात् परः पाश-पक्ष-हस्त-शब्देषु सत्सु केशवेशार्थः अवगम्यते ।)**

**रोम्णः नामानि** – तनूरुहम् ३, रोमन् ३, लोमन् ३

**श्मश्रूणां नाम** – श्मश्रु ३

**वेषस्य नामानि** – आकल्पः १, वेषः १, नेपथ्यम् ३, प्रतिकर्मन् ३, प्रसाधनम् ३

**अलङ्करिष्णोर्नामनी** – अलङ्कर्ता ७, अलङ्करिष्णु ७

**प्रसाधितस्य नामानि** – मण्डितः७, प्रसाधितः ७, अलङ्कृतः ७, भूषितः ७, परिष्कृतः

**भूषणैर्भूषितस्य नामानि** – विभ्राज् ७, भ्राजिष्णु ७, रोचिष्णु ७

**अलङ्क्रियायाः नामनी** – भूषा २, अलङ्क्रिया २

**अलङ्कारस्य नामानि** – अलङ्कारः १. आभरणम् ३, परिष्कारः १, विभूषणम् ३, मण्डनम् ३

**मुकुटस्य नामनी** – मुकुटम् ३, किरीटः ५

**शिरोरत्नस्य नामनी** – चूडामणिः १, शिरोरत्नम् ३

**तरलस्य नाम** – तरलः १

**बालपाश्याः नामनी** – बालपाश्या २, पारितथ्या २

**ललाटिकायाः नामनी** – पत्रपाश्या २, ललाटिका २,

**कर्णिकायाः नामनी** – कर्णिका २,, तालपत्रम् ३,

**कुण्डलस्य नामनी** – कुण्डलम् ३, कर्णवेष्टनम् ३

**ग्रैवेयकस्य नामनी** – ग्रैवेयकम् ३, कण्ठभूषा २

**लम्बनस्य नामनी** – लम्बनम् ३, ललन्तिका २

**सुवर्णलम्बनस्य नाम** – प्रालम्बिका २

**लम्बनमौक्तिकहारस्य नामनी** – उरः३ , सूत्रिका २

**मुक्तावल्याः नामनी** – हारः १, मुक्तावली २

**देवच्छन्दस्य नाम** – देवच्छन्दः १

**हारविशेषाणां नामानि** – गुत्सः १, गुत्सार्धः १, गोस्तनः १, अर्धहारः १, माणवकः १, एकावली २

**नक्षत्रमालायाः नाम** – नक्षत्रमाला २

**कटकस्य नाम** – आवापकः १, पारिहार्यः १, कटकः ५, वलयः ५

**केयूरस्य नामनी** – केयूरः ५, अङ्गदः ५

**अङ्गुलीयकस्य नामनी** – अङ्गुलीयकः ५, ऊर्मिका २

**मुद्राङ्किताङ्गुलीयकं नाम** – अङ्गुलिमुद्रा २

**कङ्कणस्य नामनी** – कङ्कणम् ३, करभूषणम् ३

**मेखलाया नामानि** – मेखला २, काञ्ची २, सप्तकी २, रशना २, सारसन ३

**पुरुषस्य शृ□लस्य नाम** – शृङ्खलम् ७,

**मञ्जीरस्य नामानि** – पादाङ्गदम् ३, तुलाकोटिः १, मञ्जीरः ५, नूपुरः५

**हंसकस्य नामनी** – हंसकः १, पादकटकः १

**किङ्किण्याः नामनी** – किङ्किणी २, क्षुद्रघण्टिका २

**वस्त्रयोनेः नाम** – वस्त्रयोनिः ४,

**वाल्कस्य नाम** – वाल्कः ७,

**फालस्य नाम** – फालः ७, कार्पासः७, बादरः ७

**कौशेयस्य नाम** – कौशेयः ७,

**राङ्कवस्य नाम** – राङ्कवः ७

**तन्त्रकस्य नामानि** – अनाहतः ७, निष्प्रवाणिः ७, तन्त्रकः ७, नवाम्बरः ३

**उद्गमनीयस्य नाम** – उद्गमनीयम् ३

**पत्रोर्णस्य नामनी** – पत्रोर्णम् ३. धौतकौशेयम् ३

**महाधनस्य नाम** – बहुमूल्यम् ३, महाधनम् ३

**पट्टवस्त्रस्य नामनी** – क्षौमः ५, दुकूलम् ३

**निवीतस्य नामनी** – निवीतः ७, प्रावृतः ७

**वस्त्रस्य वस्तेः नामनी** – दशा ४, वस्तिः ४

**आयामस्य नामानि** – दैर्घ्यम् ३, आयामः १, आरोहः १

**परिणाहस्य नामनी** – परिणाहः १, विशालता २

## अभ्यासः

१. **केशस्य नामानि श्रावयत ।**

२. **कर्णस्य नामानि वदत ।**

३. **सङ्क्षेपेण उत्तरयत**

(क) रोम्णः नामानि कति सन्ति कानि च तानि ? (ख) नेत्रस्य नामानि कानि ?

(ग) नासिकायाः कति नामानि सन्ति ? (घ) अलङ्कारस्य नामानि कानि ?

**४. परस्परं मेलयत**

| | |
|---|---|
| दशनः | चूडा |
| रसना | सटा |
| ललाटः | जिह्वा |
| शीर्षम् | दन्तः |
| शिखा | अलिकः |
| जटा | मूर्धा |

**५. नेपालीभाषायामर्थं लिखत**

दुकूलम्, पादाङ्गदम्, शृङ्खलम्, किरीटम्, नेत्राम्बु, अधरः, चिबुकम्, गण्डः ।

**६. पर्यायान् लिखत**

कण्ठः, घटा, काकुदम्, श्रुतिः, कबरी, लोम, बालः ईक्षणम्, आस्यम्, वेषः ।

**७. मुखस्य सर्वाणि नामानि लिखत ।**

**८. शिरस्-शब्दस्य सर्वाणि रूपाणि लिखत ।**

**९. संस्कृतेऽनुवादं कुरुत**

(क) मानिसका ३२ ओटा दाँत हुन्छन् ।

(ख) आज कपाल काट्नुपर्ने छ ।

(ग) भाउजूले पाउजु लगाउनुभयो ।

(घ) भाइ सिक्री चाहियो भन्छ ।

(ङ) म राम्ररी आँखा देख्दिनँ ।

(च) यो कोठाको लम्बाइ कति छ ?

## त्रयोदशः पाठः

# विज्ञानमभिशापो वरदानं वा

(अद्य रविवासरः । अतस्तनहुँजनपदस्य पाणिनिसंस्कृतविद्यालयेऽतिरिक्तक्रियाकलापान्तर्गता वादविवादस्पर्धा ध्वजापताकाभिः सुशोभिते सभामण्डपे समायोजितास्ति । मण्डपस्य पृष्ठभागे वादविवादस्पर्धा इति लिखिता वर्तते । अष्टमकक्षायामधीयानौ विद्यार्थिनौ प्रतियोगित्वेन अन्ये शिक्षार्थिनश्च श्रोतृत्वेन यथास्थानं समुपविष्टा दृश्यन्ते । सभाध्यक्षरूपेण गुरुकुलस्य प्रधानाध्यापिका प्रमुखातिथिरूपेण विद्यालयस्य व्यवस्थापकस्तथा निमन्त्रितो शिक्षकातिथिगणश्च गृहीतासनो वर्तते । विद्यार्थिषु एव अवचितस्त्रिसदस्यीयो निर्णायक एक समयपालकश्च सभामण्डपस्य वामकोणे उपविष्टः । कार्यक्रमस्य सञ्चालनं देवेन्द्रशर्मा कुर्वन् वर्तते ।)




**कार्यक्रमसञ्चालकः**

सभापतिमहोदयाः, कार्यक्रमस्य प्रमुखातिथयः, अतिथिगण, गुरुवर्ग, निर्णायकाः, अग्रजाः अनुजाः, सहपाठिनः सखायश्च । अत्र विद्यालये 'विज्ञानमभिशापो वरदानं वा' इति विषयसम्बद्धा

प्रतियोगितात्मिका वादविवादस्पर्धा समायोजितास्तीति सर्वैरत्रभवद्भिर्ज्ञातमेव । निर्दिष्टविषयस्य पक्षतस्तारासुवेदी विपक्षतो हेमाङ्गकँडेलः तर्कपूर्णान् स्वविचारान् प्रस्तोष्यमाणौ वर्तेते । तत्पूर्वमहं प्रतियोगितासम्बन्धिनः काँश्चन नियमान् श्रावयितुं कामये ।

(क) प्रतियोगिने पञ्चकलायुतकालः प्रदीयते । तत्पूर्वं वक्तव्यस्योपसंहाराय सङ्केतध्वनिः श्राव्यते । समयसमाप्तिसूचकेऽन्तिमे ध्वनौ ध्वनिते सति प्रतियोगिना स्ववक्तव्यमुपसंहर्तव्यम् ।

(ख) प्रतियोगिना स्वमतानि शिष्टभाषायां प्रस्तोतव्यानि ।

(ग) केषुचिदपि व्यक्तिजातिवर्गलिङ्गसम्प्रदायादिषु लक्षितः कोऽप्याक्षेपो मन्तव्ये वर्जनीयः ।

(घ) कमपि दृश्यं पाठ्यं वा साधनं निरीक्ष्य वक्तुं निषिद्धमस्ति ।

(ङ) निर्णायकानां निर्णयः सर्वस्वीकार्यो भविष्यति ।

श्रद्धेयाः सभाध्यक्षाः, विज्ञानस्योपकारेण साम्प्रतिको मानवसमाजो बहूपकृतोऽस्ति । वैज्ञानिकमुपकरणं विना मानवीयजीवनस्य सर्वश्रेष्ठता कल्पयितुमपि न शक्यते चेद् विज्ञानजानि आणविकानि शस्त्रास्त्राणि मानवसमुदायमेव न, समग्रं जगत् विनष्टुं समर्थानीति तेषां विनाशकं रूपं नितान्तं भयावहं दरीदृश्यते । अतोऽस्मिन्नेव विषये स्वविचारान् प्रदर्शयितुमस्माकं प्रतियोगिनौ सज्जौ स्तः । प्रथमं तावदहं विज्ञानं वरदानं नाभिशाप इति पक्षे स्वविचारान् प्रस्तोतुं छात्रां तारासुवेदीं निमन्त्रयामि । (तारा सुवेदी सभामण्डपं समागत्य वक्तुं प्रारभते ।)

## तारा सुवेदी

सभापतिमहोदयाः, कार्यक्रमस्य प्रमुखातिथयः, अतिथिगण, निर्णायकाः, गुरुवर्ग, अग्रजाः, अनुजाः, सहपाठिनः सखायश्च । समायोजितेऽस्मिन् प्रतिस्पर्धात्मके वादविवादकार्यक्रमेऽहं पक्षतो विज्ञानं वरदानमिति विषये मामकान् विचारान् प्रस्तोतुं समुपस्थिताऽस्मि । कार्ये सारल्यं भवेत्; जीवनं च सुखमयं स्यात् इति सर्वे मानवा वाञ्छन्ति । मानवीयामियं स्पृहां पूरयितुं विज्ञानं नितरां क्षमं वर्तते । साम्प्रतिकं मानवजीवनं सरलं सुखदं सौविध्यपूर्णं चास्तीत्यत्र विज्ञानमेव हेतुः । शास्त्रेषु वर्णितः कल्पवृक्ष इव विज्ञानं साम्प्रतं मानवैरिच्छितान् सर्वान् मनोरथान् पूरयितुं शक्नोतीति मे विचारः । सर्वं दातुं समर्थं विज्ञानं नूनं मानवोन्नतये समृद्धये विकासाय सुखाय च भवति चेदिदं मानवानां कृते नूनं वरदानमेव ।

सभाध्यक्षाः, अहं यदा कदा अस्मत्सखिमुखतः शृणोमि यत् साम्प्रतं विज्ञानं विनाशाय समुद्यतमिति । इत्येव न, वर्तमानं जगत् वैज्ञानिकेन कर्मणा विनाशोन्मुखञ्च जातमिति च

विज्ञानविरोधिनस्तर्कयन्ति । तेषां मतवैकल्यं दृष्ट्वा अहं विस्मिता भवामि । पाषाणकालाद् एव मानवसमुदायो विज्ञानपक्षपाती दृश्यते । यदि विज्ञानं विनाशं निमन्त्रयति चेत् जीवनप्रियो मानवः कथं तदाश्रयतां गतः ? कदाचिन्मानवः पारावारमुल्लङ्घयितुमक्षमः सन् तटमवस्थाय दूरात्तं पश्यति स्म । स एव मानव इदानीं महत् नौकाविमानमारुह्य तत्र सामोदं विहरति; अन्तरिक्षयाने आरूढो भूत्वा अन्तरिक्षं प्राप्नोति; सङ्गणकमोबाइलाद्युपकरणमाध्यमेन स्वसन्देशं झटित्यन्यत्र प्रेषयति; दूरस्थेन स्वजनेन सह दृश्यवार्तां करोति । परम्परातः श्रमबलेन विहितानि कर्माणि यन्त्रैः सम्पादयति । एतत् सर्वं सौविध्यं विज्ञानस्य वरदानं नोच्यते चेत् वयं कृतघ्ना भवेम ।

सभ्याः ! अस्माकं वेशभूषासंस्कृतिकलासाहित्यादिक्षेत्रेष्वपि विज्ञानस्य प्रत्यक्षं प्रभावोऽनुभूयते । यन्त्रमानवस्याऽऽविष्कारेण तु मानवस्य कृते दुःशकं कार्यमेव नावशिष्टम् । विपन्नतातः सम्पन्नतां प्रति, अन्धकारतो ज्योतिर्मयीं वर्तनीं प्रति मानवजीवनं प्रापयद् विज्ञानं रोगाणां सहेतुकं तथ्यमन्विष्य तन्निवारणाय भेषजानि निर्माति । प्राणघातिनां रोगाणां दुष्प्रभावेण मृत्यून्मुखेभ्यो जनेभ्यः पुनर्जीवनं ददद् विज्ञानं कथं विनाशकं भवितुं शक्नुयात् ?

मानवसभ्यतायाः विकासक्रमे मानवजीवनं पशुवदसंस्कृतमासीत् किन्त्वधुना विज्ञानबलेन मानवसमाजः समुन्नतसभ्यतायाः शिखरं प्राप्तो वर्तते । मानवजीवनं सुखि सुविधासम्पन्नं चास्ति । महत्याकाशे वायुयानं समारुह्य जनाः पक्षिवदुड्डीयमानाः सन्ति । महासागरस्य जलप्रवाहे जलगर्भे च मीनवद् विहरन्ति । तीव्रगामि स्थलयानं उषित्वा क्षणेन स्थानात् स्थानान्तरं प्राप्नुवन्ति । सत्यमुच्यते चेद् विज्ञानमङ्गीकृत्य मानवैर्जलस्थलनभःसु विजयः प्राप्तः । एतत् सर्वं सन्दृश्य परिज्ञायाऽनुभूय च विज्ञानमभिशाप इति विमूढोऽपि वक्तुं न शक्नोति । सभाध्यक्षाः, शिक्षास्वास्थ्यकृषिवाणिज्योद्योगयातायातसञ्चारादिक्षेत्रेषु दृश्यमानं परिवर्तनं विज्ञानद्वारैव सम्भवं जातम् । अतो विज्ञानं मानवजीवनस्य महत्त्वपूणमङ्गीभूतमस्तीत्यहं निःसङ्कोचं विज्ञानं वरदानमिति ब्रवीमि । (सङ्केतध्वनिः श्रूयते)

वैज्ञानिकाविष्काराणां कैश्चित् शक्त्यन्धैर्लुण्ठकैरपराधिभिर्वा मानवस्य तत्समुदायस्य च रक्षायै निर्मितानां शस्त्रास्त्राणां दुरुपयोगं विधाय जगति सन्त्रासः उद्भावितो दृश्यते किन्त्वत्र तदुरुपयोक्तार एव दोषभाजो न विज्ञानम् । विज्ञानं तु सर्वेषां सुखत्वं समिच्छत् कार्यसहयोगीनि नैकविधान्युपकरणान्याविष्करोति; जनानां नैरोग्यं दीर्घायुष्यं च कामयमान औषधानि निर्माति । जगद्धितमेव विज्ञानस्य लक्ष्यं वर्तते । अतो विज्ञानं मानवानां कृते वरदानमेव इति कथयन्ती स्वविचारानुपससंहरामि । धन्यवादाः । (करलतध्वनिः श्रूयते)

**कार्यक्रमसञ्चालकः**

इतो निर्दिष्टविषयस्य विपक्षे स्वमतानि पुरस्कर्तुं हेमाङ्गकँडेलमिह आह्वयामि ।

**हेमाङ्गकँडेलः**

श्रद्धेयाः सभाध्यक्षाः, प्रमुखातिथयः, अतिथिवर्ग, निर्णायकसमूह, गुरुजनाः, सखायः, श्रोतारश्च ।

समायोजितेऽस्मिन् वादविवादकार्यक्रमेऽहं विपक्षतो विज्ञानं न वरदानमपितु अभिशाप एवेति विषये स्वविचारान् पुरस्कर्तुं समागतो वर्ते । अस्मिन् सभामण्डपं समागत्य पूर्वमित्रेण विज्ञानस्य माहात्म्यं यद् वर्णितं तत्र मम विमतिर्वर्तते । विज्ञानेन नूनं मानवीयजीवने सौविध्यं वर्धितम्; रोगनिवारकाणि भेषजानि समुत्पादितानि; कृषिवाणिज्यसञ्चारशिक्षादिक्षेत्राणां कायाकल्पो विहितः; मानवसमाजे च परिवर्तनमानीतम् । अनेनैव कर्मणा विज्ञानं वरदानमिति निश्चेतुं न शक्यते । यथा पयोमुखो विषकुम्भ उपेक्षणीयो भवति तथैव विज्ञानं मानवानां कृतेऽभिशाप एव वर्तते ।

पूर्वमित्रवद् विज्ञानपक्षपातिभिः सर्वैः शस्त्रास्त्राणां निर्माणं रक्षार्थमिति भण्यते किन्तु अपरजनेषु अपरदेशेषु च प्रभुत्वकामनया एतेषामाविष्कारो विहित इति सर्वैर्हस्तामलकवद् ज्ञातचरमेव । विज्ञानेन चिकित्सापद्धतौ सरलता विश्वसनीयता चानीता; अमोघौषधयश्च अन्वेषिता इति कथ्यते किन्तु एकस्य रोगस्य निवारणाय सेविता ओषधयोऽपरान् रोगान् प्रकटयन्ति । परिणामतः साम्प्रतिका रोगिण आजीवनं रोगमुक्ता न जायन्ते । अतो विज्ञानं कथं वरदानं मन्तुं शक्यते ?

सभापतिमहोदयाः, अहं तु वैज्ञानिकचमत्कृतिषु प्रच्छन्नं विकरालं रूपं पश्यामि । समग्रं जगद् आणविकयुद्धभयेन परित्रस्तं पश्यामि । अस्मदीये आकाशे युद्धविमानानि उड्डीयमानानि सन्ति चेत् तत्र मानवीयं जीवनं कथं सुरक्षितं भवेत् ? वारद्वयं विश्वयुद्धमभूत् । तत्र नागासाकित्यादीनि नगराणि धूलिसादभवन्; कोटिशो जनाश्चाकाले मृताः । तत्र वैज्ञानिकानि शस्त्रास्त्राणि तज्जन्यो मानवीयाभिमानश्च मुख्यं कारणम् । यन्त्रमानवस्याऽऽविष्कार उत्कृष्टतरं विज्ञानस्य योगदानमिति च अत्राहमाकर्णयम् । अत्र मे विमतिर्वर्तते । यतो हि तस्याऽऽविष्कारेणाऽसङ्ख्येया जनाः श्रमविहीना जाताः । तेषामाजीविकाऽपहृता । यो यन्त्रमानवो जनान् हीनश्रमान् विधाय हृतजीविकान् कारयति तस्याऽऽविष्कारो मानवानां कृते योगदानं भवितुं न शक्नोति । एतत् सर्वं विज्ञाय पुनः विज्ञानस्य माहात्म्यगानं विवेकिनां न शोभते किल । सखायः, विज्ञानमोहमुग्धं नगरं विलोक्यते चेत्तत्र मानवता शून्यतां गता प्राप्यते । विज्ञानस्य प्रभावेण मानवता,

मानवोचितभावना, मानवीयव्यवहारः, धर्मः, नैतिकाचारः, प्राकृतिकी स्वच्छता च इदानीं नष्टप्राया वर्तते । मानवता मानवादेव भीता सुदूरं गता । यत्र आदर्शा मानवाचारा न प्राप्यन्ते तत्र मानवजीवनमपि सुखदं भवितुं न शक्नोति । इदानीं जगति शान्तिर्न विद्यते । युद्धस्य वार्ता श्रूयते दृश्यते च । विश्वस्याऽधिकतमेषु महानगरेषु प्रदूषितेन पर्यावरणेन जना व्याकुलाः सन्ति । जलस्थलव्योमगामिनां यातायातसाधनानां दुर्घटना वृद्धिङ्गताः श्रूयन्ते । कोरोनासदृशस्य प्राणघातिनो रोगस्य प्रकोपो यथावद् वर्तते । एतेषामुपद्रवाणां हेतुभूतं विज्ञानमपिशाप इति कथने नातिशयोक्तिर्न च पूर्वाग्रहः । (सङ्केतध्वनिः श्रूयते)

सभाध्यक्षाः, यथान्नकणानि दृष्ट्वा मुग्धाः पक्षिणो व्याधस्य जालपाशे बध्यन्ते तथैव विकासं सुखं सौविध्यं च दृष्ट्वा तत्राकृष्टा मानवजातिरिदानीं विज्ञानस्य विकटगर्ते पतन्ती विलोक्यते । अत्र भौतिकविकासाय वनानि विनष्टानि । परिणामतो जलवायुभूम्यादिप्रदूषणमभवत्; प्राकृतिकं जीवनं पलायितम्; हृदयश्वासादिसम्बन्धिनो रोगा उद्भाविताः । शनैः शनैरस्माकं संस्कृतिः सभ्यता, आर्षपरम्परा, लोककल्याणकारिणी भावना, क्षमा, दया चेत्यादय आदर्शगुणाः क्षयं गताः । अहं जानाम्येव, विज्ञानं स्वभावतो विनाशधर्मि नास्ति किन्तु तस्य प्रयोग इदानीं स्वार्थसिद्धये, विनाशाय प्रभुत्वसम्पादनाय च विधीयमानोऽस्ति । अतः एतदभिशाप एवेति स्वमतमुपसंहरामि । धन्यवादाः (करलतध्वनिः श्रूयते)

### कार्यक्रमसञ्चालकः

कार्यक्रमे प्रतियोगिविद्यार्थिनोर्वक्तव्यं समाप्तम् । इतो निर्णायकानां निर्णयात् पूर्वमतिथयः स्वविचारान् पुरस्कुर्वन्ति । ततः पुरस्कारवितरणं विधाय सभाध्यक्षैः कार्यक्रमस्य समापनं विधीयते । अहं तु मञ्चास्मात् अवकाशं गृह्णामि । धन्यवादाः ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| उपविष्टः | बसेका | प्रस्तोष्यमाणौ | प्रस्तुत गर्न लागेका |
| सङ्केतध्वनिः | जनाउ घन्टी | बहूपकृतः | धेरै उपकार गरेको |
| विज्ञानजानि | विज्ञानले बनाएका | सज्जौ | तयार |
| स्पृहाम् | इच्छा | मतवैकल्यम् | कमजोर विचार भएका |
| वर्तनीम् | मार्ग | मृत्यून्मुखेभ्यः | मरणासन्न |

| | | | |
|---|---|---|---|
| जलगर्भे | पानीको भित्री भाग | शक्त्यन्धैः | शक्तिले अन्धा भएका |
| लुण्ठकैः | तस्करद्वारा | दोषभाजः | दोषी |
| कायाकल्पः | आमूल परिवर्तन | अमोघौषधयः | खेर नजाने औषधि |
| प्रच्छन्नम् | लुकेको | धूलिसाद् | माटोमा मिलाएको |
| हीनश्रमान् | बेरोजगार | हृतजीविकान् | जीविका हरण भएका |
| विज्ञानमोहमुग्धम् | विज्ञानको मोहले लठ्ठिएका | आर्षपरम्परा | ऋषिपरम्परा, आर्षसभ्यता |
| प्रभुत्वसम्पादनाय | वर्चस्व स्थापनाका लागि | | |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **विज्ञानं वरदानमिति मते पाठप्रदत्तेभ्योऽन्यानि विषयवस्तूनि शिक्षकात् श्रुत्वा तत्खण्डनं विधाय विपक्षे स्वमतं श्रावयत ।**

२. **सहपाठिनो मित्रात् पाठप्रयुक्तानि पृथक् पृथक् पञ्च क्रियापदानि श्रुत्वा तेषां धातोर्नाम कथयत ।**

३. **शुद्धोच्चारणं कुरुत**

वाक्येषु कर्तृ-कर्म-भावानामाधारेण क्रियापदस्य रूपपरिवर्तनं विधीयते । भाव इति शब्देन क्रियायाः बोधो भवति । वाक्ये कर्तुः कर्मणो भावस्य वा प्राधान्यं भवति । वाक्ये कर्तृकर्मभावेषु कस्य प्रधानता विद्यते ? एतज्ज्ञापिका अवस्था एव वाच्यं कथ्यते । कर्तृकर्मभावैः सह क्रियापदस्य सम्बन्धस्य परिवर्तनाद् वाक्यार्थेषु किमपि परिवर्तनं न भवति । वाच्यस्याभिव्यक्तिः क्रियापदेन विधीयते ।

कर्मवाच्ये क्रियापदस्य रूपं कर्मानुसारं भवति । कर्म आधारीकृत्य तदुचितो लिङ्गवचनपुरुषविभक्तियुक्तः क्रियापदस्य प्रयोगः कर्मवाच्येऽपेक्ष्यते । वाच्यस्यास्य क्रियापदं सकर्मकमेव भवति । कर्मवाच्यस्य कर्तरि तृतीयाविभक्तिः, कर्तृपदे 'द्वारा' इत्यव्ययपदं च संयोज्यते । यथा- छात्राः पुस्तकानि पठन्ति । इति वाक्ये 'पठन्ति' इति क्रिया 'छात्राः' इति कर्तृपदानुरूपा वर्तते । अत्र 'छात्रैः पुस्तकानि पठ्यन्ते' इत्येवंरूपेण कर्मवाच्ये वाक्यपरिवर्तनं कर्तुं शक्यते ।

## ४. मित्रात् मन्तव्यमिदं श्रुत्वा किञ्चन तर्कद्वयं खण्डयत

समादरणीयाः सभापतयः, श्रद्धेयाः प्रमुखातिथयः, पूज्या गुरवः, राजहंसोपमेया निर्णायकाः, ज्येष्ठाः कनिष्ठाश्च विद्यार्थिनः, समकक्षिणः सखायश्च । अहमत्र पक्षमतस्य खण्डनपूर्वकं विपक्षतः 'कृषेर्व्यापार उत्तमः' इति विषये विचारान् प्रस्तोतुं समायातोऽस्मि ।

कथमपि प्रचुरमन्नमुत्पादयेयम्, स्वपरिवारस्य कृते विभज्यावशिष्टस्यान्नस्य विक्रयणेन यथोचितं धनं प्राप्नुयाम् इति कृषकानां मुख्यं ध्येयं भवति । कृषकोऽप्यन्ततो गत्वा कृषिवस्तूनां व्यापारमेव कामयते । सत्यमुच्यते चेन्नहि व्यापाराद् लाभप्रदमन्यं कर्म विद्यते । पूर्ववक्त्रा मित्रेण 'तर्कं पठ कृषिं कुरु' इति लोकोक्तिं पुरस्कृत्य कृषिकर्मणि विहितः श्रमः सदा साफल्यमेव प्रापयति इत्युद्घोषितम् । तत्रैव मे विमतिः । यतो हि कृषकस्तदैव सफलो भवति यदा स कृष्युपजानामन्नशाकफलादेर्व्यापारं विधाय लब्धधनो भवति । वस्तुतः कृषका अपि व्यापारेण एव सन्तुष्टा भवन्ति ।

यद्यपि 'उत्तमा कृषिर्मध्यमो व्यापारः' इति प्राचीनानां कथनं मयापि श्रुतं वर्तते । यदा जगति व्यापारस्य प्रारम्भ एव नासीत् तदा जनाः कृषिवस्तूनामेव विनिमयेन स्वावश्यकतां पूरयन्ति स्म । तदानीमुत्तमा कृषिर्भवेत् किन्त्वधुना व्यापारयुगो वर्तते । इदानीं कृषिरपि व्यापाराश्रिता दृश्यते । संसारे व्यापारिणः एव सुखिनो धनवन्तो मानवन्तश्च मन्यन्ते । बिल् गेट्स, मुकेश-अम्बानी, मार्क-जुकरबर्गः, अस्माकमेव देशस्य विनोदः चौधरी इत्येते व्यापारिणः कियता सुखेन जीवनं यापयन्तः सन्ति । कृषकस्य जीवनं विश्रामहीनं दुःखमयमभावयुतं च भवति । वर्षायां हिमकाले च नक्तन्दिवं स क्षेत्रं धावति । सुखमन्वेषमाणः कृषिं कुर्वन् स तदप्राप्यैव यमप्रियो भवति ।

कृषकाणां कर्म ऋतुचक्रानुसारं निर्धारितं भवति परन्तु व्यापारी स्वानुकूलतां विचार्य सर्वदा व्यापारं कर्तुं शक्नोति । संसारे बहुशो जनाः कृषका एव सन्ति परन्तु असौ सर्वश्रेष्ठः कृषक

इति चर्चा न श्रूयते किन्तु देशे विदेशे च कः श्रेष्ठो धनवान्, को जगत्ख्यातो व्यापारी, को महानुद्योगपतिरिति विषये सञ्चारमाध्यमेषु बहुशश्चर्चा भवति । तेषां सम्मानः प्रसिद्धिश्च सर्वत्र भवति । व्यापारिण एव सुखिनो भवन्ति । कृषकास्तु पर्यावरणे ऋतुचक्रे वा प्रतिकूलतां गतेऽपेक्षितान्नाभावात् क्षुधार्ता व्यथिताश्च जायन्ते । सभाध्यक्षाः, भवन्तो जानन्त्येव व्यापारबलेनैव चीनदेशः समुन्नतेः शिखरमारोहत् किन्तु भूपरिवेष्टितोऽस्माकं देशः कृषिप्रधानः सन्नपि खाद्यवस्तूनि विदेशादानयति । अस्यां स्थितौ अत्रत्यानां कृषकाणां सामाजिकी आर्थिकी च दशा नूनं खेदयुक्ता एव वर्तते । अतः कृषिर्व्यापारस्य प्रतिस्पर्धिनी अपि भवितुं न शक्नोति । (कालसङ्केतको घण्टानादः)

वयं विदेशेषूत्पादितं दूरभाषयन्त्रं क्रीत्वा प्रयुञ्जामहे । एतद् व्यापाद्वारैव सम्भवं जातम् । साम्प्रतिका जना विश्वस्य कस्मिँश्चिदपि कोणे उषित्वा समग्रजगतो वस्तूनि क्रेतुं प्रयोक्तुं च शक्नुवन्ति । कृषिर्यदि प्रयोजनशीला मन्यते चेत् तत्रापि व्यापार एव कारणम् । सभाध्यक्षाः, सर्वं वस्तु धनसाध्यं वर्तते । धनं च व्यापारलभ्यं वर्तते । अतः कृषिर्व्यापारात् श्रेष्ठा भवितुं न शक्नोति । व्यापार एव श्रेष्ठतम इति वदन् मामकं मतमुपसंहरामि । धन्यवादाः । (करतलध्वनिर्गुञ्जति ।)

### ५. पाठाधारेण सङ्क्षेपेण उत्तराणि वदत

(क) सभामण्डपः किमर्थं सुशोभितः ?

(ख) सभामण्डपे कैरासनं गृहीतमस्ति ?

(ग) वादविवादे विपक्षतः केन मन्तव्यं प्रस्तुतम् ?

(घ) मन्तव्ये कीदृशानि विचाराणि वर्जनीयानि ?

(ङ) सङ्केतध्वनेः प्रयोजनं किम् ?

## पठनम्

### १. अधोलिखितं गद्यांशं पठित्वा नारीशिक्षाविषये स्वचिन्तनमेकेनानुच्छेदेन लिखत

शिक्षा प्रत्येकं मानवानामधिकार इति जनैः कथ्यते । अशिक्षिता जनाः स्वाधिकारं स्वकर्तव्यं च न जानन्ति । अतस्ते सर्वत्र स्वाधिकाराद् वञ्चिता भवितुं शक्नुवन्ति । शिक्षा जनानां

मौढ्यं निवारयति; उन्नतिद्वाराणि उद्घाटयति; चेतनाञ्च विस्तारयति । अतः शिक्षा जीवनस्य सफलतायै महत्त्वपूर्णा आधारशिला वर्तते इति शिक्षाविद्भिर्निगद्यते । शिक्षाया आवश्यकता नराणामिव नारीणामपि वर्तते । पुरा पौरस्त्यसमाजे नार्यः शिक्षिता भवन्ति स्म । नारीशिक्षायां सामाजिकाः सदस्या अधिकं सचेष्टा भवन्ति स्म ।

**२. पक्षमतस्यानुच्छेदद्वयं पठित्वा अधस्तनप्रश्नानुत्तरयत**

(क) मानवाः किं वाञ्छन्ति ?

(ख) विज्ञानं कथं कल्पवृक्षतुल्यम् ?

(ग) विज्ञानविरोधिनां कथनं कीदृशम् ?

(घ) मनुष्यः कदा विज्ञानपक्षतां गतः ?

(ङ) विज्ञानसाहाय्येन मनुष्यः किं किं करोति ? कार्यद्वयं लिखत ।

**३. प्रदत्ताननुच्छेदान् पठित्वा विपक्षे स्वमतं प्रकटयत**

सभापतिमहोदयाः, कार्यक्रमस्य प्रमुखातिथयः, गुरुवर्ग, निर्णायकवर्ग, सखायः श्रोतारश्च । अत्र विद्यालये आयोजितायामस्यां वादविवादस्पर्धायां पक्षतो 'व्यापारात् कृषिरुत्तमा' इति विषये स्वविचारान् पुरस्कर्तुमत्र समुपस्थितोऽस्मि ।

यद्यपि व्यापारो न्यायपूर्वकः कर्तव्यस्तथापि सांप्रतिका व्यापारिणः क्रेतान् वञ्चयितुं संलग्नाः सन्ति । परिणामतो मूल्यवृद्धिः प्रतिदिनमेधमाना वर्तते । व्यापारो वञ्चनस्यापरं नामधेयमिति श्रूयते परन्तु कृषिर्जीवनस्य प्रक्रियास्ति । कृषिः प्राकृतिकं जीवनमस्ति चेद् व्यापारो लाभधिया विधीयते । यदि कृषिर्न स्यात्तर्हि व्यापार एव न सम्भवेत् । यतो हि येषां वस्तूनां व्यापारो विधीयते ते कृषिसम्बद्धाः कृषिजन्या एव भवन्ति । यदि कृषकः कृषिकार्यार्थं सततं न प्रयतेत तर्हि खाद्यान्नानामभावेन जीवनमेव सङ्कटापन्नं भवेत् । अतो व्यापारः कृषितुल्यो महत्त्वपूर्णो न भवति ।

सभापतिमहोदयाः ! व्यापारिणः प्रायेण धनदृष्ट्या वदन्ति । अधिकधनार्जनस्य मोहेन केचन व्यापारिणस्तु असत्याधर्मान्यायानां बीजवपनं कृत्वा कृष्णधनस्य वृक्षं फलयन्ति । जनानां समक्षं न केवलं सामग्रीः, अपितु आत्मप्रतिष्ठां च विक्रेतुम् इमे तत्परा भवन्ति ।

धिक् तादृशं जीवनम्, यत्र वञ्चनमेव प्रमुखं कर्म । कृषकस्तु प्राणिनां जीवनरक्षकोऽस्ति । कृषिर्जीवनस्य मुख्य आधारः; वञ्चनधर्मी व्यापारस्तु यमयातनाया द्वारम् । मनुष्याणां जीवनं कृषिकर्मणा एव चलति । व्यापारार्जितं धनं तु धनार्जनतृषां वर्धयते । अतः कृषिः पुण्यसलिला गङ्गा वर्तते चेत् व्यापारः प्रदूषिता कुल्या । अनयोस्तुल्यता एव न सम्भवति ।

सभाध्यक्षाः ! कृषकाः कर्मयोगिनो मन्यन्ते । एते कर्मणि एव स्वाधिकारं मन्वते । क्षेत्रे कार्यं कृत्वा सुस्वास्थ्यम्, आरोग्यं च लभन्ते । परन्तु व्यापारिणः सौविध्यभोगिनो भूत्वापि सदा प्रायोऽस्वस्था दृश्यन्ते । 'सेवा हि परमो धर्मः' इति मूलमन्त्रम् आत्मसात्कृत्य मानवसेवायां निरताः कृषकास्तु स्वर्गीयमानन्दमुपभुञ्जते । कृषिकर्मणि विहितः श्रमः सदा फलवान् भवति परं व्यापारे व्ययीकृतं धनं प्रतिफलशून्यतामपि गन्तुं शक्नोति । (समयसङ्केतको ध्वनिः)

सभापतिमहोदयाः, वञ्चनादिभिर्विहितो व्यापारः फलवान् सन्नपि परिणामे दुःखदो भवति । व्यापारेण धनलाभे जायमानेऽपि सन्तुष्टिर्न प्राप्यते । कृषिकर्मणि सुखं न स्यात्; सौविध्यं न भवेत् किन्तु शारीरिकी स्वस्थता मानसिकी शान्तिश्च भवति । मानवजीवनस्य सफलता शान्तौ सन्तुष्टौ च विद्यते । कृषिकर्मणा आत्मतोषः प्राप्यते । अतस्तोषदां कृषिं परिहृत्य व्यापारेण जीवनं वृथा न यापनीयम् । कृषिं कृत्वा सेवाभावेन जीवितस्य जीवनस्य आनन्दः पृथग् वर्तते । कृषिरेव सज्जीवनम्, कृषिरेव विश्वसमाजस्य आधारः । इयमेव सेव्यं कर्म वर्तते । इत्येतैर्वाक्यैर्मामकीनान् विचारानुपसंहरामि । धन्यवादः । (करतलध्वनिर्गुञ्जति)

## ४. अधोलिखितं गद्यभागं पठित्वा शीर्षकं निर्धारयत

शक्तिः कुत्र भवतीति विषये विदुषां नैकविधास्तर्काः श्रूयन्ते । केचिद् वदन्ति, "शक्तिः राज्यसत्तायां राजकीयेषूच्चपदेषु च भवति ।" अन्ये एतद् अस्वीकृत्य तर्कयन्ति, "शक्तिस्तु बलशालिषु जनेषु भवति ।" तदितरे तु शस्त्रास्त्रेषु शक्तिं पश्यन्ति । एतेषां विचारे आयुधानां शक्तिरेव सर्वाः शक्तीर्जयति । परं भाषाशास्त्रिणां विचारः पृथग् वर्तते । एते शब्देषु शक्तिं पश्यन्ति । कस्यापि शब्दस्य अर्थबोधिनी क्षमता एव शक्तिरिति एतेषां मतम् । यथा 'गो' इति पदेन शृङ्गसास्नादिमतः प्राणिनः बोधो भवति । तादृशस्य प्राणिनो बोधो गोशब्दनिहितायाः शक्त्याः कारणाद् भवति । शक्तिं विना शब्दोऽर्थबोधनेऽक्षमो भवतीति शब्दशास्त्रिणस्तर्कयन्ति ।

## लेखनम्

१. **परस्परं मेलयत**

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| (क) छात्रैः पुस्तकं | भूयते |
| (ख) दर्शकाश्चलचित्रम् | रक्षन्ति |
| (ग) मया शोभनेन | मन्यन्ते |
| (घ) पित्रा पुत्रौ | पठ्यते |
| (ङ) नार्यो देवीस्वरूपिण्यः | आमन्त्रितौ |
| (च) वीरा राष्ट्रं | अपश्यन् |

२. **अधस्तनस्यानुच्छेदस्य श्रुतलेखनं कुरुत**

विद्यार्थिनो विद्यालयतो विश्वविद्यालयपर्यन्तं महता श्रमेण पठन्तः सन्ति । पठनं नाम पाठस्थवाक्यानां वाचनमेव न, पठितपाठस्य आत्मसात्करणमप्यस्ति । पठनगता शैली अवबोधगता क्षमता च प्रत्येकं विद्यार्थिनां पृथक् भवितुं शक्नोति परन्तु पठने यत्नः सर्वैः कर्तव्यः । यावत्पर्यन्तं पाठ्यवस्तुनि अस्माकं चेत एकाकारतां न गच्छति तावत्पर्यन्तं पठितं वस्तु बुद्धिगतं न भवति । कतिपया विद्यार्थिनः पठितवस्तूनि दीर्घकालपर्यन्तं बुद्धौ स्थापयितुं न शक्नुवन्ति । पुनरावृत्तेरभावः, अनभ्यासः, असावधानेन पठनम्, दुर्बला मेधाशक्तिश्चात्र हेतुः । यैरेकाग्रतया पठ्यते; असकृदभ्यासो विधीयते; व्यवहारे तत्प्रयोगश्च क्रियते तैस्तु दीर्घकालपर्यन्तमधीतवस्तूनि न विस्मर्यन्ते । अध्ययनसंस्कृतिरेवाऽधीतविषयाणां ज्ञानाय, उपार्जितज्ञानानां वर्धनाय च अमोघोपायः । अतोऽध्ययने रुचिर्विवर्धनीया ।

३. **पदं प्रयुज्य वाक्यं रचयत**

कायाकल्पः, दृश्यवार्ताम्, जीवनप्रियः, निःसङ्कोचम्, दोषभाजः, उत्कृष्टतरम्, हीनश्रमान्, किल, सौविध्यम्, लब्धधनः

४. **अधोलिखितेष्वाधारपदेषु प्रदत्तमुपसर्गं संयोज्य शब्दनिर्माणं कुरुत**

उपसर्गाः - अव, नि, अप, प्रति, परा, सम्, सु, दुर्, वि, उत्

आधारपदानि - बन्धः, रोधः, यशः, काष्ठा, नतिः, जनः, कारः, भूतिः, मार्गः, चारः

**५. अधोलिखितानां पदावलीनां सन्धिं कृत्वा सन्धिनामानि च लिखत**

| पदावली | सन्धिः | सन्धिनाम |
|---|---|---|
| (क) ग्रन्थ आगारः | ................ | ................ |
| (ख) प्रवेशः निषिद्धः | ................ | ................ |
| (ग) तत् न | ................ | ................ |
| (घ) वनात् आगतः | ................ | ................ |

**६. धातु–क्रियापदानां मेलनं कुरुत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| (क) अट् | कुप्यतु |
| (ख) ईक्ष् | पश्यति |
| (ग) कुप् | अक्षिपन् |
| (घ) दृश् | अटति |
| (ङ) क्षिप् | खन्यते |
| (च) खन् | ऐक्षत |

**अनुप्रयोगः**

**१. अधस्तनपदानि प्रयुज्य दिनैकस्य स्वकार्यकलापं वर्णयत ।**

प्रातः, अल्पाहारः, गृहकार्यम्, विद्यालयवस्त्राणि, अतिरिक्तक्रियाकलापे, मित्रैः सह, मनोरञ्जनाय, आगत्य, अधीतपाठानाम्, आवृत्तिः, पुनर्लेखनम्, खादित्वा, रात्रौ, सुप्तवान् ।

**२. 'पाश्चात्त्यायाः पौरस्त्या सभ्यता गरीयसी' इति शीर्षकमाधारीकृत्य पक्षतो दश वाक्यानि लिखत ।**

# व्याकरणबोधः

अस्मद्-शब्दः

अस्मद्-शब्दस्य (त्रिषु लिङ्गेषु) रूपावली

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् | आवाम् | अस्मान् |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम | आवयोः | अस्माकम् |
| सप्तमी | मयि | आवयोः | अस्मासु |

युष्मद्-शब्दस्य (त्रिषु लिङ्गेषु) रूपावली

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् | युवाम् | युष्मान् |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव | युवयोः | युष्माकम् |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

**१. कोष्ठकाधारेण रिक्तस्थानं पूरयत**

(क) ......... कुत्र गच्छसि ? (युष्मद्)

(ख) .......... उपवनं पश्यामः । (अस्मद्)

(ग) ...... बालाभ्यां निबन्धो लिख्यते । (युष्मद्)

(घ) .......... विचारेषु तेषां सहमतिर्वर्तते । (अस्मद्)

**२. निर्देशानुसारेण वाच्यपरिवर्तनं कुरुत**

(क) यूयं शोभनं कार्यं कुरुथ । (कर्मवाच्ये)

(ख) अहं मुनिवद् जीवामि । (भाववाच्ये)

(ग) अस्माभिश्चलचित्रं दृश्यते । (कर्तृवाच्ये)

(घ) युवाभ्यां तत्र हस्यते । (कर्तृवाच्ये)

**३. अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

मत्, मयि, युवयोः, युष्मान्, माम्, अहम्, युष्मभ्यम्, आवाम्, त्वम्, मया ।

## कोषानुशीलनम्

### मनुष्यवर्गः

**पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ । वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥**

**सुचेलकः पटोऽस्त्री स्याद्वराशिः स्थूलशाटकः । निचोलः प्रच्छदपटः समौ रल्लककम्बलौ ॥**

**अन्तरीयोपसंव्यानपरिधानान्यधोंशुके । द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥**

**संव्यानमुत्तरीयं च चोलः कूर्पासकोऽस्त्रियाम् । नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ॥**

**अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम् । स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥**

**अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि । प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥**

**परिकर्माङ्गसंस्कारः स्यान्मार्ष्टिर्मार्जना मृजा । उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लवः ॥**

**स्नानं चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनम् । अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे ॥**

**तमालपत्रतिलकचित्रकाणि विशेषकम् । द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमम् ॥**

**काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने । रक्तसङ्कोचपिशुनं धीरं लोहितचन्दनम् ॥**

**लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः । लवङ्गं देवकुसुमं श्रीसंज्ञमथ जायकम् ॥**

**कालीयकं च कालानुसार्यं चाथ समार्थकम् । वंशिकागुरुराजार्हलोहकृमिजजोङ्गकम् ॥**

**कालागुर्वगुरु स्यात्तु मङ्गल्या मल्लिगन्धि यत् । यक्षधूपः सर्जरसो रालसर्वरसावपि ॥**

**बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपकौ । तुरुष्कः पिण्डकः सिह्लो यावनोऽप्यथ पायसः ॥**

**श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ । मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकम् ॥**

**कक्कोलकं कोशफलमथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥**

**गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् । तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥**

**तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् । कुचन्दनं चाथ जातीकोशजातीफले समे ॥**

**कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः । गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥**

**चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु । संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ॥**

**माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः । प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं ललामकम् ॥**

**प्रालम्बमृजुलम्बि स्यात्कण्ठाद्वैकक्षिकं तु तत् । यत्तिर्यक्क्षिप्तमुरसि शिखास्वापीडशेखरौ ॥**

**रचना स्यात्परिस्यन्द आभोगः परिपूर्णता । उपधानं तूपबर्हः शरूयायां शयनीयवत् ॥**

**शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः । गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम् ॥**

**समुद्गकः सम्पुटकः प्रतिग्राहः पतद्ग्रहः । प्रसाधनी कङ्कतिका पिष्टातः पटवासकः ॥**

**दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकम् । ॥**

## पदानुशीलनी

**लिङ्गव्यवस्था** – अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे (१), स्त्रीलिङ्गत्वे (२), नपुंसकलिङ्गत्वे (३), पुंस्त्रीलिङ्गत्वे (४), पुंनपुंसकलिङ्गत्वे (५), स्त्रीनपुंसकलिङ्गत्वे (६), पुंस्त्रीनपुंसकलिङ्गत्वे (७) इति सङ्केतः प्रदत्तो वर्तते ।

**जीर्णवस्त्रस्य नामनी** – पटच्चरम् ३, जीर्णवस्त्रम् ३

**नक्तकस्य नामनी** – नक्तकः १, कर्पटः १

**वस्त्रस्य नामानि** – वस्त्रम् ३, आच्छादनम् ३, वासः ३, चैलम् ३, वसनम् ३, अंशुकम् ३

**सुवस्त्राणां नामनी** – सुचेलकः १, पटः ५

**स्थूलवस्त्रस्य नाम** – वराशिः १, स्थूलशाटकः १

**वराशेः नामनी** – निचोलः ७, प्रच्छदपटः १

**रल्लकस्य नामनी** – रल्लकः १, कम्बलः १

**परिधानस्य नामानि** – अन्तरीयम् ३, उपसंव्यानम् ३, परिधानम् ३, अधोंऽशुकम् ३

**बृहतिकायाः नामानि** – प्रावारः १, उत्तरासङ्गः १, बृहतिका २, संव्यानम् ३, उत्तरीयम् ३

**चोलस्य नामनी** – चोलः १, कूर्पासकः ५

**नीशारस्य नाम** – नीशारः १

**अर्धोरुकस्य नामनी** – अर्धोरुकम् ३, चण्डातकम् ३

**आप्रपदीनस्य वस्त्रस्य नामनी** – आप्रपदम् ७, आप्रपदीनः ७

**वितानस्य नामनी** – वितानः ५, उल्लोचः १

**दूष्यस्य नाम** – दूष्यम् ३

**जवनिकायाः नामानि** – प्रतिसीरा २, जवनिका २, तिरस्करिणी २

**अङ्गसंस्कारकर्मणः नामनी** – परिकर्म ३, अङ्गसंस्कारः १

**मार्जनायाः नामानि** – मार्ष्टिः २, मार्जना २, मृजा २

**उत्सादनस्य नामनी** – उद्वर्तनम् ३, उत्सादनम् ३

**स्नानस्य नामानि** – आप्लावः १, आप्लवः १, स्नानम् ३

**तिलकलेपनस्य नामानि** – चर्चा २, चार्चिक्यम् ३, स्थासकः १

**प्रबोधनस्य नामनी** – प्रबोधनम् ३, अनुबोधः १

**पत्रलेखायाः नामनी** – पत्रलेखा २, पत्राङ्गुलिः २

**तिलकस्य नामानि** – तमालपत्रम् ३, तिलकम् ५, चित्रकम् ३, विशेषकम् ५

**कुङ्कुमस्य नामानि** – कुङ्कुमम् ३, काश्मीरजन्म ३, अग्निशिखम् ३, वरम् ३, बाह्लीकम् ३, पीतनम् ३, रक्तम् ३, सङ्कोचम् ३, पिशुनम् ३, धीरम् ३, लोहितचन्दनम् ३

**लाक्षायाः नामानि** – लाक्षा २, राक्षा २, जतु ३, यावः १, अलक्तः १, द्रुमामयः

**लवङ्गस्य नामानि** – लवङ्गम् ३, देवकुसुमम् ३, श्रीसंज्ञम् ३

**जायकस्य नामानि** – जायकम् ३, कालीयकम् ३, कालानुसार्यम् ३

**सामान्यवंशिकस्य नामानि** – वंशिकम् ३, अगुरु ३, राजार्हम् ३, लोहम् ३, कृमिजम् ३, जोङ्गकम् ३

**अगुरोः नामनी** – कालागुरु ३, अगुरु ३

**सुगन्धिनः धूपस्य नामनी** – मङ्गल्या ३, मल्लिगन्धि ३

**यक्षधूपस्य नामानि** – यक्षधूपः १, सर्जरसः १, रालः १, सर्वरसः १, बहुरूपः १

**कृत्रिमधूपस्य नामनी** – वृकधूपः १, कृत्रिमधूपकः १

**धूपविशेषाणां नामानि** – तुरुष्कः १, पिण्डकः १, सिह्लः १, यावनः १

**पायसस्य नामानि** – पायसः १, श्रीवासः १, वृकधूपः १, श्रीवेष्टः १, सरलद्रवः १

**मृगमदस्य नामानि** – मृगनाभिः १, मृगमदः १, कस्तूरी २

**कोकलस्य नामानि** – कोलकम् ३, कक्कोलकम् ३, कोशफलम् ३

**कर्पूरस्य नामानि** – कर्पूरः ५, घनसारः १, चन्द्रसंज्ञः १, सिताभ्रः १, हिमवालुका २

**चन्दनस्य नामानि** – श्रीखण्डः १, गन्धसारः १, मलयजः १, भद्रश्री २, चन्दनम् ५

**चन्दनविशेषस्य नामानि** – तैलपर्णिकम् ३, गोशीर्षम् ३, हरिचन्दनम् ५

**रक्तचन्दनस्य नामानि** – तिलपर्णी २, पत्राङ्गम् ३, रञ्जनम् ३, रक्तचन्दनम् ३, कुचन्दनम् ३

**जतिफलस्य नामनी** – जातीकोशम् ३, जातीफलम् ३

**यक्षकर्दमस्य नाम** – यक्षकर्दमः १

**विलेपनस्य नाम नामानि** – गात्रानुलेपनी २, वर्तिः २, वर्णकम् ३, विलेपनम् ३

**चूर्णस्य नामनी** – चूर्णम् ३, वासयोगः १

**वासितस्य नामनी** – भावितम् ७, वासितम् ७

**वासनस्य नाम** – अधिवासनम् ३

**मालायाः नामानि** – माल्यम् ३, माला २, स्रज् २

**शिरसोऽवलम्बिताया मालायाः नाम** – गर्भकः १

**प्रभ्रष्टकस्य नाम** – प्रभ्रष्टकम् ३

**ललामकस्य नाम** – ललामकम् ३

**प्रलम्बस्य नाम** – प्रालम्बम् ३

**वैकक्षिकस्य नाम** – वैकक्षिकम् ३

**आपीडस्य नामनी** – आपीडः १, शेखरः १

**मालायाः निर्माणस्य नामनी** – रचना २, परिस्पन्दः १

**आभोगस्य नामनी** – आभोगः १, परिपूर्णता २

**उपाधानस्य नामनी** – उपधानम् ३, उपबर्हः १

**शयनस्य नामानि** – शय्या २, शयनीयम् ३, शयनम् ३

**खट्वायाः नामानि** – मञ्चः १, पर्यङ्कः १, पल्यङ्कः १, खट्वा २

**कन्दुकस्य नामनी** – गेन्दुकः १, कन्दुकः १

**दीपस्य नामनी** – दीपः १, प्रदीपः १

**पीठस्य नामनी** – पीठम् ३, आसनम् ३

**सम्पुटकस्य नामनी** – समुद्गकः १, सम्पुटकः १

**प्रतिग्राहस्य नामनी** – प्रतिग्राहः १, पतद्ग्रहः १

**कङ्कतिकायाः नामनी** – प्रसाधनी २, कङ्कतिका २

**पिष्टातस्य नामनी** – पिष्टातः १, पटवासकः १

**दर्पणस्य नामानि** – दर्पणम् ५, मुकुरः १, आदर्शः १

**व्यजनस्य नामनी** – व्यजनम् ३, तालवृन्तकम् ३

## अभ्यासः

१. **वस्त्रस्य नामानि श्रावयत ।**

२. **तिलकस्य नामानि वदत ।**

३. **सङ्क्षेपेण उत्तरयत**

(क) लाक्षाया नामानि कति सन्ति ? कानि च तानि ?

(ख) धूपविशेषस्य नामानि कानि ?

(ग) दर्पणस्य कति नामानि सन्ति ? तानि सर्वाणि लिखत ।

(घ) शयनस्य तुल्यार्थवाचीनि पदानि कानि ?

४. **परस्परं मेलयत**

| | |
|---|---|
| आदर्शः | श्रीसंज्ञम् |
| व्यञ्जनम् | स्नानम् |
| दीपः | तालवृन्तकम् |
| माला | दर्पणम् |
| आप्लवः | माल्यम् |
| लवङ्गः | प्रदीपः |

५. **नेपालीभाषायामर्थं लिखत**

कङ्कतिका, पर्यङ्कः, जातीफलम्, मलयजः, घनसार, जतु, पत्रलेखा, उद्वर्तनम्, जवनिका ।

६. **पर्यायान् लिखत**

पटच्चरम्, वसनम्, अन्तरीयम्, लवङ्गम्, मृजा, चोलः, उल्लोचः, प्रबोधनम्, रञ्जनम् ।

७. **कुङ्कुमस्य सर्वाणि नामानि लिखत ।**

८. **जतु-शब्दस्य सर्वाणि रूपाणि लिखत ।**

९. **संस्कृतेऽनुवादं कुरुत**

(क) सालधूपबाट निकै सुगन्ध आउँछ ।

(ख) गर्मीमा पङ्खा आवश्यक हुने छ ।

(ग) झ्यालमा पर्दा चाहिएको थियो ।

(घ) आमाले कम्बल किनेर ल्याउनुभयो ।

(ङ) म जामा लगाउन चाहन्छु ।